# Shri Shiva Mahapuranam 1 vidyeshvarasaMhitA

# શ્રીશિવમહાપુરાણમ્ ૧ વિધેશ્વરસંહિતા

## Document Information

Text title : Shivapuranam 1 vidyeshvarasaMhitA

File name : shivapurANam1vidyeshvarasaMhitA.itx

Category : shiva, purANa, shivapurANa

Location : doc_purana

Proofread by : Revathy Rajaraman and team members Uma Mahesh, Jayalakshmi Jayaraman, Malati Shekar, Meenakshi Premanand, Lata Murali, Sornavalli K, K C Swaminathan, Gayathri Veda

Latest update : January 23, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 31, 2026

*sanskritdocuments.org*

# શ્રીશિવમહાપુરાણમ્ ૧ વિદ્યેશ્વરસંહિતા

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥ વિદ્યેશ્વરસંહિતા

## ૧.૧. પ્રથમોઽધ્યાયઃ । મુનિપ્રશ્નોત્તરવર્ણનમ્ ।

આદ્યન્તમઙ્ગલમજાતસમાનભાવ-
માર્યં તમીશમજરામરમાત્મદેવમ્ ।
પઞ્ચાનનં પ્રબલપઞ્ચવિનોદશીલં
સમ્ભાવયે મનસિ શઙ્કરમમ્બિકેશમ્ ॥ ૧॥

વ્યાસ ઉવાચ ।
ધર્મક્ષેત્રે મહાક્ષેત્રે ગઙ્ગાકાલિન્દિસઙ્ગમે ।
પ્રયાગે પરમે પુણ્યે બ્રહ્મલોકસ્ય વર્ત્મનિ ॥ ૧॥

મુનયઃ શંસિતાત્માનઃ સત્યવ્રતપરાયણાઃ ।
મહૌજસો મહાભાગા મહાસત્રં વિતેનિરે ॥ ૨॥

તત્ર સત્રં સમાકર્ણ્ય વ્યાસશિષ્યો મહામુનિઃ ।
આજગામ મુનીન્ દ્રષ્ટું સૂતઃ પૌરાણિકોત્તમઃ ॥ ૩॥

તં દૃષ્ટ્વા સૂતમાયાન્તં હર્ષિતા મુનયસ્તદા ।
ચેતસા સુપ્રસન્નેન પૂજાં ચક્રુર્યથાવિધિ ॥ ૪॥

તતો વિનયસંયુક્તાઃ પ્રોચુઃ સાઞ્જલયશ્ચ તે ।
સુપ્રસન્ના મહાત્માનઃ સ્તુતિં કૃત્વા યથાવિધિ ॥ ૫॥

રોમહર્ષણ સર્વજ્ઞ ભવાન્ વૈ ભાગ્યગૌરવાત્ ।
પુરાણવિદ્યામખિલાં વ્યાસાત્ પ્રત્યર્થમીયિવાન્ ॥ ૬॥

તસ્માદાશ્ચર્યભૂતાનાં કથાનાં ત્વં હિ ભાજનમ્ ।

રત્નાનામુરુસારાણાં રત્નાકર ઇવાર્ણવઃ ॥ ૭॥

યચ્ચ ભૂતં ચ ભવ્યં ચ યચ્ચાન્યદ્વસ્તુ વર્તતે ।
ન ત્વયાવિદિતં કિઞ્ચિત્ ત્રિષુ લોકેષુ વિદ્યતે ॥ ૮॥

ત્વં મદ્દિષ્ટવશાદસ્ય દર્શનાર્થમિહાગતઃ ।
કુર્વન્ કિમપિ નઃ શ્રેયો ન વૃથાગન્તુમર્હસિ ॥ ૯॥

તત્ત્વં શ્રુતં સ્મ નઃ સર્વં પૂર્વમેવ શુભાશુભમ્ ।
ન તૃપ્તિમધિગચ્છામઃ શ્રવણેચ્છા મુહુર્મુહુઃ ॥ ૧૦॥

ઇદાનીમેકમેવાસ્તિ શ્રોતવ્યં સૂત સન્મતે ।
તદ્રહસ્યમપિ બ્રૂહિ યદિ તેઽનુગ્રહો ભવેત્ ॥ ૧૧॥

પ્રાપ્તે કલિયુગે ઘોરે નરાઃ પુણ્યવિવર્જિતાઃ ।
દુરાચારરતાઃ સર્વે સત્યવાર્તાપરાઙ્મુખાઃ ॥ ૧૨॥

પરાપવાદનિરતાઃ પરદ્રવ્યાભિલાષિણઃ ।
પરસ્ત્રીસક્તમનસઃ પરહિંસાપરાયણાઃ ॥ ૧૩॥

દેહાત્મદૃષ્ટયો મૂઢા નાસ્તિકાઃ પશુબુદ્ધયઃ ।
માતૃપિતૃકૃતદ્વેષાઃ સ્ત્રીદેવાઃ કામકિઙ્કરાઃ ॥ ૧૪॥

વિપ્રા લોભગ્રહગ્રસ્તા વેદવિક્રયજીવિનઃ ।
ધનાર્જનાર્થમભ્યસ્તવિદ્યા મદવિમોહિતાઃ ॥ ૧૫॥

ત્યક્તસ્વજાતિકર્માણઃ પ્રાયશઃ પરવઞ્ચકાઃ ।
ત્રિકાલસન્ધ્યયા હીના બ્રહ્મબોધવિવર્જિતાઃ ॥ ૧૬॥

અદયાઃ પણ્ડિતમ્મન્યાઃ સ્વાચારવ્રતલોપકાઃ ।
કૃષ્યુદ્યમરતાઃ ક્રૂરસ્વભાવા મલિનાશયાઃ ॥ ૧૭॥

ક્ષત્રિયાશ્ચ તથા સર્વે સ્વધર્મત્યાગશીલિનઃ ।
અસત્સઙ્ગાઃ પાપરતા વ્યભિચારપરાયણાઃ ॥ ૧૮॥

અશૂરા અરણપ્રીતાઃ પલાયનપરાયણાઃ ।
કુચૌરવૃત્તયઃ શૂદ્રાઃ કામકિઙ્કરચેતસઃ ॥ ૧૯॥

શસ્ત્રાસ્ત્રવિદ્યયા હીના ધેનુવિપ્રાવનોજ્ઝિતાઃ ।
શરણ્યાવનહીનાશ્ચ કામિન્યૂતિમૃગાઃ સદા ॥ ૨૦॥

પ્રજાપાલનસદ્ધર્મવિહીના ભોગતત્પરાઃ ।
પ્રજાસંહારકા દુષ્ટા જીવહિંસાકરા મુદા ॥ ૨૧॥

વૈશ્યાઃ સંસ્કારહીનાસ્તે સ્વધર્મત્યાગશીલિનઃ ।
કુપથાઃ સ્વાર્જનરતાસ્તુલાકર્મકુવૃત્તયઃ ॥ ૨૨॥

ગુરુદેવદ્વિજાતીનાં ભક્તિહીનાઃ કુબુદ્ધયઃ ।
અભોજિતદ્વિજાઃ પ્રાયઃ કૃપણા બદ્ધમુષ્ટયઃ ॥ ૨૩॥

કામિનીજારભાવેષુ સુરતા મલિનાશયાઃ ।
લોભમોહવિચેતસ્કાઃ પૂર્તાદિષુ વૃષોજ્ઝિતાઃ ॥ ૨૪॥

તદ્વચ્છૂદ્રાશ્ચ યે કેચિદ્ બ્રાહ્મણાચારતત્પરાઃ ।
ઉજ્જ્વલાકૃતયો મૂઢાઃ સ્વધર્મત્યાગશીલિનઃ ॥ ૨૫॥

કર્તારસ્તપસાં ભૂયો દ્વિજતેજોઽપહારકાઃ ।
શિશ્વલ્પમૃત્યુકારાશ્ચ મન્ત્રોચ્ચારપરાયણાઃ ॥ ૨૬॥

શાલગ્રામશિલાદીનાં પૂજકા હોમતત્પરાઃ ।
પ્રતિકૂલવિચારાશ્ચ કુટિલા દ્વિજદૂષકાઃ ॥ ૨૭॥

ધનવન્તઃ કુકર્માણો વિદ્યાવન્તો વિવાદિનઃ ।
આખ્યાનોપાસનાધર્મવક્તારો ધર્મલોપકાઃ ॥ ૨૮॥

સુભૂપાકૃતયો દમ્ભાઃ સુદાતારો મહામદાઃ ।
વિપ્રાદીન્ સેવકાન્ મત્વા મન્યમાના નિજં પ્રભુમ્ ॥ ૨૯॥

સ્વધર્મરહિતા મૂઢાઃ સઙ્કરાઃ ક્રૂરબુદ્ધયઃ ।
મહાભિમાનિનો નિત્યં ચતુર્વર્ણવિલોપકાઃ ॥ ૩૦॥

સુકુલીનાન્નિજાન્ મત્વા ચતુર્વર્ણૈર્વિવર્તનાઃ ।
સર્વવર્ણભ્રષ્ટકરાઃ મૂઢાઃ સત્કર્મકારિણઃ ॥ ૩૧॥

સ્ત્રિયશ્ચ પ્રાયશો ભ્રષ્ટા ભર્ત્રવજ્ઞાનકારિકાઃ ।
શ્વશુરદ્રોહકારિણ્યો નિર્ભયા મલિનાશનાઃ ॥ ૩૨॥

કુહાવભાવનિરતાઃ કુશીલાઃ સ્મરવિહ્વલાઃ ।
જારસઙ્ગરતા નિત્યં સ્વસ્વામિવિમુખાસ્તથા ॥ ૩૩॥

તનયા માતૃપિત્રોશ્ચ ભક્તિહીના દુરાશયાઃ ।
અવિદ્યાપાઠકા નિત્યં રોગગ્રસિતદેહકાઃ ॥ ૩૪॥

એતેષાં નષ્ટબુદ્ધીનાં સ્વધર્મત્યાગશીલિનામ્ ।
પરલોકેઽપીહ લોકે કથં સૂત ગતિર્ભવેત્ ॥ ૩૫॥

ઇતિ ચિન્તાકુલં ચિત્તં જાયતે સતતં હિ નઃ ।
પરોપકારસદૃશો નાસ્તિ ધર્મોઽપરઃ ખલુ ॥ ૩૬॥

લઘૂપાયેન યેનૈષાં ભવેત્ સદ્યોઽઘનાશનમ્ ।
સર્વસિદ્ધાન્તવિત્ત્વં હિ કૃપયા તદ્વદાધુના ॥ ૩૭॥

વ્યાસ ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તેષાં મુનીનાં ભાવિતાત્મનામ્ ।
મનસા શઙ્કરં સ્મૃત્વા સૂતઃ પ્રોવાચ તાન્ મુનીન્ ॥ ૩૮॥

ઇતિ શ્રીશિવમહાપુરાણે પ્રથમાયાં વિદ્યેશ્વરસંહિતાયાં મુનિપ્રશ્નવર્ણનં નામ પ્રથમોઽધ્યાયઃ ॥ ૧.૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
વિદ્યેશ્વરસંહિતા

## ૧.૨. દ્વિતીયોઽધ્યાયઃ । મુનિપ્રશ્નાનામુત્તરાણિ ।

સૂત ઉવાચ ।
સાધુ પૃષ્ટં સાધવો વસ્ત્રૈલોક્યહિતકારકમ્ ।
ગુરું સ્મૃત્વા ભવત્સ્નેહાદ્વક્ષ્યે તચ્છૃણુતાદરાત્ ॥ ૧॥

વેદાન્તસારસર્વસ્વં પુરાણં ચૈવમુત્તમમ્ ।
સર્વાઘૌઘોદ્ધારકરં પરત્ર પરમાર્થદમ્ ॥ ૨॥

કલિકલ્મષવિધ્વંસિ યસ્મિઞ્છિવયશઃ પરમ્ ।
વિજૃમ્ભતે સદા વિપ્રાશ્ચતુર્વર્ગફલપ્રદમ્ ॥ ૩॥

તસ્યાધ્યયનમાત્રેણ પુરાણસ્ય દ્વિજોત્તમાઃ ।
સર્વોત્તમસ્ય શૈવસ્ય તે યાસ્યન્તિ સુસદ્ગતિમ્ ॥ ૪॥

તાવદ્વિજૃમ્ભતે પાપં બ્રહ્મહત્યાપુરસ્સરમ્ ।
યાવચ્છિવપુરાણં હિ નોદેષ્યતિ જગત્યહો ॥ ૫॥

તાવત્કલિમહોત્પાતાઃ સઞ્ચરિષ્યન્તિ નિર્ભયાઃ ।

યાવચ્છિવપુરાણં હિ નોદેષ્યતિ જગત્યહો ॥ ૬॥

તાવત્સર્વાણિ શાસ્ત્રાણિ વિવદન્તે પરસ્પરમ્ ।
યાવચ્છિવપુરાણં હિ નોદેષ્યતિ જગત્યહો ॥ ૭॥

તાવત્સ્વરૂપં દુર્બોધં શિવસ્ય મહતામપિ ।
યાવચ્છિવપુરાણં હિ નોદેષ્યતિ જગત્યહો ॥ ૮॥

તાવદ્યમભટાઃ ક્રૂરાઃ સઞ્ચરિષ્યન્તિ નિર્ભયાઃ ।
યાવચ્છિવપુરાણં હિ નોદેષ્યતિ જગત્યહો ॥ ૯॥

તાવત્સર્વપુરાણાનિ પ્રગર્જન્તિ મહીતલે ।
યાવચ્છિવપુરાણં હિ નોદેષ્યતિ જગત્યહો ॥ ૧૦॥

તાવત્સર્વાણિ તીર્થાનિ વિવદન્તે મહીતલે ।
યાવચ્છિવપુરાણં હિ નોદેષ્યતિ જગત્યહો ॥ ૧૧॥

તાવત્સર્વે મુદા મન્ત્રા વિવદન્તે મહીતલે ।
યાવચ્છિવપુરાણં હિ નોદેષ્યતિ મહીતલે ॥ ૧૨॥

તાવત્સર્વાણિ ક્ષેત્રાણિ વિવદન્તે મહીતલે ।
યાવચ્છિવપુરાણં હિ નોદેષ્યતિ મહીતલે ॥ ૧૩॥

તાવત્સર્વાણિ પીઠાનિ વિવદન્તે મહીતલે ।
યાવચ્છિવપુરાણં હિ નોદેષ્યતિ મહીતલે ॥ ૧૪॥

તાવત્સર્વાણિ દાનાનિ વિવદન્તે મહીતલે ।
યાવચ્છિવપુરાણં હિ નોદેષ્યતિ મહીતલે ॥ ૧૫॥

તાવત્સર્વે ચ તે દેવા વિવદન્તે મહીતલે ।
યાવચ્છિવપુરાણં હિ નોદેષ્યતિ મહીતલે ॥ ૧૬॥

તાવત્સર્વે ચ સિદ્ધાન્તા વિવદન્તે મહીતલે ।
યાવચ્છિવપુરાણં હિ નોદેષ્યતિ મહીતલે ॥ ૧૭॥

અસ્ય શૈવપુરાણસ્ય કીર્તનશ્રવણાદ્ દ્વિજાઃ ।
ફલં વક્તું ન શક્નોમિ કાર્ત્સ્ન્યેન મુનિસત્તમાઃ ॥ ૧૮॥

તથાપિ તસ્ય માહાત્મ્યં વક્ષ્યે કિઞ્ચિત્તુ વોઽનઘાઃ ।
ચિત્તમાધાય શ૱ૃણુત વ્યાસેનોક્તં પુરા મમ ॥ ૧૯॥

એતચ્છિવપુરાણં હિ શ્લોકં શ્લોકાર્ધમેવ ચ ।
યઃ પઠેદ્ભક્તિસંયુક્તઃ સ પાપાન્મુચ્યતે ક્ષણાત્ ॥ ૨૦॥

એતચ્છિવપુરાણં હિ યઃ પ્રત્યહમતન્દ્રિતઃ ।
યથાશક્તિ પઠેદ્ ભક્ત્યા સ જીવન્મુક્ત ઉચ્યતે ॥ ૨૧॥

એતચ્છિવપુરાણં હિ યો ભક્ત્યાર્ચયતે સદા ।
દિને દિનેઽશ્વમેધસ્ય ફલં પ્રાપ્નોત્યસંશયમ્ ॥ ૨૨॥

એતચ્છિવપુરાણં યઃ સાધારણપદેચ્છયા ।
અન્યતઃ શ‍ૃણુયાત્ સોઽપિ મત્તો મુચ્યેત પાતકાત્ ॥ ૨૩॥

એતચ્છિવપુરાણં યો નમસ્કુર્યાદદૂરતઃ ।
સર્વદેવાર્ચનફલં સ પ્રાપ્નોતિ ન સંશયઃ ॥ ૨૪॥

એતચ્છિવપુરાણં વૈ લિખિત્વા પુસ્તકં સ્વયમ્ ।
યો દદ્યાચ્છિવભક્તેભ્યસ્તસ્ય પુણ્યફલં શ‍ૃણુ ॥ ૨૫॥

અધીતેષુ ચ શાસ્ત્રેષુ વેદેષુ વ્યાકૃતેષુ ચ ।
યત્ફલં દુર્લભં લોકે તત્ફલં તસ્ય સમ્ભવેત્ ॥ ૨૬॥

એતચ્છિવપુરાણં હિ ચતુર્દશ્યામુપોષિતઃ ।
શિવભક્તસભાયાં યો વ્યાકરોતિ સ ઉત્તમઃ ॥ ૨૭॥

પ્રત્યક્ષરં તુ ગાયત્રીપુરશ્ચર્યાફલં લભેત્ ।
ઇહ ભુક્ત્વાખિલાન્ કામાનન્તે નિર્વાણતાં વ્રજેત્ ॥ ૨૮॥

ઉપોષિતશ્ચતુર્દશ્યાં રાત્રૌ જાગરણાન્વિતઃ ।
યઃ પઠેચ્છૃણુયાદ્વાપિ તસ્ય પુણ્યં વદામ્યહમ્ ॥ ૨૯॥

કુરુક્ષેત્રાદિનિખિલપુણ્યતીર્થેષ્વનેકશઃ ।
આત્મતુલ્યધનં સૂર્યગ્રહણે સર્વતોમુખે ॥ ૩૦॥

વિપ્રેભ્યો વ્યાસમુખ્યેભ્યો દત્ત્વા યત્ફલમશ્નુતે ।
તત્ફલં સમ્ભવેત્તસ્ય સત્યં સત્યં ન સંશયઃ ॥ ૩૧॥

એતચ્છિવપુરાણં હિ ગાયતે યોઽપ્યહર્નિશમ્ ।
આજ્ઞાં તસ્ય પ્રતીક્ષેરન્ દેવા ઇન્દ્રપુરોગમાઃ ॥ ૩૨॥

એતચ્છિવપુરાણં યઃ પઠઞ્છૃણ્વન્ હિ નિત્યશઃ ।
યદ્યત્ કરોતિ સત્કર્મ તત્કોટિગુણિતં ભવેત્ ॥ ૩૩॥

સમાહિતઃ પઠેદ્યસ્તુ તત્ર શ્રીરુદ્રસંહિતામ્ ।
સ બ્રહ્મઘ્નોઽપિ પૂતાત્મા ત્રિભિરેવ દિનૈર્ભવેત્ ॥ ૩૪॥

તાં રુદ્રસંહિતાં યસ્તુ ભૈરવપ્રતિમાન્તિકે ।
ત્રિઃ પઠેત્પ્રત્યહં મૌની સ કામાનખિલાઁલ્લભેત્ ॥ ૩૫॥

તાં રુદ્રસંહિતાં યસ્તુ સમ્પઠેદ્ વટબિલ્વયોઃ ।
પ્રદક્ષિણાં પ્રકુર્વાણો બ્રહ્મહત્યા નિવર્તતે ॥ ૩૬॥

કૈલાસસંહિતા તત્ર તતોઽપિ પરમા સ્મૃતા ।
બ્રહ્મસ્વરૂપિણી સાક્ષાત્ પ્રણવાર્થપ્રકાશિકા ॥ ૩૭॥

કૈલાસસંહિતાયાસ્તુ માહાત્મ્યં વેત્તિ શઙ્કરઃ ।
કૃત્સ્નં તદર્ધં વ્યાસશ્ચ તદર્ધં વેદ્મ્યહં દ્વિજાઃ ॥ ૩૮॥

તત્ર કિઞ્ચિત્પ્રવક્ષ્યામિ કૃત્સ્નં વક્તું ન શક્યતે ।
યજ્જ્ઞાત્વા તત્ક્ષણાલ્લોકશ્ચિત્તશુદ્ધિમવાપ્નુયાત્ ॥ ૩૯॥

ન નાશયતિ યત્પાપં સા રૌદ્રી સંહિતા દ્વિજાઃ ।
તન્ન પશ્યામ્યહં લોકે માર્ગમાણોઽપિ સર્વદા ॥ ૪૦॥

શિવેનોપનિષત્સિન્ધુમન્થનોત્પાદિતાં મુદા ।
કુમારાયાર્પિતાં તાં વૈ સુધાં પીત્વામરો ભવેત્ ॥ ૪૧॥

બ્રહ્મહત્યાદિપાપાનાં નિષ્કૃતિં કર્તુમુદ્યતઃ ।
માસમાત્રં સંહિતાં તાં પઠિત્વા મુચ્યતે તતઃ ॥ ૪૨॥

દુષ્પ્રતિગ્રહદુર્ભોજ્યદુરાલાપાદિસમ્ભવમ્ ।
પાપં સકૃત્ કીર્તનેન સંહિતા સા વિનાશયેત્ ॥ ૪૩॥

શિવાલયે બિલ્વવને સંહિતાં તાં પઠેત્ તુ યઃ ।
સ યત્ફલમવાપ્નોતિ તદ્વાચોઽપિ ન ગોચરે ॥ ૪૪॥

સંહિતાં તાં પઠન્ ભક્ત્યા યઃ શ્રાદ્ધે ભોજયેદ્ દ્વિજાન્ ।
તસ્ય યે પિતરઃ સર્વે યાન્તિ શમ્ભોઃ પરં પદમ્ ॥ ૪૫॥

ચતુર્દશ્યાં નિરાહારો યઃ પઠેત્ સંહિતાં ચ તામ્ ।
બિલ્વમૂલે શિવઃ સાક્ષાત્સ દેવૈશ્ચ પ્રપૂજ્યતે ॥ ૪૬॥

અપ્યન્યાઃ સંહિતાસ્તત્ર સર્વકામફલપ્રદાઃ ।

ઉભે વિશિષ્ટે વિજ્ઞેયે લીલાવિજ્ઞાનપૂરિતે ॥ ૪૭॥

તદિદં શૈવમાખ્યાતં પુરાણં વેદસમ્મિતમ્ ।
નિર્મિતં તચ્છિવેનૈવ પ્રથમં બ્રહ્મસમ્મિતમ્ ॥ ૪૮॥

વિદ્યેશં ચ તથા રૌદ્રં વૈનાયકમથૌમિકમ્ ।
માત્રં રુદ્રૈકાદશકં કૈલાસં શતરુદ્રકમ્ ॥ ૪૯॥

કોટિરુદ્રસહસ્રાદ્યં કોટિરુદ્રં તથૈવ ચ ।
વાયવીયં ધર્મસંજ્ઞં પુરાણમિતિ ભેદતઃ ॥ ૫૦॥

સંહિતા દ્વાદશમિતા મહાપુણ્યતરા મતાઃ ।
તાસાં સઙ્ખ્યાં બ્રુવે વિપ્રાઃ શ◌ૃણુતાદરતોઽખિલમ્ ॥ ૫૧॥

વિદ્યેશં દશસાહસ્રં રુદ્રં વૈનાયકં તથા ।
ઔમં માતૃપુરાણાખ્યં પ્રત્યેકાષ્ટસહસ્રકમ્ ॥ ૫૨॥

ત્રયોદશસહસ્રં હિ રુદ્રૈકાદશકં દ્વિજાઃ ।
ષટ્સહસ્રં ચ કૈલાસં શતરુદ્રં તદર્ધકમ્ ॥ ૫૩॥

કોટિરુદ્રં ત્રિગુણિતમેકાદશસહસ્રકમ્ ।
સહસ્રકોટિરુદ્રાખ્યમુદિતં ગ્રન્થસઙ્ખ્યયા ॥ ૫૪॥

વાયવીયં ખાબ્ધિશતં ધર્મં રવિસહસ્રકમ્ ।
તદેવં લક્ષસઙ્ખ્યાકં શૈવં સઙ્ખ્યાવિભેદતઃ ॥ ૫૫॥

વ્યાસેન તત્તુ સઙ્ક્ષિપ્તં ચતુર્વિંશત્સહસ્રકમ્ ।
શૈવં તત્ર ચતુર્થં વૈ પુરાણં સપ્તસંહિતમ્ ॥ ૫૬॥

શિવેન કલ્પિતં પૂર્વં પુરાણં ગ્રન્થસઙ્ખ્યયા ।
શતકોટિપ્રમાણં હિ પુરા સૃષ્ટૌ સુવિસ્તૃતમ્ ॥ ૫૭॥

વ્યસ્તેઽષ્ટાદશધા ચૈવ પુરાણે દ્વાપરાદિષુ ।
ચતુર્લક્ષેણ સઙ્ક્ષિપ્તે કૃતે દ્વૈપાયનાદિભિઃ ॥ ૫૮॥

પ્રોક્તં શિવપુરાણં હિ ચતુર્વિંશત્સહસ્રકમ્ ।
શ્લોકાનાં સઙ્ખ્યયા સપ્તસંહિતં બ્રહ્મસમ્મિતમ્ ॥ ૫૯॥

વિદ્યેશ્વરાખ્યા તત્રાદ્યા રૌદ્રી જ્ઞેયા દ્વિતીયિકા ।
તૃતીયા શતરુદ્રાખ્યા કોટિરુદ્રા ચતુર્થિકા ॥ ૬૦॥

પઞ્ચમી ચૈવમૌમ્યાખ્યા ષષ્ઠી કૈલાસસંજ્ઞિકા ।
સપ્તમી વાયવીયાખ્યા સપ્તૈવં સંહિતા મતાઃ ॥ ૬૧॥

સસપ્તસંહિતં દિવ્યં પુરાણં શિવસંજ્ઞકમ્ ।
વરીવર્તિ બ્રહ્મતુલ્યં સર્વોપરિગતિપ્રદમ્ ॥ ૬૨॥

એતચ્છિવપુરાણં હિ સપ્તસંહિતમાદરાત્ ।
પરિપૂર્ણં પઠેદ્યસ્તુ સ જીવન્મુક્ત ઉચ્યતે ॥ ૬૩॥

શ્રુતિસ્મૃતિપુરાણેતિહાસાગમશતાનિ ચ ।
એતચ્છિવપુરાણસ્ય નાર્હન્ત્યલ્પાં કલામપિ ॥ ૬૪॥

શૈવં પુરાણમમલં શિવકીર્તિતં તદ્
વ્યાસેન શૈવપ્રવણેન ચ સઙ્ગૃહીતમ્ ।
સઙ્ક્ષેપતઃ સકલજીવગુણોપકારં
તાપત્રયઘ્નમતુલં શિવદં સતાં હિ ॥ ૬૫॥

વિકૈતવો ધર્મ ઇહ પ્રગીતો
વેદાન્તવિજ્ઞાનમયઃ પ્રધાનઃ ।
અમત્સરાન્તર્બુધવેદ્યવસ્તુ
સત્ક્લૃપ્તમન્ત્રૌઘત્રિવર્ગયુક્તમ્ ॥ ૬૬॥

શૈવં પુરાણતિલકં ખલુ સત્પુરાણં
વેદાન્તવેદવિલસત્પરવસ્તુગીતમ્ ।
યો વૈ પઠેચ્ચ શ ृણુયાત્ પરમાદરેણ
શમ્ભુપ્રિયઃ સ હિ લભેત્ પરમાં ગતિં વૈ ॥ ૬૭॥

ઇતિ શ્રીશિવમહાપુરાણે પ્રથમાયાં વિદ્યેશ્વરસંહિતાયાં મુનિપ્રશ્નોત્તરવર્ણનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૧.૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
વિદ્યેશ્વરસંહિતા

## ૧.૩. તૃતીયોઽધ્યાયઃ । સાધ્યસાધનવિચારઃ ।

વ્યાસ ઉવાચ ।
ઇત્યાકર્ણ્ય વચઃ સૌતં પ્રોચુસ્તે પરમર્ષયઃ ।
વેદાન્તસારસર્વસ્વં પુરાણં શ્રાવયાદ્ભુતમ્ ॥ ૧॥

ઇતિ શ્રુત્વા મુનીનાં સ વચનં સુપ્રહર્ષિતઃ ।
સંસ્મરઞ્છઙ્કરં સૂતઃ પ્રોવાચ મુનિસત્તમાન્ ॥ ૨॥

સૂત ઉવાચ ।
શ‍ૃણ્વન્તુ ઋષયઃ સર્વે સ્મૃત્વા શિવમનામયમ્ ।
પુરાણપ્રવણં શૈવં પુરાણં વેદસારજમ્ ॥ ૩॥

યત્ર ગીતં ત્રિકં પ્રીત્યા ભક્તિજ્ઞાનવિરાગકમ્ ॥ ૪॥

વેદાન્તવેદ્યં સદ્વસ્તુ વિશેષેણ પ્રવર્ણિતમ્ ॥ ૫॥

શ‍ૃણ્વન્તુ ઋષયઃ સર્વે પુરાણં વેદસારજમ્ ।
પુરા કાલેન મહતા કલ્પેઽતીતે પુનઃ પુનઃ ॥ ૬॥

અસ્મિન્નુપસ્થિતે કલ્પે પ્રવૃત્તે સૃષ્ટિકર્મણિ ।
મુનીનાં ષટ્કુલીનાનાં બ્રુવતામિતરેતરમ્ ॥ ૭॥

ઇદં પરમિદં નેતિ વિવાદઃ સુમહાનભૂત્ ।
તેઽભિજગ્મુર્વિધાતારં બ્રહ્માણં પ્રષ્ટુમવ્યયમ્ ॥ ૮॥

વાગ્ભિર્વિનયગર્ભાભિઃ સર્વે પ્રાઞ્જલયોઽબ્રુવન્ ।
ત્વં હિ સર્વજગદ્ધાતા સર્વકારણકારણમ્ ॥ ૯॥

કઃ પુમાન્ સર્વતત્ત્વેભ્યઃ પુરાણઃ પરતઃ પરઃ ।
બ્રહ્મોવાચ ।
યતો વાચો નિવર્તન્તે અપ્રાપ્ય મનસા સહ ॥ ૧૦॥

યસ્માત્ સર્વમિદં બ્રહ્મવિષ્ણુરુદ્રેન્દ્રપૂર્વકમ્ ।
સહ ભૂતેન્દ્રિયૈઃ સર્વૈઃ પ્રથમં સમ્પ્રસૂયતે ॥ ૧૧॥

એષ દેવો મહાદેવઃ સર્વજ્ઞો જગદીશ્વરઃ ।
અયં તુ પરયા ભક્ત્યા દૃશ્યતે નાન્યથા ક્વચિત્ ॥ ૧૨॥

રુદ્રો હરિર્હરશ્ચૈવ તથાન્યે ચ સુરેશ્વરાઃ ।
ભક્ત્યા પરમયા તસ્ય નિત્યં દર્શનકાઙ્ક્ષિણઃ ॥ ૧૩॥

બહુનાત્ર કિમુક્તેન શિવે ભક્ત્યા વિમુચ્યતે ।
પ્રસાદાદ્દેવતાભક્તિઃ પ્રસાદો ભક્તિસમ્ભવઃ ।
યથેહાઙ્કુરતો બીજં બીજતો વા યથાઙ્કુરઃ ॥ ૧૪॥

તસ્માદીશપ્રસાદાર્થં યૂયં ગત્વા ભુવં દ્વિજાઃ ।
દીર્ઘસત્રં સમાકૃધ્વં યૂયં વર્ષસહસ્રકમ્ ॥ ૧૫॥

અમુષ્યૈવાધ્વરેશસ્ય શિવસ્યૈવ પ્રસાદતઃ ।
વેદોક્તવિદ્યાસારં તુ જ્ઞાયતે સાધ્યસાધનમ્ ॥ ૧૬॥

મુનયઃ ઊચુઃ ।
અથ કિં પરમં સાધ્યં કિં વા તત્સાધનં પરમ્ ।
સાધકઃ કીદૃશસ્તત્ર તદિદં બ્રૂહિ તત્ત્વતઃ ॥ ૧૭॥

બ્રહ્મોવાચ ।
સાધ્યં શિવપદપ્રાપ્તિઃ સાધનં તસ્ય સેવનમ્ ।
સાધકસ્તત્પ્રસાદાદ્યો નિત્યાદિફલનિસ્પૃહઃ ॥ ૧૮॥

કર્મ કૃત્વા તુ વેદોક્તં તદર્પિતમહાફલમ્ ।
પરમેશપદપ્રાપ્તિઃ સાલોક્યાદિક્રમાત્તતઃ ॥ ૧૯॥

તત્તદ્ભક્ત્યનુસારેણ સર્વેષાં પરમં ફલમ્ ।
તત્સાધનં બહુવિધં સાક્ષાદીશેન બોધિતમ્ ॥ ૨૦॥

સઙ્ક્ષિપ્ય તત્ર વઃ સારં સાધનં પ્રબ્રવીમ્યહમ્ ।
શ્રોત્રેણ શ્રવણં તસ્ય વચસા કીર્તનં તથા ॥ ૨૧॥

મનસા મનનં તસ્ય મહાસાધનમુચ્યતે ।
શ્રોતવ્યઃ કીર્તિતવ્યશ્ચ મન્તવ્યશ્ચ મહેશ્વરઃ ॥ ૨૨॥

ઇતિ શ્રુતિઃ પ્રમાણં નઃ સાધનેનામુના પરમ્ ।
સાધ્યં વ્રજત સર્વાર્થસાધનૈકપરાયણાઃ ॥ ૨૩॥

પ્રત્યક્ષં ચક્ષુષા દૃષ્ટ્વા તત્ર લોકઃ પ્રવર્તતે ।
અપ્રત્યક્ષં હિ સર્વત્ર જ્ઞાત્વા શ્રોત્રેણ ચેષ્ટતે ॥ ૨૪॥

તસ્માચ્છ્રવણમેવાદૌ શ્રુત્વા ગુરુમુખાદ્ બુધઃ ।
તતઃ સંસાધયેદન્યત્ કીર્તનં મનનં સુધીઃ ॥ ૨૫॥

ક્રમાન્મનનપર્યન્તે સાધનેઽસ્મિન્ સુસાધિતે ।
શિવયોગો ભવેત્તેન સાલોક્યાદિક્રમાચ્છનૈઃ ॥ ૨૬॥

સર્વાઙ્ગવ્યાધયઃ પશ્ચાત્ સર્વાનન્દશ્ચ લીયતે ।
અભ્યાસાત્ ક્લેશમેતદ્ વૈ પશ્ચાદાદ્યન્તમઙ્ગલમ્ ॥ ૨૭॥

ઇતિ શ્રીશિવમહાપુરાણે પ્રથમાયાં વિદ્યેશ્વરસંહિતાયાં સાધ્યસાધનવિચારં નામ તૃતીયોઽધ્યાયઃ ॥ ૧.૩॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

વિદ્યેશ્વરસંહિતા

## ૧.૪. ચતુર્થોઽધ્યાયઃ । શ્રવણકીર્તમનનાનાં શ્રેષ્ઠત્વમ્ ।

મુનય ઊચુઃ ।
મનનં કીદૃશં બ્રહ્મઞ્છ્રવણં ચાપિ કીદૃશમ્ ।
કીર્તનં વા કથં તસ્ય કીર્તયૈતદ્યથાયથમ્ ॥ ૧॥

બ્રહ્મોવાચ ।
પૂજાજપેશગુણરૂપવિલાસનામ્નાં
યુક્તિપ્રિયેણ મનસા પરિશોધનં યત્ ।
તત્સન્તતં મનનમીશ્વરદૃષ્ટિલભ્યં
સર્વેષુ સાધનવરેષ્વપિ મુખ્યમુખ્યમ્ ॥ ૨॥

ગીતાત્મના શ્રુતિપદેન ચ ભાષયા વા
શમ્ભુપ્રતાપગુણરૂપવિલાસનામ્નામ્ ।
વાચા સ્ફુટં તુ રસવત્ સ્તવનં યદસ્ય
તત્કીર્તનં ભવતિ સાધનમત્ર મધ્યમ્ ॥ ૩॥

યેનાપિ કેન કરણેન ચ શબ્દપુઞ્જં
યત્ર ક્વચિચ્છિવપરં શ્રવણેન્દ્રિયેણ ।
સ્ત્રીકેલિવદ્ દૃઢતરં પ્રણિધીયતે યત્
તદ્વૈ બુધાઃ શ્રવણમત્ર જગત્પ્રસિદ્ધમ્ ॥ ૪॥

સત્સઙ્ગમેન ભવતિ શ્રવણં પુરસ્તાત્
સઙ્કીર્તનં પશુપતેરથ તદ્ દૃઢં સ્યાત્ ।
સર્વોત્તમં ભવતિ તન્મનનં તદન્તે
સર્વં હિ સમ્ભવતિ શઙ્કરદૃષ્ટિપાતે ॥ ૫॥

સૂત ઉવાચ ।
અસ્મિન્ સાધનમાહાત્મ્યે પુરા વૃત્તં મુનીશ્વરાઃ ।
યુષ્મદર્થં પ્રવક્ષ્યામિ શ◌ૃણુધ્વમવધાનતઃ ॥ ૬॥

પુરા મમ ગુરુર્વ્યાસઃ પરાશરમુનેઃ સુતઃ ।
તપશ્ચચાર સમ્ભ્રાન્તઃ સરસ્વત્યાસ્તટે શુભે ॥ ૭॥

ગચ્છન્ યદૃચ્છયા તત્ર વિમાનેનાર્કરોચિષા ।
સનત્કુમારો ભગવાન્ દદર્શ મમ દેશિકમ્ ॥ ૮॥

ધ્યાનારૂઢઃ પ્રબુદ્ધોઽસૌ દદર્શ તમજાત્મજમ્ ।
પ્રણિપત્યાહ સમ્ભ્રાન્તઃ પરં કૌતૂહલં મુનિઃ ॥ ૯॥

દત્ત્વાર્ઘ્યમસ્મૈ પ્રદદૌ દેવયોગ્યં ચ વિષ્ટરમ્ ।
પ્રસન્નઃ પ્રાહ તં પ્રહ્વં પ્રભુર્ગમ્ભીરયા ગિરા ॥ ૧૦॥

સનત્કુમાર ઉવાચ
સત્યં વસ્તુ મુને દધ્યાઃ સાક્ષાત્કરણગોચરઃ ।
સ શિવોઽથ સહાયોઽત્ર તપશ્ચરસિ કિઙ્કૃતે ॥ ૧૧॥

એવમુક્તઃ કુમારેણ પ્રોવાચ સ્વાશયં મુનિઃ ।
ધર્માર્થકામમોક્ષાશ્ચ વેદમાર્ગે કૃતાદરાઃ ॥ ૧૨॥

બહુધા સ્થાપિતા લોકે મયા ત્વત્કૃપયા તથા ।
એવં ભૂતસ્ય મેઽપ્યેવં ગુરુભૂતસ્ય સર્વતઃ ॥ ૧૩॥

મુક્તિસાધનકં જ્ઞાનં નોદેતિ પરમાદ્ભુતમ્ ।
તપશ્ચરામિ મુક્ત્યર્થં ન જાને તત્ર કારણમ્ ॥ ૧૪॥

ઇત્થં કુમારો ભગવાન્ વ્યાસેન મુનિનાર્થિતઃ ।
સમર્થઃ પ્રાહ વિપ્રેન્દ્રા નિશ્ચયં મુક્તિકારણમ્ ॥ ૧૫॥

શ્રવણં કીર્તનં શમ્ભોર્મનનં ચ મહત્તરમ્ ।
ત્રયં સાધનમુક્તં ચ વિદ્યતે વેદસમ્મતમ્ ॥ ૧૬॥

પુરાહમથ સમ્ભ્રાન્તો હ્યન્યસાધનસમ્ભ્રમઃ ।
અચલે મન્દરે શૈલે તપશ્ચરણમાચરમ્ ॥ ૧૭॥

શિવાજ્ઞયા તતઃ પ્રાપ્તો ભગવાન્ નન્દિકેશ્વરઃ ।
સ મે દયાલુર્ભગવાન્ સર્વસાક્ષી ગણેશ્વરઃ ॥ ૧૮॥

ઉવાચ મહ્યં સસ્નેહં મુક્તિસાધનમુત્તમમ્ ।
શ્રવણં કીર્તનં શમ્ભોર્મનનં વેદસમ્મતમ્ ॥ ૧૯॥

ત્રિકં ચ સાધનં મુક્તેઃ શિવેન મમ ભાષિતમ્ ।

શ્રવણાદિત્રિકં બ્રહ્મન્ કુરુષ્વેતિ મુહુર્મુહુઃ ॥ ૨૦॥

એવમુક્ત્વા તતો વ્યાસં સાનુગો વિધિનન્દનઃ ।
જગામ સ્વવિમાનેન પદં પરમશોભનમ્ ॥ ૨૧॥

એવમુક્તં સમાસેન પૂર્વવૃત્તાન્તમુત્તમમ્ ।
ઋષય ઊચુઃ ।
શ્રવણાદિત્રયં સૂત મુક્ત્યુપાયસ્ત્વયેરિતઃ ॥ ૨૨॥

શ્રવણાદિત્રિકેઽશક્તઃ કિં કૃત્વા મુચ્યતે જનઃ ।
અયત્નેનૈવ મુક્તિઃ સ્યાત્ કર્મણા કેન હેતુના ॥ ૨૩॥

ઇતિ શ્રીશિવમહાપુરાણે પ્રથમાયાં વિદ્યેશ્વરસંહિતાયાં સાધ્યસાધનખણ્ડે ચતુર્થોઽધ્યાયઃ ॥ ૧.૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
વિદ્યેશ્વરસંહિતા

## ૧.૫. પઞ્ચમોઽધ્યાયઃ । શિવલ્લિઙ્ગમહિમવર્ણનમ્ ।

સૂત ઉવાચ ।
શ્રવણાદિત્રિકેઽશક્તો લિઙ્ગં વેરં ચ શાઙ્કરમ્ ।
સંસ્થાપ્ય નિત્યમભ્યર્ચ્ય તરેત્ સંસારસાગરમ્ ॥ ૧॥

અપિ દ્રવ્યં વહેદેવ યથાબલમવઞ્ચયન્ ।
અર્પયેલ્લિઙ્ગવેરાર્થમર્ચયેદપિ સન્તતમ્ ॥ ૨॥

મણ્ડપં ગોપુરં તીર્થં મઠં ક્ષેત્રં તથોત્સવમ્ ।
વસ્ત્રં ગન્ધં ચ માલ્યં ચ ધૂપં દીપં ચ ભક્તિતઃ ॥ ૩॥

વિવિધાન્નં ચ નૈવેદ્યમપૂપવ્યઞ્જનૈર્યુતમ્ ।
છત્રં ધ્વજં ચ વ્યજનં ચામરં ચાપિ સાઙ્ગકમ્ ॥ ૪॥

રાજોપચારવત્ સર્વં ધારયેલ્લિઙ્ગવેરયોઃ ।
પ્રદક્ષિણાં નમસ્કારં યથાશક્તિ જપં તથા ॥ ૫॥

આવાહનાદિ સર્ગાન્તં નિત્યં કુર્યાત્ સુભક્તિતઃ ।
ઇત્થમભ્યર્ચ્યયન્ દેવં લિઙ્ગે વેરે ચ શાઙ્કરે ॥ ૬॥

સિદ્ધિમેતિ શિવપ્રીત્યા હિત્વાપિ શ્રવણાદિકમ્ ।

લિઙ્ગવેરાર્ચનામાત્રાન્મુક્તાઃ પુર્વે મહાજનાઃ ॥ ૭॥

મુનય ઊચુઃ ।
વેરમાત્રે તુ સર્વત્ર પૂજ્યન્તે દેવતાગણાઃ ।
લિઙ્ગે વેરે ચ સર્વત્ર કથં સમ્પૂજ્યતે શિવઃ ॥ ૮॥

સૂત ઉવાચ ।
અહો મુનીશ્વરાઃ પુણ્યં પ્રશ્નમેતન્મહાદ્ભુતમ્ ।
અત્ર વક્તા મહાદેવો નાન્યોઽસ્તિ પુરુષઃ ક્વચિત્ ॥ ૯॥

શિવેનોક્તં પ્રવક્ષ્યામિ ક્રમાદ્ ગુરુમુખાચ્છ્રુતમ્ ।
શિવૈકો બ્રહ્મરૂપત્વાન્નિષ્કલઃ પરિકીર્તિતઃ ॥ ૧૦॥

રૂપિત્વાત્ સકલસ્તદ્વત્તસ્માત્ સકલનિષ્કલઃ ।
નિષ્કલત્વાન્નિરાકારં લિઙ્ગં તસ્ય સમાગતમ્ ॥ ૧૧॥

સકલત્વાત્ તથા વેરં સાકારં તસ્ય સઙ્ગતમ્ ।
સકલાકલરૂપત્વાદ્ બ્રહ્મશબ્દાભિધઃ પરઃ ॥ ૧૨॥

અપિ લિઙ્ગે ચ વેરે ચ નિત્યમભ્યર્ચ્યતે જનૈઃ ।
અબ્રહ્મત્વાત્તદન્યેષાં નિષ્કલત્વં ન હિ ક્વચિત્ ॥ ૧૩॥

તસ્માત્તે નિષ્કલે લિઙ્ગે નારાધ્યન્તે સુરેશ્વરાઃ ।
અબ્રહ્મત્વાચ્ચ જીવત્વાત્તથાન્યે દેવતાગણાઃ ॥ ૧૪॥

તૂષ્ણીં સકલમાત્રત્વાદર્ચ્યન્તે વેરમાત્રકે ।
જીવત્વં શઙ્કરાન્યેષાં બ્રહ્મત્વં શઙ્કરસ્ય ચ ॥ ૧૫॥

વેદાન્તસારસંસિદ્ધં પ્રણવાર્થે પ્રકાશનાત્ ।
એવમેવ પુરા પૃષ્ટો મન્દરે નન્દિકેશ્વરઃ ॥ ૧૬॥

સનત્કુમારમુનિના બ્રહ્મપુત્રેણ ધીમતા ।
સનત્કુમાર ઉવાચ ।
શિવાન્યદેવવશ્યાનાં સર્વેષામપિ સર્વતઃ ॥ ૧૭॥

વેરમાત્રં ચ પૂજાર્થં શ્રુતં દૃષ્ટં ચ ભૂરિશઃ ।
શિવમાત્રસ્ય પૂજાયાં લિઙ્ગં વેરં ચ દૃશ્યતે ॥ ૧૮॥

અતસ્તદ્ બ્રૂહિ કલ્યાણ તત્ત્વં મે સાધુબોધનમ્ ।
નન્દિકેશ્વર ઉવાચ ।

અનુત્તરમિમં પ્રશ્નં રહસ્યં બ્રહ્મલક્ષણમ્ ॥ ૧૯॥

કથયામિ શિવેનોક્તં ભક્તિયુક્તસ્ય તેઽનઘ ।
શિવસ્ય બ્રહ્મરૂપત્વાન્નિષ્કલત્વાચ્ચ નિષ્કલમ્ ॥ ૨૦॥

લિઙ્ગં તસ્યૈવ પૂજાયાં સર્વવેદેષુ સમ્મતમ્ ।
તસ્યૈવ સકલત્વાચ્ચ તથા સકલનિષ્કલમ્ ॥ ૨૧॥

સકલં ચ તથા વેરં પૂજાયાં લોકસમ્મતમ્ ।
શિવાન્યેષાં ચ જીવત્વાત્ સકલત્વાચ્ચ સર્વતઃ ॥ ૨૨॥

વેરમાત્રં ચ પૂજાયાં સમ્મતં વેદનિર્ણયે ।
સ્વાવિર્ભાવે ચ દેવાનાં સકલં રૂપમેવ હિ ॥ ૨૩॥

શિવસ્ય લિઙ્ગં વેરં ચ દર્શને દૃશ્યતે ખલુ ।
સનત્કુમાર ઉવાચ ।
ઉક્તં ત્વયા મહાભાગ લિઙ્ગવેરપ્રચારણમ્ ॥ ૨૪॥

શિવસ્ય ચ તદન્યેષાં વિભજ્ય પરમાર્થતઃ ।
તસ્માત્તદેવ પરમં લિઙ્ગં વેરાદિસમ્ભવમ્ ॥ ૨૫॥

શ્રોતુમિચ્છામિ યોગીન્દ્ર લિઙ્ગાવિર્ભાવલક્ષણમ્ ।
નન્દિકેશ્વર ઉવાચ ।
શ઼ૃણુ વત્સ ભવત્પ્રીત્યા વક્ષ્યામિ પરમાર્થતઃ ॥ ૨૬॥

પુરા કલ્પે મહાકાલે પ્રપન્ને લોકવિશ્રુતે ।
અયુધ્યેતાં મહાત્માનૌ બ્રહ્મવિષ્ણૂ પરસ્પરમ્ ॥ ૨૭॥

તયોર્માનં નિરાકર્તું તન્મધ્યે પરમેશ્વરઃ ।
નિષ્કલસ્તમ્ભરૂપેણ સ્વરૂપં સમદર્શયત્ ॥ ૨૮॥

તતઃ સ્વલિઙ્ગચિહ્નત્વાત્ સ્તમ્ભતો નિષ્કલં શિવઃ ।
સ્વલિઙ્ગં દર્શયામાસ જગતાં હિતકામ્યયા ॥ ૨૯॥

તદાપ્રભૃતિ લોકેષુ નિષ્કલં લિઙ્ગમૈશ્વરમ્ ।
સકલં ચ તથા વેરં શિવસ્યૈવ પ્રકલ્પિતમ્ ॥ ૩૦॥

શિવાન્યેષાં તુ દેવાનાં વેરમાત્રં પ્રકલ્પિતમ્ ।
તત્તદ્ વેરં તુ દેવાનાં તત્તદ્ભોગપ્રદં શુભમ્ ।
શિવસ્ય લિઙ્ગવેરત્વં ભોગમોક્ષપ્રદં શુભમ્ ॥ ૩૧॥

ઇતિ શ્રીશિવમહાપુરાણે પ્રથમાયાં વિદ્યેશ્વરસંહિતાયાં શિવલ્લિઙ્ગમહિમવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૧.૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
વિદ્યેશ્વરસંહિતા

## ૧.૬. ષષ્ઠોઽધ્યાયઃ । કૈલાસયાત્રાવર્ણનમ્ ।

નન્દિકેશ્વર ઉવાચ ।
પુરા કદાચિદ્યોગીન્દ્ર વિષ્ણુર્વિષધરાસનઃ ।
સુષ્વાપ પરયા ભૂત્યા સ્વાનુગૈરપિ સંવૃતઃ ॥ ૧॥

યદૃચ્છયાગતસ્તત્ર બ્રહ્મા બ્રહ્મવિદાં વરઃ ।
અપૃચ્છત્ પુણ્ડરીકાક્ષં શયાનં સર્વસુન્દરમ્ ॥ ૨॥

કસ્ત્વં પુરુષવચ્છેષે દૃષ્ટ્વા મામપિ દૃપ્તવત્ ।
ઉત્તિષ્ઠ વત્સ માં પશ્ય તવ નાથમિહાગતમ્ ॥ ૩॥

આગતં ગુરુમારાધ્યં દૃષ્ટ્વા યો દૃપ્તવચ્ચરેત્ ।
દ્રોહિણસ્તસ્ય મૂઢસ્ય પ્રાયશ્ચિત્તં વિધીયતે ॥ ૪॥

ઇતિ શ્રુત્વા વચઃ ક્રુદ્ધો બહિઃ શાન્તવદાચરન્ ।
સ્વસ્તિ તે સ્વાગતં વત્સ તિષ્ઠ પીઠમિતો વિશ ॥ ૫॥

કિમુ તે વ્યગ્રવદ્વક્ત્રં વિભાતિ વિષમેક્ષણમ્ ।
બ્રહ્મોવાચ -
વત્સ વિષ્ણો મહામાનમાગતં કાલવેગતઃ ॥ ૬॥

પિતામહશ્ચ જગતઃ પાતા ચ તવ વત્સક ।
વિષ્ણુરુવાચ -
મત્સ્થં જગદિદં વત્સ મનુષે ત્વં હિ ચોરવત્ ॥ ૭॥

મન્નાભિકમલાજ્જાતઃ પુત્રસ્ત્વં ભાષસે વૃથા ।
નન્દિકેશ્વર ઉવાચ ।
એવં હિ વદતોસ્તત્ર મુગ્ધયોરજયોસ્તદા ॥ ૮॥

અહમેવ વરો ન ત્વમહં પ્રભુરહં પ્રભુઃ ।
પરસ્પરં હન્તુકામૌ ચક્રતુઃ સમરોદ્યમમ્ ॥ ૯॥

યુયુધાતેઽમરૌ વીરૌ હંસપક્ષીન્દ્રવાહનૌ ।
વૈરઞ્ચ્યા વૈષ્ણવાશ્ચૈવં મિથો યુયુધિરે તદા ॥ ૧૦॥

તાવદ્વિમાનગતયઃ સર્વા વૈ દેવજાતયઃ ।
દિદૃક્ષવઃ સમાજગ્મુઃ સમરં તં મહાદ્ભુતમ્ ॥ ૧૧॥

ક્ષિપન્તઃ પુષ્પવર્ષાણિ પશ્યન્તઃ સ્વૈરમમ્બરે ।
સુપર્ણવાહનસ્તત્ર ક્રુદ્ધો વૈ બ્રહ્મવક્ષસિ ॥ ૧૨॥

મુમોચ બાણાનસહાનસ્ત્રાંશ્ચ વિવિધાન્ બહૂન્ ।
મુમોચાથ વિધિઃ ક્રુદ્ધો વિષ્ણોરુરસિ દુઃસહાન્ ॥ ૧૩॥

બાણાનનલસઙ્કાશાનસ્ત્રાંશ્ચ બહુશસ્તદા ।
તદાશ્ચર્યમિતિ સ્પષ્ટં તયોઃ સમરગોચરમ્ ॥ ૧૪॥

સમીક્ષ્ય દૈવતગણાઃ શશંસુર્ભૃશમાકુલાઃ ।
તતો વિષ્ણુઃ સુસઙ્ક્રુદ્ધઃ શ્વસન્ વ્યસનકર્શિતઃ ॥ ૧૫॥

માહેશ્વરાસ્ત્રં મતિમાન્ સન્દધે બ્રહ્મણોપરિ ।
તતો બ્રહ્મા ભૃશં ક્રુદ્ધઃ કમ્પયન્ વિશ્વમેવ હિ ॥ ૧૬॥

અસ્ત્રં પાશુપતં ઘોરં સન્દધે વિષ્ણુવક્ષસિ ।
તતસ્તદુત્થિતં વ્યોમ્નિ તપનાયુતસન્નિભમ્ ॥ ૧૭॥

સહસ્રમુખમત્યુગ્રં ચણ્ડવાતભયઙ્કરમ્ ।
અસ્ત્રદ્વયમિદં તત્ર બ્રહ્મવિષ્ણ્વોર્ભયઙ્કરમ્ ॥ ૧૮॥

ઇત્થં બભૂવ સમરં બ્રહ્મવિષ્ણ્વોઃ પરસ્પરમ્ ।
તતો દેવગણાઃ સર્વે વિષણ્ણા ભૃશમાકુલાઃ ।
ઊચુઃ પરસ્પરં તાત રાજક્ષોભે યથા દ્વિજાઃ ॥ ૧૯॥

સૃષ્ટિઃ સ્થિતિશ્ચ સંહારસ્તિરોભાવોઽપ્યનુગ્રહઃ ।
યસ્માત્ પ્રવર્તતે તસ્મૈ બ્રહ્મણે ચ ત્રિશૂલિને ॥ ૨૦॥

અશક્યમન્યૈર્યદનુગ્રહં વિના
તૃણક્ષયોઽપ્યત્ર યદૃચ્છયા ક્વચિત્ ॥ ૨૧॥

ઇતિ દેવા ભયં કૃત્વા વિચિન્વન્તઃ શિવક્ષયમ્ ।
જગ્મુઃ કૈલાસશિખરં યત્રાસ્તે ચન્દ્રશેખરઃ ॥ ૨૨॥

દૃષ્ટ્વૈવમમરા હૃષ્ટાઃ પદં તત્પારમેશ્વરમ્ ।

પ્રણેમુઃ પ્રણવાકારં પ્રવિષ્ટાસ્તત્ર સદ્મનિ ॥ ૨૩॥

તેઽપિ તત્ર સભામધ્યે મણ્ડપે મણિવિષ્ટરે ।
વિરાજમાનમુમયા દદૃશુર્દેવપુઙ્ગવમ્ ॥ ૨૪॥

સવ્યોત્તરેતરપદં તદર્પિતકરામ્બુજમ્ ।
સ્વગણૈઃ સર્વતો જુષ્ટં સર્વલક્ષણલક્ષિતમ્ ॥ ૨૫॥

વીજ્યમાનં વિશેષજ્ઞૈઃ સ્ત્રીજનૈસ્તીવ્રભાવનૈઃ ।
શંસ્યમાનં સદા વેદૈરનુગૃહ્ણન્તમીશ્વરમ્ ॥ ૨૬॥

દૃષ્ટ્વૈવમીશમમરાઃ સન્તોષસલિલેક્ષણાઃ ।
દણ્ડવદ્ દૂરતો વત્સ નમશ્ચક્રુર્મહાગણાઃ ॥ ૨૭॥

તાનવેક્ષ્ય પતિર્દેવાન્ સમીપે ચાહ્વયદ્ ગણૈઃ ।
અથ સંહ્લાદયન્ દેવાન્ દેવો દેવશિખામણિઃ ।
અવોચદથ ગમ્ભીરં વચનં મધુમઙ્ગલમ્ ॥ ૨૮॥

ઇતિ શ્રીશિવમહાપુરાણે પ્રથમાયાં વિદ્યેશ્વરસંહિતાયાં દેવાનાં કૈલાસયાત્રાવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૧.૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
વિદ્યેશ્વરસંહિતા

## ૧.૭. સપ્તમોઽધ્યાયઃ । સમરે શમ્ભોરનલસ્તમ્ભાવિષ્કારઃ ।

ઈશ્વર ઉવાચ ।
વત્સકાઃ સ્વસ્તિ વઃ કચ્ચિદ્વર્તતે મમ શાસનાત્ ।
જગચ્ચ દેવતાવંશઃ સ્વસ્વકર્મણિ કિં ન વા ॥ ૧॥

પ્રાગેવ વિદિતં યુદ્ધં બ્રહ્મવિષ્ણ્વોર્મયા સુરાઃ ।
ભવતામભિતાપેન પૌનરુક્ત્યેન ભાષિતમ્ ॥ ૨॥

ઇતિ સસ્મિતયા માધ્વ્યા કુમાર પરિભાષયા ।
સમતોષયદમ્બાયાઃ સ પતિસ્તત્સુરવ્રજમ્ ॥ ૩॥

અથ યુદ્ધાઙ્ગણં ગન્તું હરિધાત્રોરધીશ્વરઃ ।
આજ્ઞાપયદ્ગણેશાનાં શતં તત્રૈવ સંસદિ ॥ ૪॥

તતો વાદ્યં બહુવિધં પ્રયાણાય પરેશિતુઃ ।

ગણેશ્વરાશ્ચ સન્નદ્ધા નાનાવાહનભૂષણાઃ ॥ ૫॥

પ્રણવાકારમાદ્યન્તં પઞ્ચમણ્ડલમણ્ડિતમ્ ।
આરુરોહ રથં ભદ્રમમ્બિકાપતિરીશ્વરઃ ।
સસૂનુગણમિન્દ્રાદ્યાઃ સર્વેઽપ્યનુયયુઃ સુરાઃ ॥ ૬॥

ચિત્રધ્વજવ્યજનચામરપુષ્પવર્ષ-
સઙ્ગીતનૃત્યનિવહૈરપિ વાદ્યવર્ગૈઃ ।
સમ્માનિતઃ પશુપતિઃ પરયા ચ દેવ્યા
સાકં તયોઃ સમરભૂમિમગાત્ સસૈન્યઃ ॥ ૭॥

સમીક્ષ્ય તુ તયોર્યુદ્ધં નિગૂઢોઽભ્રં સમાસ્થિતઃ ।
સમાપ્તવાદ્યનિર્ઘોષઃ શાન્તોરુગણનિઃસ્વનઃ ॥ ૮॥

અથ બ્રહ્માચ્યુતૌ વીરૌ હન્તુકામૌ પરસ્પરમ્ ।
માહેશ્વરેણ ચાસ્ત્રેણ તથા પાશુપતેન ચ ॥ ૯॥

અસ્ત્રજ્વાલૈરથો દગ્ધં બ્રહ્મવિષ્ણ્વોર્જગત્રયમ્ ।
ઈશોઽપિ તં નિરીક્ષ્યાથ હ્યકાલપ્રલયં ભૃશમ્ ॥ ૧૦॥

મહાનલસ્તમ્ભવિભીષણાકૃતિ-
ર્બભૂવ તન્મધ્યતલે સ નિષ્કલઃ ॥ ૧૧॥

તે અસ્ત્રે ચાપિ સજ્વાલે લોકસંહરણક્ષમે ।
નિપેતતુઃ ક્ષણેનૈવ હ્યાવિર્ભૂતે મહાનલે ॥ ૧૨॥

દૃષ્ટ્વા તદદ્ભુતં ચિત્રમસ્ત્રશાન્તિકરં શુભમ્ ।
કિમેતદદ્ભુતાકારમિત્યૂચુશ્ચ પરસ્પરમ્ ॥ ૧૩॥

અતીન્દ્રિયમિદં સ્તમ્ભમગ્નિરૂપં કિમુત્થિતમ્ ।
અસ્યોર્ધ્વમપિ ચાધશ્ચ આવયોર્લક્ષ્યમેવ હિ ॥ ૧૪॥

ઇતિ વ્યવસ્થિતૌ વીરૌ મિલિતૌ વીરમાનિનૌ ।
તત્પરૌ તત્પરીક્ષાર્થં પ્રતસ્થાતેઽથ સત્વરમ્ ॥ ૧૫॥

આવયોર્મિશ્રયોસ્તત્ર કાર્યમેકં ન સમ્ભવેત્ ।
ઇત્યુક્ત્વા સૂકરતનુર્વિષ્ણુસ્તસ્યાદિમીયિવાન્ ॥ ૧૬॥

તથા બ્રહ્મા હંસતનુસ્તદન્તં વીક્ષિતું યયૌ ।
ભિત્ત્વા પાતાલનિલયં ગત્વા દૂરતરં હરિઃ ॥ ૧૭॥

નાપશ્યત્તસ્ય સંસ્થાનં સ્તમ્ભસ્યાનલવર્ચસઃ ।
શ્રાન્તઃ સ સૂકરહરિઃ પ્રાપ પૂર્વં રણાઙ્ગણમ્ ॥ ૧૮॥

અથ ગચ્છંસ્તુ વ્યોમ્ના ચ વિધિસ્તાત પિતા તવ ।
દદર્શ કેતકીપુષ્પં કિઞ્ચિદ્વિચ્યુતમદ્ભુતમ્ ॥ ૧૯॥

અતિસૌરભ્યમમ્લાનં બહુવર્ષચ્યુતં તથા ।
અન્વીક્ષ્ય ચ તયોઃ કૃત્યં ભગવાન્ પરમેશ્વરઃ ॥ ૨૦॥

પરિહાસં તુ કૃતવાન્કમ્પનાચ્ચલિતં શિરઃ ।
તસ્માત્તાવનુગૃહ્ણાતું ચ્યુતં કેતકમુત્તમમ્ ॥ ૨૧॥

કિં ત્વં પતસિ પુષ્પેશ પુષ્પરાટ્ કેન વૈ ધૃતઃ ।
આદિમસ્યાપ્રમેયસ્ય સ્તમ્ભમધ્યાચ્ચ્યુતશ્ચિરમ્ ॥ ૨૨॥

ન સમ્પશ્યામિ તસ્માત્ત્વં જહ્યાશામન્તદર્શને ।
અસ્યાન્તસ્ય ચ સેવાર્થં હંસમૂર્તિરિહાગતઃ ॥ ૨૩॥

ઇતઃ પરં સખે મેઽદ્ય ત્વયા કર્તવ્યમીપ્સિતમ્ ।
મયા સહ ત્વયા વાચ્યમેતદ્વિષ્ણોશ્ચ સન્નિધૌ ॥ ૨૪॥

સ્તમ્ભાન્તો વીક્ષિતો ધાત્રા તત્ર સાક્ષ્યહમચ્યુત ।
ઇત્યુક્ત્વા કેતકં તત્ર પ્રણનામ પુનઃ પુનઃ ।
અસત્યમપિ શસ્તં સ્યાદાપદીત્યનુશાસનમ્ ॥ ૨૫॥

સમીક્ષ્ય તત્રાચ્યુતમાયતશ્રમં
પ્રનષ્ટહર્ષં તુ નનર્ત હર્ષાત્ ।
ઉવાચ ચૈનં પરમાર્થમચ્યુતં
ષણ્ઢાત્તવાદઃ સ વિધિસ્તતોઽચ્યુતમ્ ॥ ૨૬॥

સ્તમ્ભાગ્રમેતત્ સમુદીક્ષિતં હરે
તત્રૈવ સાક્ષી નનુ કેતકં ત્વિદમ્ ।
તતોઽવદત્તત્ર હિ કેતકં મૃષા
તથેતિ તદ્ધાતૃવચસ્તદન્તિકે ॥ ૨૭॥

હરિશ્ચ તત્સત્યમિતીવ ચિન્તયં-
શ્ચકાર તસ્મૈ વિધયે નમઃ સ્વયમ્ ।
ષોડશૈરુપચારૈશ્ચ પૂજયામાસ તં વિધિમ્ ॥ ૨૮॥

વિધિં પ્રહર્તું શઠમગ્નલિઙ્ગતઃ
સ ઈશ્વરસ્તત્ર બભૂવ સાકૃતિઃ ।
સમુત્થિતઃ સ્વામિવિલોકનાત્ પુનઃ
પ્રકમ્પપાણિઃ પરિગૃહ્ય તત્પદમ્ ॥ ૨૯॥

આદ્યન્તહીનવપુષિ ત્વયિ મોહબુદ્ધ્યા
ભૂયાન્ વિમર્શ ઇહ નાવતિ કામનોત્થઃ ।
સ ત્વં પ્રસીદ કરુણાકર કશ્મલં નૌ
મૃષ્ટ ક્ષમસ્વ વિહિતં ભવતૈવ કેલ્યા ॥ ૩૦॥

ઈશ્વર ઉવાચ ।
વત્સ પ્રસન્નોઽસ્મિ હરે યતસ્ત્વ-
મીશત્વમિચ્છન્નપિ સત્યવાક્યમ્ ।
બ્રૂયાસ્તતસ્તે ભવિતા જનેષુ
સામ્યં મયા સત્કૃતિરપ્યલપ્સિ ॥ ૩૧॥

ઇતઃ પરં તે પૃથગાત્મનશ્ચ
ક્ષેત્રપ્રતિષ્ઠોત્સવપૂજનં ચ ॥ ૩૨॥

ઇતિ દેવઃ પુરા પ્રીતઃ સત્યેન હરયે પરમ્ ।
દદૌ સ્વસામ્યમત્યર્થં દેવસઙ્ઘે ચ પશ્યતિ ॥ ૩૩॥

ઇતિ શ્રીશિવમહાપુરાણે પ્રથમાયાં વિદ્યેશ્વરસંહિતાયામનલસ્તમ્ભાવિષ્કારવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૧.૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
વિદ્યેશ્વરસંહિતા

## ૧.૮. અષ્ટમોઽધ્યાયઃ । બ્રહ્મોપરિ શિવસ્યાનુગ્રહઃ ।

નન્દિકેશ્વર ઉવાચ ।
સસર્જાથ મહાદેવઃ પુરુષં કઞ્ચિદદ્ભુતમ્ ।
ભૈરવાખ્યં ભ્રુવોર્મધ્યાદ્ બ્રહ્મદર્પજિઘાંસયા ॥ ૧॥

સ વૈ તદા તત્ર પતિં પ્રણમ્ય શિવમઙ્ગણે ।
કિં કાર્યં કરવાણ્યત્ર શીઘ્રમાજ્ઞાપય પ્રભો ॥ ૨॥

શિવ ઉવાચ ।

વત્સ યોઽયં વિધિઃ સાક્ષાજ્જગતામાદ્યદૈવતમ્ ।
નૂનમર્ચય ખડ્ગેન તિગ્મેન જવસા પરમ્ ॥ ૩॥

સ વૈ ગૃહીત્વૈકકરેણ કેશં
તત્પઞ્ચમં દૃપ્તમસત્યભાષિણમ્ ।
છિત્ત્વા શિરો હ્યસ્ય નિહન્તુમુદ્યતઃ
પ્રકમ્પયન્ ખડ્ગમતિસ્ફુટં કરૈઃ ॥ ૪॥

પિતા તવોત્સૃષ્ટવિભૂષણામ્બર-
સ્રગુત્તરીયામલકેશસંહતિઃ ।
પ્રવાતરમ્ભેવ લતેવ ચઞ્ચલઃ
પપાત વૈ ભૈરવપાદપઙ્કજે ॥ ૫॥

તાવદ્વિધિં તાત દિદૃક્ષુરચ્યુતઃ
કૃપાલુરસ્મત્પતિપાદપલ્લવમ્ ।
નિષિચ્ય બાષ્પૈરવદત્ કૃતાઞ્જલિ-
ર્યથા શિશુઃ સ્વં પિતરં કલાક્ષરમ્ ॥ ૬॥

અચ્યુત ઉવાચ ।
ત્વયા પ્રયત્નેન પુરા હિ દત્તં
યદસ્ય પઞ્ચાનનમીશ ચિહ્નમ્ ।
તસ્માત્ ક્ષમસ્વાદ્યમનુગ્રહાર્હં
કુરુ પ્રસાદં વિધયે હ્યમુષ્મૈ ॥ ૭॥

ઇત્યર્થિતોઽચ્યુતેનેશસ્તુષ્ટઃ સુરગણાઙ્ગણે ।
નિવર્તયામાસ તદા ભૈરવં બ્રહ્મદણ્ડતઃ ॥ ૮॥

અથાહ દેવઃ કિતવં વિધિં વિગતકન્ધરમ્ ।
બ્રહ્મંસ્ત્વમર્હણાકાઙ્ક્ષી શઠેશત્વં સમાસ્થિતઃ ॥ ૯॥

નાતસ્તે સત્કૃતિર્લોકે ભૂયાત્ સ્થાનોત્સવાદિકમ્ ।
બ્રહ્મોવાચ -
સ્વામિન્ પ્રસીદાદ્ય મહાવિભૂતે
મન્યે વરં મે શિરસઃ પ્રમોક્ષમ્ ॥ ૧૦॥

નમસ્તુભ્યં ભગવતે બન્ધવે વિશ્વયોનયે ।
સહિષ્ણવે ચ દોષાણાં શમ્ભવે શૈલધન્વને ॥ ૧૧॥

ઈશ્વર ઉવાચ ।
અરાજભયમેતદ્ધૈ જગત્ સર્વં નશિષ્યતિ ।
તતસ્ત્વં જહિ દણ્ડાર્હં વહ લોકધુરં શિશો ॥ ૧૨॥

વરં દદામિ તે તત્ર ગૃહાણ દુર્લભં પરમ્ ।
વૈતાનિકેષુ ગૃહ્યેષુ યજ્ઞેષુ ચ ભવાન્ ગુરુઃ ॥ ૧૩॥

નિષ્ફલસ્ત્વદૃતે યજ્ઞઃ સાઙ્ગશ્ચ સહદક્ષિણઃ ।
અથાહ દેવઃ કિતવં કેતકં કૂટસાક્ષિણમ્ ॥ ૧૪॥

રે રે કેતક દુષ્ટસ્ત્વં શઠ દૂરમિતો વ્રજ ।
મમાપિ પ્રેમ તે પુષ્પે માભૂત્પૂજાસ્વિતઃ પરમ્ ॥ ૧૫॥

ઇત્યુક્તે તત્ર દેવેન કેતકં દેવજાતયઃ ।
સર્વા નિવારયામાસુસ્તત્પાર્શ્વાદન્યતસ્તદા ॥ ૧૬॥

કેતક ઉવાચ ।
નમસ્તે નાથ મે જન્મ નિષ્ફલં ભવદાજ્ઞયા ।
સફલં ક્રિયતાં તાત ક્ષમ્યતાં મમ કિલ્બિષમ્ ॥ ૧૭॥

જ્ઞાનાજ્ઞાનકૃતં પાપં નાશયત્યેવ તે સ્મૃતિઃ ।
તાદૃશે ત્વયિ દૃષ્ટે મે મિથ્યાદોષઃ કુતો ભવેત્ ॥ ૧૮॥

તથા સ્તુતસ્તુ ભગવાન્ કેતકેન સભાસ્થલે ।
ન મે ત્વદ્ધારણં યોગ્યં સત્યવાગહમીશ્વરઃ ॥ ૧૯॥

મદીયાસ્ત્વાં ધરિષ્યન્તિ જન્મ તે સફલં તતઃ ।
ત્વં વૈ વિતાનવ્યાજેન મમોપરિ ભવિષ્યસિ ॥ ૨૦॥

ઇત્યનુગૃહ્ય ભગવાન્ કેતકં વિધિમાધવૌ ।
વિરરાજ સભામધ્યે સર્વદેવૈરભિષ્ટુતઃ ॥ ૨૧॥

ઇતિ શ્રીશિવમહાપુરાણે પ્રથમાયાં વિદ્યેશ્વરસંહિતાયાં શિવાનુગ્રહવર્ણનં નામાષ્ટમોઽધ્યાયઃ ॥ ૧.૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
વિદ્યેશ્વરસંહિતા

## ૧.૯. નવમોઽધ્યાયઃ । શિવસ્યાત્મનો મહેશ્વરાભિધાનમ્ ।

નન્દિકેશ્વર ઉવાચ ।
તત્રાન્તરે તૌ ચ નાથં પ્રણમ્ય વિધિમાધવૌ ।
બદ્ધાઞ્જલિપુટૌ તૂષ્ણીં તસ્થતુર્દક્ષવામગૌ ॥ ૧॥

તત્ર સંસ્થાપ્ય તૌ દેવં સકુટુમ્બં વરાસને ।
પૂજયામાસતુઃ પૂજ્યં પુણ્યૈઃ પુરુષવસ્તુભિઃ ॥ ૨॥

પૌરુષં પ્રાકૃતં વસ્તુ જ્ઞેયં દીર્ઘાલ્પકાલિકમ્ ।
હારનૂપુરકેયૂરકિરીટમણિકુણ્ડલૈઃ ॥ ૩॥

યજ્ઞસૂત્રોત્તરીયસ્રક્ક્ષૌમમાલ્યાઙ્ગુલીયકૈઃ ।
પુષ્પતામ્બૂલકર્પૂરચન્દનાગુરુલેપનૈઃ ॥ ૪॥

ધૂપદીપસિતચ્છત્રવ્યજનધ્વજચામરૈઃ ।
અન્યૈર્દિવ્યોપહારૈશ્ચ વાઙ્મનોતીતવૈભવૈઃ ॥ ૫॥

પતિયોગ્યૈઃ પશ્વલભ્યૈસ્તૌ સમાર્ચયતાં પતિમ્ ।
યદ્યચ્છ્રેષ્ઠતમં વસ્તુ પતિયોગ્યં હિતધ્વજ ॥ ૬॥

તદ્વસ્ત્વખિલમીશોઽપિ પારમ્પર્યચિકીર્ષયા ।
સભ્યાનાં પ્રદદૌ હૃષ્ટઃ પૃથક્ તત્ર યથાક્રમમ્ ॥ ૭॥

કોલાહલો મહાનાસીત્તત્ર તદ્વસ્તુ ગૃહ્યતામ્ ।
તત્રૈવ બ્રહ્મવિષ્ણુભ્યાં ચાર્ચિતઃ શઙ્કરઃ પુરા ॥ ૮॥

પ્રસન્નઃ પ્રાહ તૌ નમ્રૌ સસ્મિતં ભક્તિવર્ધનઃ ।
ઈશ્વર ઉવાચ ।
તુષ્ટોઽહમદ્ય વાં વત્સૌ પૂજયાસ્મિન્ મહાદિને ॥ ૯॥

દિનમેતત્તતઃ પુણ્યં ભવિષ્યતિ મહત્તરમ્ ।
શિવરાત્રિરિતિ ખ્યાતા તિથિરેષા મમ પ્રિયા ॥ ૧૦॥

એતત્કાલે તુ યઃ કુર્યાત્ પૂજાં મલ્લિઙ્ગવેરયોઃ ।
કુર્યાત્ સ જગતઃ કૃત્યં સ્થિતિસર્ગાદિકં પુમાન્ ॥ ૧૧॥

શિવરાત્રાવહોરાત્રં નિરાહારો જિતેન્દ્રિયઃ ।
અર્ચયેદ્વા યથાન્યાયં યથાબલમવઞ્ચકઃ ॥ ૧૨॥

યત્ફલં મમ પૂજાયાં વર્ષમેકં નિરન્તરમ્ ।

તત્ફલં લભતે સદ્યઃ શિવરાત્રૌ મદર્ચનાત્ ॥ ૧૩॥

મદ્ધર્મવૃદ્ધિકાલોઽયં ચન્દ્રકાલ ઇવામ્બુધેઃ ।
પ્રતિષ્ઠાદ્યુત્સવો યત્ર મામકો મઙ્ગલાયનઃ ॥ ૧૪॥

યત્પુનઃ સ્તમ્ભરૂપેણ સ્વાવિરાસમહં પુરા ।
સ કાલો માર્ગશીર્ષે તુ સ્યાદાર્દ્રાઋક્ષમર્ભકૌ ॥ ૧૫॥

આર્દ્રાયાં માર્ગશીર્ષે તુ યઃ પશ્યેન્મામુમાસખમ્ ।
મદ્બેરમપિ વા લિઙ્ગં સ ગુહાદપિ મે પ્રિયઃ ॥ ૧૬॥

અલં દર્શનમાત્રેણ ફલં તસ્મિન્ દિને શુભે ।
અભ્યર્ચનં ચેદધિકં ફલં વાચામગોચરમ્ ॥ ૧૭॥

રણરઙ્ગતલેઽમુષ્મિન્ યદહં લિઙ્ગવર્ષ્મણા ।
જૃમ્ભિતો લિઙ્ગવત્તસ્માલ્લિઙ્ગસ્થાનમિદં ભવેત્ ॥ ૧૮॥

અનાદ્યન્તમિદં સ્તમ્ભમણુમાત્રં ભવિષ્યતિ ।
દર્શનાર્થં હિ જગતાં પૂજનાર્થં હિ પુત્રકૌ ॥ ૧૯॥

ભોગાવહમિદં લિઙ્ગં ભુક્તિમુક્ત્યેકસાધનમ્ ।
દર્શનસ્પર્શનધ્યાનાજ્જન્તૂનાં જન્મમોચનમ્ ॥ ૨૦॥

અનલાચલસઙ્કાશં યદિદં લિઙ્ગમુત્થિતમ્ ।
અરુણાચલમિત્યેવ તદિદં ખ્યાતિમેષ્યતિ ॥ ૨૧॥

અત્ર તીર્થં ચ બહુધા ભવિષ્યતિ મહત્તરમ્ ।
મુક્તિરપ્યત્ર જન્તૂનાં વાસેન મરણેન ચ ॥ ૨૨॥

રથોત્સવાદિકલ્યાણં જનાવાસં તુ સર્વતઃ ।
અત્ર દત્તં હુતં જપ્તં સર્વં કોટિગુણં ભવેત્ ॥ ૨૩॥

મત્ક્ષેત્રાદપિ સર્વસ્માત્ ક્ષેત્રમેતન્મહત્તરમ્ ।
અત્ર સંસ્મૃતિમાત્રેણ મુક્તિર્ભવતિ દેહિનામ્ ॥ ૨૪॥

તસ્માન્મહત્તરમિદં ક્ષેત્રમત્યન્તશોભનમ્ ।
સર્વકલ્યાણસમ્પૂર્ણં સર્વમુક્તિકરં શુભમ્ ॥ ૨૫॥

અર્ચયિત્વાત્ર મામેવ લિઙ્ગે લિઙ્ગિનમીશ્વરમ્ ।
સાલોક્યં ચૈવ સામીપ્યં સારૂપ્યં સાર્ષ્ટિરેવ ચ ॥ ૨૬॥

સાયુજ્યમિતિ પઞ્ચૈતે ક્રિયાદીનાં ફલં મતમ્ ।
સર્વેઽપિ યૂયં સકલં પ્રાપ્સ્યથાશુ મનોરથમ્ ॥ ૨૭॥

નન્દિકેશ્વર ઉવાચ ।
ઇત્યનુગૃહ્ય ભગવાન્ વિનીતૌ વિધિમાધવૌ ।
યત્પૂર્વં પ્રહતં યુદ્ધે તયોઃ સૈન્યં પરસ્પરમ્ ॥ ૨૮॥

તદુત્થાપયદત્યર્થં સ્વશક્ત્યામૃતધારયા ।
તયોર્મૌઢ્યં ચ વૈરં ચ વ્યપનેતુમુવાચ તૌ ॥ ૨૯॥

સકલં નિષ્કલં ચેતિ સ્વરૂપદ્વયમસ્તિ મે ।
નાન્યસ્ય કસ્યચિત્તસ્માદન્યઃ સર્વોઽપ્યનીશ્વરઃ ॥ ૩૦॥

પુરસ્તાત્ સ્તમ્ભરૂપેણ પશ્ચાદ્ રૂપેણ ચાર્ભકૌ ।
બ્રહ્મત્વં નિષ્કલં પ્રોક્તમીશત્વં સકલં તથા ॥ ૩૧॥

દ્વયં મમૈવ સંસિદ્ધં ન મદન્યસ્ય કસ્યચિત્ ।
તસ્માદીશત્વમન્યેષાં યુવયોરપિ ન ક્વચિત્ ॥ ૩૨॥

તદજ્ઞાનેન વાં વૃત્તમીશમાનં મહાદ્ભુતમ્ ।
તન્નિરાકર્તુમત્રૈવમુત્થિતોઽહં રણક્ષિતૌ ॥ ૩૩॥

ત્યજતં માનમાત્મીયં મયીશે કુરુતં મતિમ્ ।
મત્પ્રસાદેન લોકેષુ સર્વોઽપ્યર્થઃ પ્રકાશતે ॥ ૩૪॥

ગુરૂક્તિર્વ્યઞ્જકં તત્ર પ્રમાણં વા પુનઃ પુનઃ ।
બ્રહ્મતત્ત્વમિદં ગૂઢં ભવત્પ્રીત્યા ભણામ્યહમ્ ॥ ૩૫॥

અહમેવ પરં બ્રહ્મ મત્સ્વરૂપં કલાકલમ્ ।
બ્રહ્મત્વાદીશ્વરશ્ચાહં કૃત્યં મેઽનુગ્રહાદિકમ્ ॥ ૩૬॥

બૃહત્ત્વાદ્ બૃંહણત્વાચ્ચ બ્રહ્માહં બ્રહ્મકેશવૌ ।
સમત્વાદ્વ્યાપકત્વાચ્ચ તથૈવાત્માહમર્ભકૌ ॥ ૩૭॥

અનાત્માનઃ પરે સર્વે જીવા એવ ન સંશયઃ ।
અનુગ્રહાદ્યં સર્ગાન્તં જગત્કૃત્યં ચ પઞ્ચકમ્ ॥ ૩૮॥

ઈશત્વાદેવ મે નિત્યં ન મદન્યસ્ય કસ્યચિત્ ।
આદૌ બ્રહ્મત્વબુદ્ધ્યર્થં નિષ્કલં લિઙ્ગમુત્થિતમ્ ॥ ૩૯॥

તસ્માદજ્ઞાતમીશત્વં વ્યક્તં દ્યોતયિતું હિ વામ્ ।

સકલોઽહમતો જાતઃ સાક્ષાદીશસ્તુ તત્ક્ષણાત્ ॥ ૪૦॥

સકલત્વમતો જ્ઞેયમીશત્વં મયિ સત્વરમ્ ।
યદિદં નિષ્કલં સ્તમ્ભં મમ બ્રહ્મત્વબોધકમ્ ॥ ૪૧॥

લિઙ્ગલક્ષણયુક્તત્વાન્મમ લિઙ્ગં ભવેદિદમ્ ।
તદિદં નિત્યમભ્યર્ચ્યં યુવાભ્યામત્ર પુત્રકૌ ॥ ૪૨॥

મદાત્મકમિદં નિત્યં મમ સાન્નિધ્યકારણમ્ ।
મહત્પૂજ્યમિદં નિત્યમભેદાલ્લિઙ્ગલિઙ્ગિનોઃ ॥ ૪૩॥

યત્ર પ્રતિષ્ઠિતં યેન મદીયં લિઙ્ગમીદૃશમ્ ।
તત્ર પ્રતિષ્ઠિતઃ સોઽહમપ્રતિષ્ઠોઽપિ વત્સકૌ ॥ ૪૪॥

મત્સામ્યમેકલિઙ્ગસ્ય સ્થાપને ફલમીરિતમ્ ।
દ્વિતીયે સ્થાપિતે લિઙ્ગે મદૈક્યં ફલમેવ હિ ॥ ૪૫॥

લિઙ્ગં પ્રાધાન્યતઃ સ્થાપ્યં તથા વેરં તુ ગૌણકમ્ ।
લિઙ્ગાભાવે ન તત્ક્ષેત્રં સવેરમપિ સર્વતઃ ॥ ૪૬॥

ઇતિ શ્રીશિવમહાપુરાણે પ્રથમાયાં વિદ્યેશ્વરસંહિતાયાં શિવસ્ય મહેશ્વરાભિધાનવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૧.૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
વિદ્યેશ્વરસંહિતા

## ૧.૧૦. દશમોઽધ્યાયઃ । બ્રહ્મવિષ્ણુભ્યાં પઞ્ચકૃત્યમોઙ્કારમન્ત્રં ચોપદિશ્ય શિવસ્યાન્તર્ધાનમ્ ।

બ્રહ્મવિષ્ણૂ ઊચતુઃ
સર્ગાદિપઞ્ચકૃત્યસ્ય લક્ષણં બ્રૂહિ નૌ પ્રભો ।
શિવ ઉવાચ ।
મત્કૃત્યબોધનં ગુહ્યં કૃપયા પ્રબ્રવીમિ વામ્ ॥ ૧॥

સૃષ્ટિઃ સ્થિતિશ્ચ સંહારસ્તિરોભાવોઽપ્યનુગ્રહઃ ।
પઞ્ચૈવ મે જગત્કૃત્યં નિત્યસિદ્ધમજાચ્યુતૌ ॥ ૨॥

સર્ગઃ સંસારસંરમ્ભસ્તત્પ્રતિષ્ઠા સ્થિતિર્મતા ।
સંહારો મર્દનં તસ્ય તિરોભાવસ્તદુત્ક્રમઃ ॥ ૩॥

તન્મોક્ષોઽનુગ્રહસ્તન્મે કૃત્યમેવં હિ પઞ્ચકમ્ ।
કૃત્યમેતદ્વહત્યન્યસ્તૂષ્ણીં ગોપુરબિમ્બવત્ ॥ ૪॥

સર્ગાદિ યચ્ચતુઃકૃત્યં સંસારપરિજૃમ્ભણમ્ ।
પઞ્ચમં મુક્તિહેતુર્વૈ નિત્યં મયિ ચ સુસ્થિરમ્ ॥ ૫॥

તદિદં પઞ્ચભૂતેષુ દૃશ્યતે મામકૈર્જનૈઃ ।
સૃષ્ટિર્ભૂમૌ સ્થિતિસ્તોયે સંહારઃ પાવકે તથા ॥ ૬॥

તિરોભાવોઽનિલે તદ્વદનુગ્રહ ઇહામ્બરે ।
સૃજ્યતે ધરયા સર્વમદ્ભિઃ સર્વં પ્રવર્ધતે ॥ ૭॥

અર્દ્યતે તેજસા સર્વં વાયુના ચાપનીયતે ।
વ્યોમ્નાનુગૃહ્યતે સર્વં જ્ઞેયમેવં હિ સૂરિભિઃ ॥ ૮॥

પઞ્ચકૃત્યમિદં વોઢું મમાસ્તિ મુખપઞ્ચકમ્ ।
ચતુર્દિક્ષુ ચતુર્વક્ત્રં તન્મધ્યે પઞ્ચમં મુખમ્ ॥ ૯॥

યુવાભ્યાં તપસા લબ્ધમેતત્કૃત્યદ્વયં સુતૌ ।
સૃષ્ટિસ્થિત્યભિધં ભાગ્યં મત્તઃ પ્રીતાદતિપ્રિયમ્ ॥ ૧૦॥

તથા રુદ્રમહેશાભ્યામન્યત્કૃત્યદ્વયં પરમ્ ।
અનુગ્રહાખ્યં કેનાપિ લબ્ધું નૈવ હિ શક્યતે ॥ ૧૧॥

તત્સર્વં પૌર્વિકં કર્મ યુવાભ્યાં કાલવિસ્મૃતમ્ ।
ન તદ્ રુદ્રમહેશાભ્યાં વિસ્મૃતં કર્મ તાદૃશમ્ ॥ ૧૨॥

રૂપે વેષે ચ કૃત્યે ચ વાહને ચાસને તથા ।
આયુધાદૌ ચ મત્સામ્યમસ્માભિસ્તત્કૃતે કૃતમ્ ॥ ૧૩॥

મદ્ધ્યાનવિરહાદ્વત્સૌ મૌઢ્યં વામેવમાગતમ્ ।
મજ્જ્ઞાને સતિ મૈવં સ્યાન્માનં રૂપં મહેશવત્ ॥ ૧૪॥

તસ્માન્મજ્જ્ઞાનસિદ્ધ્યર્થં મન્ત્રમોઙ્કારનામકમ્ ।
ઇતઃ પરં પ્રજપતં મામકં માનભઞ્જનમ્ ॥ ૧૫॥

ઉપાદિશં નિજં મન્ત્રમોઙ્કારમુરુમઙ્ગલમ્ ।
ઓँકારો મન્મુખાજ્જજ્ઞે પ્રથમં મત્પ્રબોધકઃ ॥ ૧૬॥

વાચકોઽયમહં વાચ્યો મન્ત્રોઽયં હિ મદાત્મકઃ ।
તદનુસ્મરણં નિત્યં મમાનુસ્મરણં ભવેત્ ॥ ૧૭॥

અકાર ઉત્તરાત્ પૂર્વમુકારઃ પશ્ચિમાનનાત્ ।
મકારો દક્ષિણમુખાદ્ બિન્દુઃ પ્રાઙ્મુખતસ્તથા ॥ ૧૮॥

નાદો મધ્યમુખાદેવં પઞ્ચધાસૌ વિજૃમ્ભિતઃ ।
એકીભૂતઃ પુનસ્તદ્વદોમિત્યેકાક્ષરોઽભવત્ ॥ ૧૯॥

નામરૂપાત્મકં સર્વં વેદભૂતકુલદ્વયમ્ ।
વ્યાપ્તમેતેન મન્ત્રેણ શિવશક્ત્યોશ્ચ બોધકઃ ॥ ૨૦॥

અસ્માત્ પઞ્ચાક્ષરં જજ્ઞે બોધકં સકલસ્ય તત્ ।
અકારાદિક્રમેણૈવ નકારાદિ યથાક્રમમ્ ॥ ૨૧॥

અસ્માત્ પઞ્ચાક્ષરાજ્જાતા માતૃકાઃ પઞ્ચભેદતઃ ।
તસ્માચ્છિરશ્ચતુર્વક્ત્રાત્ત્રિપાદ્ગાયત્રિરેવ હિ ॥ ૨૨॥

વેદઃ સર્વસ્તતો જજ્ઞે તતો વૈ મન્ત્રકોટયઃ ।
તત્તન્મન્ત્રેણ તત્સિદ્ધિઃ સર્વસિદ્ધિરિતો ભવેત્ ॥ ૨૩॥

અનેન મન્ત્રકન્દેન ભોગો મોક્ષશ્ચ સિદ્ધ્યતિ ।
સકલા મન્ત્રરાજાનઃ સાક્ષાદ્ભોગપ્રદાઃ શુભાઃ ॥ ૨૪॥

નન્દિકેશ્વર ઉવાચ ।
પુનસ્તયોસ્તત્ર તિરઃ પટં ગુરુઃ
પ્રકલ્પ્ય મન્ત્રં ચ સમાદિશત્ પરમ્ ।
નિધાય તચ્છીર્ષ્ણિ કરામ્બુજં શનૈ-
રુદઙ્મુખં સંસ્થિતયોઃ સહામ્બિકઃ ॥ ૨૫॥

ત્રિરુચ્ચાર્યાગ્રહીન્મન્ત્રં યન્ત્રતન્ત્રોક્તિપૂર્વકમ્ ।
શિષ્યૌ ચ તૌ દક્ષિણાયામાત્માનં ચ સમાર્પયત્ ॥ ૨૬॥

પ્રબદ્ધહસ્તૌ કિલ તૌ તદન્તિકે
તમૂચતુર્દેવવરં જગદ્ગુરુમ્ ॥ ૨૭॥

બ્રહ્માચ્યુતાવૂચતુઃ
નમો નિષ્કલરૂપાય નમો નિષ્કલતેજસે ।
નમઃ સકલનાથાય નમસ્તે સકલાત્મને ॥ ૨૮॥

નમઃ પ્રણવવાચ્યાય નમઃ પ્રણવલિઙ્ગિને ।

નમઃ સૃષ્ટ્યાદિકર્ત્રે ચ નમઃ પઞ્ચમુખાય તે ॥ ૨૯॥

પઞ્ચબ્રહ્મસ્વરૂપાય પઞ્ચકૃત્યાય તે નમઃ ।
આત્મને બ્રહ્મણે તુભ્યમનન્તગુણશક્તયે ॥ ૩૦॥

સકલાકલરૂપાય શમ્ભવે ગુરવે નમઃ ।
ઇતિ સ્તુત્વા ગુરું પદ્યૈર્બ્રહ્મા વિષ્ણુશ્ચ નેમતુઃ ॥ ૩૧॥

ઈશ્વર ઉવાચ ।
વત્સકૌ સર્વતત્ત્વં ચ કથિતં દર્શિતં ચ વામ્ ।
જપતં પ્રણવં મન્ત્રં દેવીદિષ્ટં મદાત્મકમ્ ॥ ૩૨॥

જ્ઞાનં ચ સુસ્થિરં ભાગ્યં સર્વં ભવતિ શાશ્વતમ્ ।
આર્દ્રાયાં ચ ચતુર્દશ્યાં તજ્જપ્યં ત્વક્ષયં ભવેત્ ॥ ૩૩॥

સૂર્યગત્યા મહાર્દ્રાયામેકં કોટિગુણં ભવેત્ ।
મૃગશીર્ષાન્તિમો ભાગઃ પુનર્વસ્વાદિમસ્તથા ॥ ૩૪॥

આર્દ્રાસમં સદા જ્ઞેયં પૂજાહોમાદિતર્પણે ।
દર્શનં તુ પ્રભાતે ચ પ્રાતઃસઙ્ગવકાલયોઃ ॥ ૩૫॥

ચતુર્દશી તથા ગ્રાહ્યા નિશીથવ્યાપિની ભવેત્ ।
પ્રદોષવ્યાપિની ચૈવ પરયુક્તા પ્રશસ્યતે ॥ ૩૬॥

લિઙ્ગં વેરં ચ મે તુલ્યં યજતાં લિઙ્ગમુત્તમમ્ ।
તસ્માલ્લિઙ્ગં પરં પૂજ્યં વેરાદપિ મુમુક્ષુભિઃ ॥ ૩૭॥

લિઙ્ગમોઙ્કારમન્ત્રેણ વેરં પઞ્ચાક્ષરેણ તુ ।
સ્વયમેવ હિ સદ્દ્રવ્યૈઃ પ્રતિષ્ઠાપ્યં પરૈરપિ ॥ ૩૮॥

પૂજયેદુપચારૈશ્ચ મત્પદં સુલભં ભવેત્ ।
ઇતિ શાસ્ય તથા શિષ્યૌ તત્રૈવાન્તર્હિતઃ શિવઃ ॥ ૩૯॥

ઇતિ શ્રીશિવમહાપુરાણે પ્રથમાયાં વિદ્યેશ્વરસંહિતાયામોઙ્કારોપદેશવર્ણનં નામ દશમોઽધ્યાયઃ ॥ ૧.૧૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
વિદ્યેશ્વરસંહિતા

## ૧.૧૧. એકાદશોઽધ્યાયઃ । શિવલિઙ્ગપૂજનદાનપ્રકારાઃ ।

ઋષય ઊચુઃ
કથં લિઙ્ગં પ્રતિષ્ઠાપ્યં કથં વા તસ્ય લક્ષણમ્ ।
કથં વા તત્સમભ્યર્ચ્ય દેશે કાલે ચ કેન હિ ॥ ૧॥

સૂત ઉવાચ ।
યુષ્મદર્થં પ્રવક્ષ્યામિ બુદ્ધ્યતામવધાનતઃ ।
અનુકૂલે શુભે કાલે પુણ્યે તીર્થે તટે તથા ॥ ૨॥

યથેષ્ટં લિઙ્ગમારોપ્યં યત્ર સ્યાન્નિત્યમર્ચનમ્ ।
પાર્થિવેન તથાપ્યેન તૈજસેન યથારુચિ ॥ ૩॥

કલ્પલક્ષણસંયુક્તં લિઙ્ગં પૂજાફલં લભેત્ ।
સર્વલક્ષણસંયુક્તં સદ્યઃ પૂજાફલપ્રદમ્ ॥ ૪॥

ચરે વિશિષ્યતે સૂક્ષ્મં સ્થાવરે સ્થૂલમેવ હિ ।
સલક્ષણં સપીઠં ચ સ્થાપયેચ્છિવનિર્મિતમ્ ॥ ૫॥

મણ્ડલં ચતુરસ્રં વા ત્રિકોણમથવા તથા ।
ખટ્વાઙ્ગવન્મધ્યસૂક્ષ્મં લિઙ્ગપીઠં મહાફલમ્ ॥ ૬॥

પ્રથમં મૃચ્છિલાદિભ્યો લિઙ્ગં લોહાદિભિઃ કૃતમ્ ।
યેન લિઙ્ગં તેન પીઠં સ્થાવરે હિ વિશિષ્યતે ॥ ૭॥

લિઙ્ગં પીઠં ચરે ત્વેકં લિઙ્ગં બાણકૃતં વિના ।
લિઙ્ગપ્રમાણં કર્તૃણાં દ્વાદશાઙ્ગુલમુત્તમમ્ ॥ ૮॥

ન્યૂનં ચેત્ફલમલ્પં સ્યાદધિકં નૈવ દુષ્યતે ।
કર્તુરેકાઙ્ગુલન્યૂનં ચરેઽપિ ચ તથૈવ હિ ॥ ૯॥

આદૌ વિમાનં શિલ્પેન કાર્યં દેવગણૈર્યુતમ્ ।
તત્ર ગર્ભગૃહે રમ્યે દૃઢે દર્પણસન્નિભે ॥ ૧૦॥

ભૂષિતે નવરત્નૈશ્ચ દિગ્દ્વારે ચ પ્રધાનકે ।
નીલં રક્તં ચ વૈડૂર્યં શ્યામં મારકતં તથા ॥ ૧૧॥

મુક્તાપ્રવાલગોમેદવજ્રાણિ નવરત્નકમ્ ।
મધ્યે લિઙ્ગં મહદ્ દ્રવ્યં નિઃક્ષિપેત્સહવૈદિકે ॥ ૧૨॥

સમ્પૂજ્ય લિઙ્ગં સદ્યાદ્યૈઃ પઞ્ચસ્થાને યથાક્રમમ્ ।

અગ્નૌ ચ હુત્વા બહુધા હવિષા સકુલં ચ મામ્ ॥ ૧૩॥

અભ્યર્ચ્ય ગુરુમાચાર્યમર્થૈઃ કામૈશ્ચ બાન્ધવમ્ ।
દદ્યાદૈશ્વર્યમર્થિભ્યો જડમપ્યજડં તથા ॥ ૧૪॥

સ્થાવરં જઙ્ગમં જીવં સર્વં સન્તોષ્ય યત્નતઃ ।
સુવર્ણપૂરિતે શ્વભ્રે નવરત્નૈશ્ચ પૂરિતે ॥ ૧૫॥

સદ્યાદિ બ્રહ્મ ચોચ્ચાર્ય ધ્યાત્વા દેવં પરં શુભમ્ ।
ઉદીર્ય ચ મહામન્ત્રમોઙ્કારં નાદઘોષિતમ્ ॥ ૧૬॥

લિઙ્ગં તત્ર પ્રતિષ્ઠાપ્ય લિઙ્ગં પીઠેન યોજયેત્ ।
લિઙ્ગં સપીઠં નિક્ષિપ્ય નિત્યલેપેન બન્ધયેત્ ॥ ૧૭॥

એવં વેરં ચ સંસ્થાપ્યં તત્રૈવ પરમં શુભમ્ ।
પઞ્ચાક્ષરેણ વેરં તુ ઉત્સવાર્થં બહિસ્તથા ॥ ૧૮॥

વેરં ગુરુભ્યો ગૃહ્ણીયાત્સાધુભિઃ પૂજિતં તુ વા ।
એવં લિઙ્ગે ચ વેરે ચ પૂજા શિવપદપ્રદા ॥ ૧૯॥

પુનશ્ચ દ્વિવિધં પ્રોક્તં સ્થાવરં જઙ્ગમં તથા ।
સ્થાવરં લિઙ્ગમિત્યાહુસ્તરુગુલ્માદિકં તથા ॥ ૨૦॥

જઙ્ગમં લિઙ્ગમિત્યાહુઃ કૃમિકીટાદિકં તથા ।
સ્થાવરસ્ય ચ શુશ્રૂષા જઙ્ગમસ્ય ચ તર્પણમ્ ॥ ૨૧॥

તત્તત્સુખાનુરાગેણ શિવપૂજાં વિદુર્બુધાઃ ।
પીઠમમ્બામયં સર્વં શિવલિઙ્ગં ચ ચિન્મયમ્ ॥ ૨૨॥

યથા દેવીમુમામઙ્કે ધૃત્વા તિષ્ઠતિ શઙ્કરઃ ।
તથા લિઙ્ગમિદં પીઠં ધૃત્વા તિષ્ઠતિ સન્તતમ્ ॥ ૨૩॥

એવં સ્થાપ્ય મહાલિઙ્ગં પૂજયેદુપચારકૈઃ ।
નિત્યપૂજા યથાશક્તિ ધ્વજાદિકરણં તથા ॥ ૨૪॥

ઇતિ સંસ્થાપયેલ્લિઙ્ગં સાક્ષાચ્છિવપદપ્રદમ્ ।
અથવા ચરલિઙ્ગં તુ ષોડશૈરુપચારકૈઃ ॥ ૨૫॥

પૂજયેચ્ચ યથાન્યાયં ક્રમાચ્છિવપદપ્રદમ્ ।
આવાહનં ચાસનં ચ અર્ઘ્યં પાદ્યં તથૈવ ચ ॥ ૨૬॥

તદઙ્ગાચમનં ચૈવ સ્નાનમભ્યઙ્ગપૂર્વકમ્ ।
વસ્ત્રં ગન્ધં તથા પુષ્પં ધૂપં દીપં નિવેદનમ્ ॥ ૨૭॥

નીરાજનં ચ તામ્બૂલં નમસ્કારો વિસર્જનમ્ ।
અથવાર્ઘ્યાદિકં કૃત્વા નૈવેદ્યાન્તં યથાવિધિ ॥ ૨૮॥

અથાભિષેકં નૈવેદ્યં નમસ્કારં ચ તર્પણમ્ ।
યથાશક્તિ સદા કુર્યાત્ક્રમાચ્છિવપદપ્રદમ્ ॥ ૨૯॥

અથવા માનુષે લિઙ્ગેઽપ્યાર્ષે દૈવે સ્વયમ્ભુવિ ।
સ્થાપિતેઽપૂર્વકે લિઙ્ગે સોપચારં યથા તથા ॥ ૩૦॥

પૂજોપકરણે દત્તે યત્કિઞ્ચિત્ફલમશ્નુતે ।
પ્રદક્ષિણાનમસ્કારૈઃ ક્રમાચ્છિવપદપ્રદમ્ ॥ ૩૧॥

લિઙ્ગદર્શનમાત્રં વા નિયમેન શિવપ્રદમ્ ।
મૃત્પિષ્ટગોશકૃત્પુષ્પૈઃ કરવીરેણ વા ફલૈઃ ॥ ૩૨॥

ગુડેન નવનીતેન ભસ્મનાન્નૈર્યથારુચિ ।
લિઙ્ગં યત્નેન કૃત્વાન્તે યજેત્તદનુસારતઃ ॥ ૩૩॥

અઙ્ગુષ્ઠાદાવપિ તથા પૂજામિચ્છન્તિ કેચન ।
લિઙ્ગકર્મણિ સર્વત્ર નિષેધોઽસ્તિ ન કર્હિચિત્ ॥ ૩૪॥

સર્વત્ર ફલદાતા હિ પ્રયાસાનુગુણં શિવઃ ।
અથવા લિઙ્ગદાનં વા લિઙ્ગમૌલ્યમથાપિ વા ॥ ૩૫॥

શ્રદ્ધયા શિવભક્તાય દત્તં શિવપદપ્રદમ્ ।
અથવા પ્રણવં નિત્યં જપેદ્દશસહસ્રકમ્ ॥ ૩૬॥

સન્ધ્યયોશ્ચ સહસ્રં વા જ્ઞેયં શિવપદપ્રદમ્ ।
જપકાલે મકારાન્તં મનઃશુદ્ધિકરં ભવેત્ ॥ ૩૭॥

સમાધૌ માનસં પ્રોક્તમુપાંશુસાર્વકાલિકમ્ ।
સમાનપ્રણવં ચેમં બિન્દુનાદયુતં વિદુઃ ॥ ૩૮॥

અથ પઞ્ચાક્ષરં નિત્યં જપેદયુતમાદરાત્ ।
સન્ધ્યયોશ્ચ સહસ્રં વા જ્ઞેયં શિવપદપ્રદમ્ ॥ ૩૯॥

પ્રણવેનાદિસંયુક્તં બ્રાહ્મણાનાં વિશિષ્યતે ।
દીક્ષાયુક્તં ગુરોર્ગ્રાહ્યં મન્ત્રં હ્યથ ફલાપ્તયે ॥ ૪૦॥

કુમ્ભસ્નાનં મન્ત્રદીક્ષાં માતૃકાન્યાસમેવ ચ ।
બ્રાહ્મણઃ સત્યપૂતાત્મા ગુરુર્જ્ઞાની વિશિષ્યતે ॥ ૪૧॥

દ્વિજાનાં ચ નમઃ પૂર્વમન્યેષાં ચ નમોન્તકમ્ ।
સ્ત્રીણાં ચ કેચિદિચ્છન્તિ નમોઽન્તં ચ યથાવિધિ ॥ ૪૨॥

વિપ્રસ્ત્રીણાં નમઃ પૂર્વમિદમિચ્છન્તિ કેચન ।
પઞ્ચકોટિજપં કૃત્વા સદાશિવસમો ભવેત્ ॥ ૪૩॥

એકદ્વિત્રિચતુઃ કોટ્યા બ્રહ્માદીનાં પદં વ્રજેત્ ।
જપેદક્ષરલક્ષં વા અક્ષરાણાં પૃથક્પૃથક્ ॥ ૪૪॥

અથવાક્ષરલક્ષં વા જ્ઞેયં શિવપદપ્રદમ્ ।
સહસ્રં તુ સહસ્રાણાં સહસ્રેણ દિનેન હિ ॥ ૪૫॥

જપેન્મન્ત્રાદિષ્ટસિદ્ધિર્નિત્યં બ્રાહ્મણભોજનાત્ ।
અષ્ટોત્તરસહસ્રં વૈ ગાયત્રીં પ્રાતરેવ હિ ॥ ૪૬॥

બ્રાહ્મણસ્તુ જપેન્નિત્યં ક્રમાચ્છિવપદપ્રદામ્ ।
વેદમન્ત્રાંશ્ચ સૂક્તાનિ જપેન્નિયમમાસ્થિતઃ ॥ ૪૭॥

એકં દશાર્ણમન્ત્રં ચ શતોનં ચ તદૂર્ધ્વકમ્ ।
અયુતં ચ સહસ્રં ચ શતમેકં વિના ભવેત્ ॥ ૪૮॥

વેદપારાયણં ચૈવ જ્ઞેયં શિવપદપ્રદમ્ ।
અન્યાન્બહુતરાન્મન્ત્રાઞ્જપેદક્ષરલક્ષતઃ ॥ ૪૯॥

એકાક્ષરાંસ્તથા મન્ત્રાઞ્જપેદક્ષરકોટિતઃ ।
તતઃ પરં જપેચ્ચૈવ સહસ્રં ભક્તિપૂર્વકમ્ ॥ ૫૦॥

એવં કુર્યાદ્યથાશક્તિ ક્રમાચ્છિવપદં લભેત્ ।
નિત્યં રુચિકરં ત્વેકં મન્ત્રમામરણાન્તિકમ્ ॥ ૫૧॥

સહસ્રમોમિતિ જપેત્સર્વાભીષ્ટં શિવાજ્ઞયા ।
પુષ્પારામાદિકં વાપિ તથા સમ્માર્જનાદિકમ્ ॥ ૫૨॥

શિવાય શિવકાર્યાર્થે કૃત્વા શિવપદં લભેત્ ।
શિવક્ષેત્રે તથા વાસં નિત્યં કુર્યાચ્ચ ભક્તિતઃ ॥ ૫૩॥

જડાનામજડાનાં ચ સર્વેષાં ભુક્તિમુક્તિદમ્ ।

તસ્માદ્વાસં શિવક્ષેત્રે કુર્યાદામરણં બુધઃ ॥ ૫૪॥

લિઙ્ગાદ્ધસ્તશતં પુણ્યં ક્ષેત્રે માનુષકે વિદુઃ ।
સહસ્રારત્નિમાત્રં તુ પુણ્યં ક્ષેત્રે તથાર્ષકે ॥ ૫૫॥

દૈવલિઙ્ગે તથા જ્ઞેયં સહસ્રારત્નિમાનતઃ ।
ધનુઃપ્રમાણસાહસ્રં પુણ્યં ક્ષેત્રે સ્વયમ્ભુવિ ॥ ૫૬॥

પુણ્યક્ષેત્રે સ્થિતા વાપી કૂપાદ્યં પુષ્કરાણિ ચ ।
શિવગઙ્ગેતિ વિજ્ઞેયં શિવસ્ય વચનં યથા ॥ ૫૭॥

તત્ર સ્નાત્વા તથા દત્ત્વા જપિત્વા હિ શિવં વ્રજેત્ ।
શિવક્ષેત્રં સમાશ્રિત્ય વસેદામરણં તથા ॥ ૫૮॥

દ્વાહં દશાહં માસ્યં વા સપિણ્ડીકરણં તુ વા ।
આબ્દિકં વા શિવક્ષેત્રે ક્ષેત્રે પિણ્ડમથાપિ વા ॥ ૫૯॥

સર્વપાપવિનિર્મુક્તઃ સદ્યઃ શિવપદં લભેત્ ।
અથવા સપ્તરાત્રં વા વસેદ્વા પઞ્ચરાત્રકમ્ ॥ ૬૦॥

ત્રિરાત્રમેકરાત્રં વા ક્રમાચ્છિવપદં લભેત્ ।
સ્વવર્ણાનુગુણં લોકે સ્વાચારાત્પ્રાપ્નુતે નરઃ ॥ ૬૧॥

વર્ણોદ્ધારેણ ભક્ત્યા ચ તત્ફલાતિશયં નરઃ ।
સર્વં કૃતં કામનયા સદ્યઃ ફલમવાપ્નુયાત્ ॥ ૬૨॥

સર્વં કૃતમકામેન સાક્ષાચ્છિવપદપ્રદમ્ ।
પ્રાતર્મધ્યાહ્નસાયાહ્નમહસ્ત્રિષ્વેકતઃ ક્રમાત્ ॥ ૬૩॥

પ્રાતર્વિધિકરં જ્ઞેયં મધ્યાહ્ને કામિકં તથા ।
સાયાહ્ને શાન્તિકં જ્ઞેયં રાત્રાવપિ તથૈવ હિ ॥ ૬૪॥

કાલો નિશીથો વૈ પ્રોક્તો મધ્યયામદ્વયં નિશિ ।
શિવપૂજા વિશેષેણ તત્કાલેઽભીષ્ટસિદ્ધિદા ॥ ૬૫॥

એવં જ્ઞાત્વા નરઃ કુર્વન્યથોક્તફલભાગ્ભવેત્ ।
કલૌ યુગે વિશેષેણ ફલસિદ્ધિસ્તુ કર્મણા ॥ ૬૬॥

ઉક્તેન કેનચિદ્વાપિ હ્યધિકારવિભેદતઃ ।
સદ્વૃત્તિઃ પાપભીરુશ્ચેત્તત્તત્ફલમવાપ્નુયાત્ ॥ ૬૭॥

ઋષય ઊચુઃ ।
અથ ક્ષેત્રાણિ પુણ્યાનિ સમાસાત્કથયસ્વ નઃ ।
સર્વાઃ સ્ત્રિયશ્ચ પુરુષા યાન્યાશ્રિત્ય પદં લભેત્ ॥ ૬૮॥

સૂત યોગિવરશ્રેષ્ઠ શિવક્ષેત્રાગમાંસ્તથા ।
સૂત ઉવાચ ।
શ‍ૃણુત શ્રદ્ધયા સર્વક્ષેત્રાણિ ચ તદાગમાન્ ॥ ૬૯॥

ઇતિ શ્રીશિવમહાપુરાણે પ્રથમાયાં વિદ્યેશ્વરસંહિતાયાં શિવલિઙ્ગપૂજાદિવર્ણનં નામ એકાદશોઽધ્યાયઃ ॥ ૧.૧૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
વિદ્યેશ્વરસંહિતા

## ૧.૧૨. દ્વાદશોઽધ્યાયઃ । શિવક્ષેત્રવર્ણનમ્ ।

સૂત ઉવાચ ।
શ‍ૃણુધ્વમૃષયઃ પ્રાજ્ઞાઃ શિવક્ષેત્રં વિમુક્તિદમ્ ।
તદાગમાંસ્તતો વક્ષ્યે લોકરક્ષાર્થમેવ હિ ॥ ૧॥

પઞ્ચાશત્કોટિવિસ્તીર્ણા સશૈલવનકાનના ।
શિવાજ્ઞયા હિ પૃથિવી લોકં ધૃત્વા ચ તિષ્ઠતિ ॥ ૨॥

તત્ર તત્ર શિવક્ષેત્રં તત્ર તત્ર નિવાસિનામ્ ।
મોક્ષાર્થં કૃપયા દેવઃ ક્ષેત્રં કલ્પિતવાન્પ્રભુઃ ॥ ૩॥

પરિગ્રહાદ્ ઋષીણાં ચ દેવાનાં ચ પરિગ્રહાત્ ।
સ્વયમ્ભૂતાન્યથાન્યાનિ લોકરક્ષાર્થમેવ હિ ॥ ૪॥

તીર્થે ક્ષેત્રે સદા કાર્યં સ્નાનદાનજપાદિકમ્ ।
અન્યથા રોગદારિદ્ર્યમૂકત્વાદ્યાપ્નુયાન્નરઃ ॥ ૫॥

અથાસ્મિન્ભારતે વર્ષે પ્રાપ્નોતિ મરણં નરઃ ।
સ્વયમ્ભૂસ્થાનવાસેન પુનર્માનુષ્યમાપ્નુયાત્ ॥ ૬॥

ક્ષેત્રે પાપસ્ય કરણં દૃઢં ભવતિ ભૂસુરાઃ ।
પુણ્યક્ષેત્રે નિવાસે હિ પાપમણ્વપિ નાચરેત્ ॥ ૭॥

યેન કેનાપ્યુપાયેન પુણ્યક્ષેત્રે વસેન્નરઃ ।

સિન્ધોઃ શતનદીતીરે સન્તિ ક્ષેત્રાણ્યનેકશઃ ॥ ૮॥

સરસ્વતી નદી પુણ્યા પ્રોક્તા ષષ્ટિમુખા તથા ।
તત્તત્તીરે વસેત્પ્રાજ્ઞઃ ક્રમાદ્ બ્રહ્મપદં લભેત્ ॥ ૯॥

હિમવદ્ગિરિજા ગઙ્ગા પુણ્યા શતમુખા નદી ।
તત્તીરે ચૈવ કાશ્યાદિપુણ્યક્ષેત્રાણ્યનેકશઃ ॥ ૧૦॥

તત્ર તીરં પ્રશસ્તં હિ મૃગે મૃગબૃહસ્પતૌ ।
શોણભદ્રો દશમુખઃ પુણ્યોઽભીષ્ટફલપ્રદઃ ॥ ૧૧॥

તત્ર સ્નાનોપવાસેન પદં વૈનાયકં લભેત્ ।
ચતુર્વીંશમુખા પુણ્યા નર્મદા ચ મહાનદી ॥ ૧૨॥

તસ્યાં સ્નાનેન વાસેન પદં વૈષ્ણવમાપ્નુયાત્ ।
તમસા દ્વાદશમુખા રેવા દશમુખા નદી ॥ ૧૩॥

ગોદાવરી મહાપુણ્યા બ્રહ્મગોવધનાશિની ।
એકવિંશમુખા પ્રોક્તા રુદ્રલોકપ્રદાયિની ॥ ૧૪॥

કૃષ્ણ વેણી પુણ્યનદી સર્વપાપક્ષયાવહા ।
સાષ્ટાદશમુખા પ્રોક્તા વિષ્ણુલોકપ્રદાયિની ॥ ૧૫॥

તુઙ્ગભદ્રા દશમુખા બ્રહ્મલોકપ્રદાયિની ।
સુવર્ણમુખરી પુણ્યા પ્રોક્તા નવમુખા તથા ॥ ૧૬॥

તત્રૈવ સુપ્રજાયન્તે બ્રહ્મલોકચ્યુતાસ્તથા ।
સરસ્વતી ચ પમ્પા ચ કન્યા શ્વેતનદી શુભા ॥ ૧૭॥

એતાસાં તીરવાસેન ઇન્દ્રલોકમવાપ્નુયાત્ ।
સહ્યાદ્રિજા મહાપુણ્યા કાવેરીતિ મહાનદી ॥ ૧૮॥

સપ્તવિંશમુખા પ્રોક્તા સર્વાભીષ્ટપ્રદાયિની ।
તત્તીરાઃ સ્વર્ગદાશ્ચૈવ બ્રહ્મવિષ્ણુપદપ્રદાઃ ॥ ૧૯॥

શિવલોકપ્રદાઃ શૈવાસ્તથાભીષ્ટફલપ્રદાઃ ।
નૈમિષે બદરે સ્નાયાન્મેષગે ચ ગુરૌ રવૌ ॥ ૨૦॥

બ્રહ્મલોકપ્રદં વિદ્યાત્તતઃ પૂજાદિકં તથા ।
સિન્ધુનદ્યાં તથા સ્નાનં સિંહે કર્કટગે રવૌ ॥ ૨૧॥

કેદારોદકપાનં ચ સ્નાનં ચ જ્ઞાનદં વિદુઃ ।
ગોદાવર્યાં સિંહમાસે સ્નાયાત્સિંહબૃહસ્પતૌ ॥ ૨૨॥

શિવલોકપ્રદમિતિ શિવેનોક્તં તથા પુરા ।
યમુનાશોણયોઃ સ્નાયાદ્ ગુરૌ કન્યાગતે રવૌ ॥ ૨૩॥

ધર્મલોકે દન્તિલોકે મહાભોગપ્રદં વિદુઃ ।
કાવેર્યાં ચ તથા સ્નાયાત્તુલાગે તુ રવૌ ગુરૌ ॥ ૨૪॥

વિષ્ણોર્વચનમાહાત્મ્યાત્સર્વાભીષ્ટપ્રદં વિદુઃ ।
વૃશ્ચિકે માસિ સમ્પ્રાપ્તે તથાર્કે ગુરુવૃશ્ચિકે ॥ ૨૫॥

નર્મદાયાં નદીસ્નાનાદ્વિષ્ણુલોકમવાપ્નુયાત્ ।
સુવર્ણમુખરીસ્નાનાં ચાપગે ચ ગુરૌ રવૌ ॥ ૨૬॥

શિવલોકપ્રદમિતિ બ્રાહ્મણો વચનં યથા ।
મૃગમાસિ તથા સ્નાયાજ્જાહ્નવ્યાં મૃગગે ગુરૌ ॥ ૨૭॥

શિવલોકપ્રદમિતિ બ્રહ્મણો વચનં યથા ।
બ્રહ્મવિષ્ણ્વોઃ પદે ભુક્ત્વા તદન્તે જ્ઞાનમાપ્નુયાત્ ॥ ૨૮॥

ગઙ્ગાયાં માઘમાસે તુ તથા કુમ્ભગતે રવૌ ।
શ્રાદ્ધં વા પિણ્ડદાનં વા તિલોદકમથાપિ વા ॥ ૨૯॥

વંશદ્વયપિતૄણાં ચ કુલકોટ્યુદ્ધરં વિદુઃ ।
કૃષ્ણવેણ્યાં પ્રશંસન્તિ મીનગે ચ ગુરૌ રવૌ ॥ ૩૦॥

તત્તત્તીર્થે ચ તન્માસિ સ્નાનમિન્દ્રપદપ્રદમ્ ।
ગઙ્ગાં વા સહ્યજાં વાપિ સમાશ્રિત્ય વસેદ્ બુધઃ ॥ ૩૧॥

તત્કાલકૃતપાપસ્ય ક્ષયો ભવતિ નિશ્ચિતમ્ ।
રુદ્રલોકપ્રદાન્યેવ સન્તિ ક્ષેત્રાણ્યનેકશઃ ॥ ૩૨॥

તામ્રપર્ણી વેગવતી બ્રહ્મલોકફલપ્રદે ।
તયોસ્તીરે હિ સન્ત્યેવ ક્ષેત્રાણિ સ્વર્ગદાનિ ચ ॥ ૩૩॥

સન્તિ ક્ષેત્રાણિ તન્મધ્યે પુણ્યદાનિ ચ ભૂરિશઃ ।
તત્ર તત્ર વસન્પ્રાજ્ઞસ્તાદૃશં ચ ફલં લભેત્ ॥ ૩૪॥

સદાચારેણ સદ્વૃત્ત્યા સદા ભાવનયાપિ ચ ।
વસેદ્દયાલુઃ પ્રાજ્ઞો વૈ નાન્યથા તત્ફલં લભેત્ ॥ ૩૫॥

પુણ્યક્ષેત્રે કૃતં પુણ્યં બહુધા ઋદ્ધિમૃચ્છતિ ।
પુણ્યક્ષેત્રે કૃતં પાપં મહદણ્વાપિ જાયતે ॥ ૩૬॥

તત્કાલં જીવનાર્થશ્ચેત્પુણ્યેન ક્ષયમેષ્યતિ ।
પુણ્યમૈશ્વર્યદં પ્રાહુઃ કાયિકં વાચિકં તથા ॥ ૩૭॥

માનસં ચ તથા પાપં તાદૃશં નાશયેદ્ દ્વિજાઃ ।
માનસં વજ્રલેપં તુ કલ્પકલ્પાનુગં તથા ॥ ૩૮॥

ધ્યાનાદેવ હિ તન્નશ્યેન્નાન્યથા નાશમૃચ્છતિ ।
વાચિકં જપજાલેન કાયિકં કાયશોષણાત્ ॥ ૩૯॥

દાનાદ્ધનકૃતં નશ્યેન્નાન્યથા કલ્પકોટિભિઃ ।
ક્વચિત્પાપેન પુણ્યં ચ વૃદ્ધિપૂર્વેણ નશ્યતિ ॥ ૪૦॥

બીજાંશશ્ચૈવ વૃદ્ધ્યંશો ભોગાંશઃ પુણ્યપાપયોઃ ।
જ્ઞાનનાશ્યો હિ બીજાંશો વૃદ્ધિરુક્તપ્રકારતઃ ॥ ૪૧॥

ભોગાંશો ભોગનાશ્યસ્તુ નાન્યથા પુણ્યકોટિભિઃ ।
બીજપ્રરોહે નષ્ટે તુ શેષો ભોગાય કલ્પતે ॥ ૪૨॥

દેવાનાં પૂજયા ચૈવ બ્રહ્મણાનાં ચ દાનતઃ ।
તપોધિક્યાચ્ચ કાલેન ભોગઃ સહ્યો ભવેન્નૃણામ્ ।
તસ્માત્પાપમકૃત્વૈવ વસ્તવ્યં સુખમિચ્છતા ॥ ૪૩॥

ઇતિ શ્રીશિવમહાપુરાણે પ્રથમાયાં વિદ્યેશ્વરસંહિતાયાં શિવક્ષેત્રવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૧.૧૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
વિદ્યેશ્વરસંહિતા

## ૧.૧૩. ત્રયોદશોઽધ્યાયઃ । સદાચારવર્ણનમ્ ।

ઋષય ઊચુઃ ।
સદાચારં શ્રાવયાશુ યેન લોકાઞ્જયેદ્ બુધઃ ।
ધર્માધર્મમયાન્બ્રૂહિ સ્વર્ગનારકદાંસ્તથા ॥ ૧॥

સૂત ઉવાચ ।

સદાચારયુતો વિદ્વાન્ બ્રાહ્મણો નામ નામતઃ ।
વેદાચારયુતો વિપ્રો હ્યેતૈરેકૈકવાન્દ્વિજઃ ॥ ૨॥

અલ્પાચારોઽલ્પવેદશ્ચ ક્ષત્રિયો રાજસેવકઃ ।
કિઞ્ચિદાચારવાન્વૈશ્યઃ કૃષિવાણિજ્યકૃત્તથા ॥ ૩॥

શૂદ્રબ્રાહ્મણ ઇત્યુક્તઃ સ્વયમેવ હિ કર્ષકઃ ।
અસૂયાલુઃ પરદ્રોહી ચણ્ડાલદ્વિજ ઉચ્યતે ॥ ૪॥

પૃથિવીપાલકો રાજા ઇતરે ક્ષત્રિયા મતાઃ ।
ધાન્યાદિક્રયવાન્વૈશ્ય ઇતરો વણિગુચ્યતે ॥ ૫॥

બ્રહ્મક્ષત્રિયવૈશ્યાનાં શુશ્રૂષુઃ શૂદ્ર ઉચ્યતે ।
કર્ષકો વૃષલો જ્ઞેય ઇતરે ચૈવ દસ્યવઃ ॥ ૬॥

સર્વો હ્યુષઃ પ્રાઙ્મુખશ્ચ ચિન્તયેદ્ દેવપૂર્વકાન્ ।
ધર્માનર્થાંશ્ચ તત્ક્લેશાનાયં ચ વ્યયમેવ ચ ॥ ૭॥

આયુર્દ્વેષશ્ચ મરણં પાપં ભાગ્યં તથૈવ ચ ।
વ્યાધિઃ પુષ્ટિસ્તથા શક્તિઃ પ્રાતરુત્થાનદિક્ફલમ્ ॥ ૮॥

નિશાન્ત્યયામોષા જ્ઞેયા યામાર્ધં સન્ધિરુચ્યતે ।
તત્કાલે તુ સમુત્થાય વિણ્મૂત્રે વિસૃજેદ્ દ્વિજઃ ॥ ૯॥

ગૃહાદ્ દૂરં તતો ગત્વા બાહ્યતઃ પ્રાવૃતસ્તથા ।
ઉદઙ્મુખઃ સમાવિશ્ય પ્રતિબન્ધેઽન્યદિઙ્મુખઃ ॥ ૧૦॥

જલાગ્નિબ્રાહ્મણાદીનાં દેવાનાં નાભિમુખ્યતઃ ।
લિઙ્ગં પિધાય વામેન મુખમન્યેન પાણિના ॥ ૧૧॥

મલમુત્સૃજ્ય ચોત્થાય ન પશ્યેચ્ચૈવ તન્મલમ્ ।
ઉદ્ધૃતેન જલેનૈવ શૌચં કુર્યાજ્જલાદ્ બહિઃ ॥ ૧૨॥

અથવા દેવપિત્રર્ષિતીર્થાવતરણં વિના ।
સપ્ત વા પઞ્ચ વા ત્રીન્વા ગુદં સંશોધયેન્મૃદા ॥ ૧૩॥

લિઙ્ગે કર્કોટમાત્રં તુ ગુદે પ્રસૃતિરિષ્યતે ।
તત ઉત્થાય પદ્ધસ્તશૌચં ગણ્ડૂષમષ્ટકમ્ ॥ ૧૪॥

યેન કેન ચ પત્રેણ કાષ્ઠેન ચ જલાદ્ બહિઃ ।
કાર્યં સન્તર્જનીં ત્યજ્ય દન્તધાવનમીરિતમ્ ॥ ૧૫॥

જલદેવાન્નમસ્કૃત્ય મન્ત્રેણ સ્નાનમાચરેત્ ।
અશક્તઃ કણ્ઠદઘ્નં વા કટિદઘ્નમથાપિ વા ॥ ૧૬॥

આજાનુજલમાવિશ્ય મન્ત્રસ્થાનં સમાચરેત્ ।
દેવાદીંસ્તર્પયેદ્વિદ્વાંસ્તત્ર તીર્થજલેન ચ ॥ ૧૭॥

ધૌતવસ્ત્રં સમાદાય પઞ્ચકચ્છેન ધારયેત્ ।
ઉત્તરીયં ચ કિઞ્ચૈવ ધાર્યં સર્વેષુ કર્મસુ ॥ ૧૮॥

નદ્યાદિતીર્થસ્નને તુ સ્નાનવસ્ત્રં ન શોધયેત્ ।
વાપીકૂપગૃહાદૌ તુ સ્નાનાદૂર્ધ્વં નયેદ્બુધઃ ॥ ૧૯॥

શિલાદાર્વાદિકે વાપિ જલે વાપિ સ્થલેઽપિ વા ।
સંશોધ્ય પીડયેદ્વસ્ત્રં પિતૄણાં તૃપ્તયે દ્વિજાઃ ॥ ૨૦॥

જાબાલકોક્તમન્ત્રેણ ભસ્મના ચ ત્રિપુણ્ડ્રકમ્ ।
અન્યથા ચેજ્જલે પાતસ્તતો નરકમૃચ્છતિ ॥ ૨૧॥

આપોહિષ્ઠેતિ શિરસિ પ્રોક્ષયેત્પાપશાન્તયે ।
યસ્યેતિ મન્ત્રં પાદે તુ સન્ધિપ્રોક્ષણમુચ્યતે ॥ ૨૨॥

હૃદયે મૂર્ધ્નિ પાદે ચ મૂર્ધ્નિ હૃત્પાદ એવ ચ ।
હૃત્પાદમૂર્ધ્નિ સમ્પ્રોક્ષ્ય મન્ત્રસ્નાનં વિદુર્બુધાઃ ॥ ૨૩॥

ઈષત્સ્પર્શે ચ દોઃસ્વાસ્થ્યે રાજરાષ્ટ્રભયેઽપિ ચ ।
અગત્યા ગતિકાલે ચ મન્ત્રસ્નાનં સમાચરેત્ ॥ ૨૪॥

પ્રાતઃ સૂર્યાનુવાકેન સાયમગ્ન્યનુવાકતઃ ।
અપઃ પીત્વા તથા મધ્યે પુનઃ પ્રોક્ષણમાચરેત્ ॥ ૨૫॥

ગાયત્ર્યા જપમન્ત્રાન્તે ત્રિરૂર્ધ્વં પ્રાગ્વિનિક્ષિપેત્ ।
મન્ત્રેણ સહ ચૈકં વૈ મધ્યેઽર્ઘ્યં તુ રવેર્દ્વિજાઃ ॥ ૨૬॥

અથ જાતે ચ સાયાહ્ને ભુવિ પશ્ચિમદિઙ્મુખઃ ।
ઉદ્ધૃત્ય દદ્યાત્ પ્રાતસ્તુ મધ્યાહ્નેઽઙ્ગુલિભિસ્તથા ॥ ૨૭॥

અઙ્ગુલીનાં ચ રન્ધ્રેણ લમ્બં પશ્યેદ્ દિવાકરમ્ ।
આત્મપ્રદક્ષિણં કૃત્વા શુદ્ધાચમનમાચરેત્ ॥ ૨૮॥

સાયં મુહૂર્તાદર્વાક્તુ કૃતા સન્ધ્યા વૃથા ભવેત્ ।

અકાલાત્કાલ ઇત્યુક્તો દિનેઽતીતે યથાક્રમમ્ ॥ ૨૯॥

દિવાતીતે ચ ગાયત્રીં શતં નિત્યે ક્રમાજ્જપેત્ ।
આદશાહાત્પરાતીતં ગાયત્રીં લક્ષમભ્યસેત્ ॥ ૩૦॥

માસાતીતે તુ નિત્યે હિ પુનશ્ચોપનયં ચરેત્ ।
ઈશો ગૌરી ગુહો વિષ્ણુર્બ્રહ્મા ચન્દ્રશ્ચ વૈ યમઃ ॥ ૩૧॥

એવંરૂપાંશ્ચ વૈ દેવાંસ્તર્પયેદર્થસિદ્ધયે ।
બ્રહ્માર્પણં તતઃ કૃત્વા શુદ્ધાચમનમાચરેત્ ॥ ૩૨॥

તીર્થદક્ષિણતઃ શસ્તે મઠે મન્ત્રાલયે બુધઃ ।
તત્ર દેવાલયે વાપિ ગૃહે વા નિયતસ્થલે ॥ ૩૩॥

સર્વાન્દેવાન્નમસ્કૃત્ય સ્થિરબુદ્ધિઃ સ્થિરાસનઃ ।
પ્રણવં પૂર્વમભ્યસ્ય ગાયત્રીમભ્યસેત્તતઃ ॥ ૩૪॥

જીવબ્રહ્મૈક્યવિષયં બુદ્ધ્વા પ્રણવમભ્યસેત્ ।
ત્રૈલોક્યસૃષ્ટિકર્તારં સ્થિતિકર્તારમચ્યુતમ્ ॥ ૩૫॥

સંહર્તારં તથા રુદ્રં સ્વપ્રકાશમુપાસ્મહે ।
જ્ઞાનકર્મેન્દ્રિયાણાં ચ મનોવૃત્તીર્ધિયસ્તથા ॥ ૩૬॥

ભોગમોક્ષપ્રદે ધર્મે જ્ઞાને ચ પ્રેરયેત્સદા ।
ઇત્થમર્થં ધિયા ધ્યાયન્બ્રહ્મ પ્રાપ્નોતિ નિશ્ચયમ્ ॥ ૩૭॥

કેવલં વા જપેન્નિત્યં બ્રાહ્મણ્યસ્ય ચ પૂર્તયે ।
સહસ્રમભ્યસેન્નિત્યં પ્રાતર્બ્રાહ્મણપુઙ્ગવઃ ॥ ૩૮॥

અન્યેષાં ચ યથાશક્તિ મધ્યાહ્ને ચ શતં જપેત્ ।
સાયં દ્વિદશકં જ્ઞેયં શિખાષ્ટકસમન્વિતમ્ ॥ ૩૯॥

મૂલાધારં સમારભ્ય દ્વાદશાંશસ્થિતાંસ્તથા ।
વિદ્યેશબ્રહ્મવિષ્ણ્વીશજીવાત્મપરમેશ્વરાન્ ॥ ૪૦॥

બ્રહ્મબુદ્ધ્યા તદૈક્યં ચ સોઽહં ભાવનયા જપેત્ ।
તાનેવ બ્રહ્મરન્ધ્રાદૌ કાયાદ્ બાહ્યે ચ ભાવયેત્ ॥ ૪૧॥

મહત્તત્ત્વં સમારભ્ય શરીરં તુ સહસ્રકમ્ ।
એકૈકસ્માજ્જપાદેકમતિક્રમ્ય શનૈઃ શનૈઃ ॥ ૪૨॥

પરસ્મિન્યોજયેજ્જીવં જપતત્ત્વમુદાહૃતમ્ ।
શતદ્વિદશકં દેહં શિખાષ્ટકસમન્વિતમ્ ॥ ૪૩॥

મન્ત્રાણાં જપ એવં હિ જપમાદિક્રમાદ્વિદુઃ ।
સહસ્રં બ્રાહ્મદં વિદ્યાચ્છતમૈન્દ્રપ્રદં વિદુઃ ॥ ૪૪॥

ઇતરત્ત્વાત્મરક્ષાર્થં બ્રહ્મયોનિષુ જાયતે ।
દિવાકરમુપસ્થાય નિત્યમિત્થં સમાચરેત્ ॥ ૪૫॥

લક્ષદ્વાદશયુક્તસ્તુ પૂર્ણબ્રાહ્મણ ઈરિતઃ ।
ગાયત્ર્યા લક્ષહીનં તુ વેદકાર્યે ન યોજયેત્ ॥ ૪૬॥

આસપ્તતેસ્તુ નિયમં પશ્ચાત્પ્રવ્રાજનં ચરેત્ ।
પ્રાતર્દ્વાદશસાહસ્રં પ્રવ્રાજી પ્રણવં જપેત્ ॥ ૪૭॥

દિને દિને ત્વતિક્રાન્તે નિત્યમેવં ક્રમાજ્જપેત્ ।
માસાદૌ ક્રમશોઽતીતે સાર્ધલક્ષજપેન હિ ॥ ૪૮॥

અત ઊર્ધ્વમતિક્રાન્તે પુનઃ પ્રૈષં સમાચરેત્ ।
એવં કૃત્વા દોષશાન્તિરન્યથા રૌરવં વ્રજેત્ ॥ ૪૯॥

ધર્માર્થયોસ્તતો યત્નં કુર્યાત્કામી ન ચેતરઃ ।
બ્રાહ્મણો મુક્તિકામઃ સ્યાદ્ બહ્મજ્ઞાનં સદાભ્યસેત્ ॥ ૫૦॥

ધર્માદર્થોઽર્થતો ભોગો ભોગાદ્વૈરાગ્યસમ્ભવઃ ।
ધર્માર્જિતાર્થભોગેન વૈરાગ્યમુપજાયતે ॥ ૫૧॥

વિપરીતાર્થભોગેન રાગ એવ પ્રજાયતે ।
ધર્મશ્ચ દ્વિવિધઃ પ્રોક્તો દ્રવ્યદેહદ્વયેન ચ ॥ ૫૨॥

દ્રવ્યમિજ્યાદિરૂપં સ્યાત્તીર્થસ્નાનાદિ દૈહિકમ્ ।
ધર્મેણ ધનમાપ્નોતિ તપસા દિવ્યરૂપતામ્ ॥ ૫૩॥

નિષ્કામઃ શુદ્ધિમાપ્નોતિ શુદ્ધ્યા જ્ઞાનં ન સંશયઃ ।
કૃતાદૌ હિ તપઃ શ્લાઘ્યં દ્રવ્યધર્મઃ કલૌ યુગે ॥ ૫૪॥

કૃતે ધ્યાનાજ્જ્ઞાનસિદ્ધિસ્ત્રેતાયાં તપસા તથા ।
દ્વાપરે યજનાજ્જ્ઞાનં પ્રતિમાપૂજયા કલૌ ॥ ૫૫॥

યાદૃશં પુણ્યપાપં વા તાદૃશં ફલમેવ હિ ।
દ્રવ્યદેહાઙ્ગભેદેન ન્યૂનવૃદ્ધિક્ષયાદિકમ્ ॥ ૫૬॥

અધર્મો હિંસિકારૂપો ધર્મસ્તુ સુખરૂપકઃ ।
અધર્માદ્ દુઃખમાપ્નોતિ ધર્માદ્વૈ સુખમેધતે ॥ ૫૭॥

વિદ્યાદ્ દુર્વૃત્તિતો દુઃખં સુખં વિદ્યાત્સુવૃત્તિતઃ ।
ધર્માર્જનમતઃ કુર્યાદ્ભોગમોક્ષપ્રસિદ્ધયે ॥ ૫૮॥

સકુટુમ્બસ્ય વિપ્રસ્ય ચતુર્જનયુતસ્ય ચ ।
શતવર્ષસ્ય વૃત્તિં તુ દદ્યાત્તદ્બ્રહ્મલોકદમ્ ॥ ૫૯॥

ચાન્દ્રાયણસહસ્રં તુ બ્રહ્મલોકપ્રદં વિદુઃ ।
સહસ્રસ્ય કુટુમ્બસ્ય પ્રતિષ્ઠાં ક્ષત્રિયશ્ચરેત્ ॥ ૬૦॥

ઇન્દ્રલોકપ્રદં વિદ્યાદયુતં બ્રહ્મલોકદમ્ ।
યાં દેવતાં પુરસ્કૃત્ય દાનમાચરતે નરઃ ॥ ૬૧॥

તત્તલ્લોકમવાપ્નોતિ ઇતિ વેદવિદો વિદુઃ ।
અર્થહીનઃ સદા કુર્યાત્તપસામર્જનં તથા ॥ ૬૨॥

તીર્થાચ્ચ તપસા પ્રાપ્યં સુખમક્ષય્યમશ્નુતે ।
અર્થાર્જનમથો વક્ષ્યે ન્યાયતઃ સુસમાહિતઃ ॥ ૬૩॥

કૃતાત્પ્રતિગ્રહાચ્ચૈવ યાજનાચ્ચ વિશુદ્ધતઃ ।
અદૈન્યાદનતિક્લેશાદ્ બ્રાહ્મણો ધનમર્જયેત્ ॥ ૬૪॥

ક્ષત્રિયો બાહુવીર્યેણ કૃષિગોરક્ષણાદ્ વિશઃ ।
ન્યાયાર્જિતસ્ય વિત્તસ્ય દાનાત્સિદ્ધિં સમશ્નુતે ॥ ૬૫॥

જ્ઞાનસિદ્ધ્યા મોક્ષસિદ્ધિઃ સર્વેષાં ગુર્વનુગ્રહાત્ ।
મોક્ષાત્સ્વરૂપસિદ્ધિઃ સ્યાત્પરાનન્દં સમશ્નુતે ॥ ૬૬॥

સત્સઙ્ગાત્સર્વમેતદ્વૈ નરાણાં જાયતે દ્વિજાઃ ।
ધનધાન્યાદિકં સર્વં દેયં વૈ ગૃહમેધિના ॥ ૬૭॥

યદ્યત્કાલે વસ્તુજાતં ફલં વા ધાન્યમેવ ચ ।
તત્તત્સર્વં બ્રાહ્મણેભ્યો દેયં વૈ હિતમિચ્છતા ॥ ૬૮॥

જલં ચૈવ સદા દેયમન્નં ક્ષુદ્વ્યાધિશાન્તયે ।
ક્ષેત્રં ધાન્યં તથામાન્નમન્નમેવ ચતુર્વિધમ્ ॥ ૬૯॥

યાવત્કાલં યદન્નં વૈ ભુક્ત્વા શ્રવણમેધતે ।

તાવત્કૃતસ્ય પુણ્યસ્ય ત્વર્ધં દાતુર્ન સંશયઃ ॥ ૭૦॥

ગ્રહીતા હિ ગૃહીતસ્ય દાનાદ્વૈ તપસા તથા ।
પાપસંશોધનં કુર્યાદન્યથા રૌરવં વ્રજેત્ ॥ ૭૧॥

આત્મવિત્તં ત્રિધા કુર્યાદ્ધર્મવૃદ્ધ્યાત્મભોગતઃ ।
નિત્યં નૈમિત્તિકં કામ્યં કર્મ કુર્યાત્તુ ધર્મતઃ ॥ ૭૨॥

વિત્તસ્ય વર્ધનં કુર્યાદ્ વૃદ્ધ્યંશેન હિ સાધકઃ ।
હિતેન મિતમેધ્યેન ભોગં ભોગાંશતશ્ચરેત્ ॥ ૭૩॥

કૃષ્યર્જિતે દશાંશં હિ દેયં પાપસ્ય શુદ્ધયે ।
શેષેણ કુર્યાદ્ધર્માદિ અન્યથા રૌરવં વ્રજેત્ ॥ ૭૪॥

અથવા પાપબુદ્ધિઃ સ્યાત્ક્ષયં વા સસ્યમેષ્યતિ ।
વૃદ્ધિવાણિજ્યકે દેયં ષડંશં હિ વિચક્ષણૈઃ ॥ ૭૫॥

શુદ્ધપ્રતિગ્રહે દેયં ચતુર્થાંશં દ્વિજોત્તમૈઃ ।
અકસ્માદુત્થિતેઽર્થે હિ દેયમર્ધં દ્વિજોત્તમૈઃ ॥ ૭૬॥

અસત્પ્રતિગ્રહે સર્વં દુર્દાનં સાગરે ક્ષિપેત્ ।
આહૂય દાનં કર્તવ્યમાત્મભોગસમૃદ્ધયે ॥ ૭૭॥

પૃષ્ટં સર્વં સદા દેયમાત્મશક્ત્યનુસારતઃ ।
જન્માન્તરે ઋણી હિ સ્યાદદત્તે પૃષ્ટવસ્તુનિ ॥ ૭૮॥

પરેષાં ચ તથા દોષં ન પ્રશંસેદ્વિચક્ષણઃ ।
વિદ્વેષેણ તથા બ્રહ્મન્ શ્રુતં દૃષ્ટં ચ નો વદેત્ ॥ ૭૯॥

ન વદેત્સર્વજન્તૂનાં હૃદિ રોષકરં બુધઃ ।
સન્ધ્યયોરગ્નિકાર્યં ચ કુર્યાદૈશ્વર્યસિદ્ધયે ॥ ૮૦॥

અશક્તસ્ત્વેકકાલે વા સૂર્યાગ્ની ચ યથાવિધિ ।
તણ્ડુલં ધાન્યમાજ્યં વા ફલં કન્દં હવિસ્તથા ॥ ૮૧॥

સ્થાલીપાકં તથા કુર્યાદ્યથાન્યાયં યથાવિધિ ।
પ્રધાનહોમમાત્રં વા હવ્યાભાવે સમાચરેત્ ॥ ૮૨॥

નિત્યસન્ધાનમિત્યુક્તં તમજસ્રં વિદુર્બુધાઃ ।
અથવા જપમાત્રં વા સૂર્યવન્દનમેવ ચ ॥ ૮૩॥

એવમાત્માર્થિનઃ કુર્યુરર્થાર્થી ચ યથાવિધિ ।
બ્રહ્મયજ્ઞરતા નિત્યં દેવપૂજારતાસ્તથા ॥ ૮૪॥

અગ્નિપૂજાપરા નિત્યં ગુરુપૂજારતાસ્તથા ।
બ્રાહ્મણાનાં તૃપ્તિકરાઃ સર્વે સ્વર્ગસ્ય ભાગિનઃ ॥ ૮૫॥

ઇતિ શ્રીશિવમહાપુરાણે પ્રથમાયાં વિદ્યેશ્વરસંહિતાયાં સદાચારવર્ણનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૧.૧૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
વિદ્યેશ્વરસંહિતા

## ૧.૧૪. ચતુર્દશોઽધ્યાયઃ । અગ્નિયજ્ઞાદિવર્ણનમ્ ।

ઋષય ઊચુઃ ।
અગ્નિયજ્ઞં દેવયજ્ઞં બ્રહ્મયજ્ઞં તથૈવ ચ ।
ગુરુપૂજાં બ્રહ્મતૃપ્તિં ક્રમેણ બ્રૂહિ નઃ પ્રભો ॥ ૧॥

સૂત ઉવાચ ।
અગ્નૌ જુહોતિ યદ્દ્રવ્યમગ્નિયજ્ઞઃ સ ઉચ્યતે ।
બ્રહ્મચર્યાશ્રમસ્થાનાં સમિદાધાનમેવ હિ ॥ ૨॥

સમિદગ્નૌ વ્રતાદ્યં ચ વિશેષયજનાદિકમ્ ।
પ્રથમાશ્રમિણામેવં યાવદૌપાસનં દ્વિજાઃ ॥ ૩॥

આત્મન્યારોપિતાગ્નીનાં વનિનાં યતિનાં દ્વિજાઃ ।
હિતં ચ મિતમેધ્યાન્નં સ્વકાલે ભોજનં હુતિઃ ॥ ૪॥

ઔપાસનાગ્નિસન્ધાનં સમારભ્ય સુરક્ષિતમ્ ।
કુણ્ડે વાપ્યથ ભાણ્ડે વા તદજસ્રં સમીરિતમ્ ॥ ૫॥

અગ્નિમાત્મન્યરણ્યાં વા રાજદૈવવશાદ્ ધ્રુવમ્ ।
અગ્નિત્યાગભયાદુક્તં સમારોપિતમુચ્યતે ॥ ૬॥

સમ્પત્કરી તથા જ્ઞેયા સાયમગ્ન્યાહુતિર્દ્વિજાઃ ।
આયુષ્કરીતિ વિજ્ઞેયા પ્રાતઃ સૂર્યાહુતિસ્તથા ॥ ૭॥

અગ્નિયજ્ઞો હ્યયં પ્રોક્તો દિવા સૂર્યનિવેશનાત્ ।
ઇન્દ્રાદીન્સકલાન્દેવાનુદ્દિશ્યાગ્નૌ જુહોતિ યત્ ॥ ૮॥

દેવયજ્ઞં હિ તં વિદ્યાત્સ્થાલીપાકાદિકાન્ક્રતૂન્ ।
ચૌલાદિકં તથા જ્ઞેયં લૌકિકાગ્નૌ પ્રતિષ્ઠિતમ્ ॥ ૯॥

બ્રહ્મયજ્ઞં દ્વિજઃ કુર્યાદ્ દેવાનાં તૃપ્તયેઽસકૃત્ ।
બ્રહ્મયજ્ઞ ઇતિ પ્રોક્તો વેદસ્યાધ્યયનં ભવેત્ ॥ ૧૦॥

નિત્યાનન્તરમાસાયં તતસ્તુ ન વિધીયતે ।
અનગ્નૌ દેવયજનં શ‍ૃણુત શ્રદ્ધયાદરાત્ ॥ ૧૧॥

આદિસૃષ્ટૌ મહાદેવઃ સર્વજ્ઞઃ કરુણાકરઃ ।
સર્વલોકોપકારાર્થં વારાન્કલ્પિતવાન્પ્રભુઃ ॥ ૧૨॥

સંસારવૈદ્યઃ સર્વજ્ઞઃ સર્વભેષજભેષજમ્ ।
આદાવારોગ્યદં વારં સ્વવારં કૃતવાન્પ્રભુઃ ॥ ૧૩॥

સમ્પત્કારં સ્વમાયાયા વારં ચ કૃતવાંસ્તતઃ ।
જનને દુર્ગતિક્રાન્તે કુમારસ્ય તતઃ પરમ્ ॥ ૧૪॥

આલસ્યદુરિતક્રાન્ત્યૈ વારં કલ્પિતવાન્પ્રભુઃ ।
રક્ષકસ્ય તથા વિષ્ણોર્લોકાનાં હિતકામ્યયા ॥ ૧૫॥

પુષ્ટ્યર્થં ચૈવ રક્ષાર્થં વારં કલ્પિતવાન્પ્રભુઃ ।
આયુષ્કરં તતો વારમાયુષાં કર્તુરેવ હિ ॥ ૧૬॥

ત્રૈલોક્યસૃષ્ટિકર્તુર્હિ બ્રહ્મણઃ પરમેષ્ઠિનઃ ।
જગદાયુષ્યસિદ્ધ્યર્થં વારં કલ્પિતવાન્પ્રભુઃ ॥ ૧૭॥

આદૌ ત્રૈલોક્યવૃદ્ધ્યર્થં પુણ્યપાપે પ્રકલ્પિતે ।
તયોઃ કર્ત્રોસ્તતો વારમિન્દ્રસ્ય ચ યમસ્ય ચ ॥ ૧૮॥

ભોગપ્રદં મૃત્યુહરં લોકાનાં ચ પ્રકલ્પિતમ્ ।
આદિત્યાદીન્સ્વસ્વરૂપાન્સુખદુઃખસ્ય સૂચકાન્ ॥ ૧૯॥

વારેશાન્કલ્પયિત્વાદૌ જ્યોતિશ્ચક્રે પ્રતિષ્ઠિતાન્ ।
સ્વસ્વવારે હિ તેષાં તુ પૂજા સ્વસ્વફલપ્રદા ॥ ૨૦॥

આરોગ્યં સમ્પદશ્ચૈવ વ્યાધીનાં શાન્તિરેવ ચ ।
પુષ્ટિરાયુસ્તથા ભોગો મૃતેર્હાનિર્યથાક્રમમ્ ॥ ૨૧॥

વારક્રમફલં પ્રાહુર્દેવપ્રીતિપુરઃસરમ્ ।
અન્યેષામપિ દેવાનાં પૂજાયાઃ ફલદઃ શિવઃ ॥ ૨૨॥

દેવાનાં પ્રીતયે પૂજા પઞ્ચધૈવ પ્રકલ્પિતા ।
તત્તન્મન્ત્રજપો હોમો દાનં ચૈવ તપસ્તથા ॥ ૨૩॥

સ્થણ્ડિલે પ્રતિમાયાં ચ હ્યગ્નૌ બ્રાહ્મણવિગ્રહે ।
સમારાધનમિત્યેવં ષોડશૈરુપચારકૈઃ ॥ ૨૪॥

ઉત્તરોત્તરવૈશિષ્ટ્યાત્પૂર્વાભાવે તથોત્તરમ્ ।
નેત્રયોઃ શિરસો રોગે તથા કુષ્ઠસ્ય શાન્તયે ॥ ૨૫॥

આદિત્યં પૂજયિત્વા તુ બ્રાહ્મણાન્ભોજયેત્તતઃ ।
દિનં માસં તથા વર્ષં વર્ષત્રયમથવાપિ વા ॥ ૨૬॥

પ્રારબ્ધં પ્રબલં ચેત્સ્યાન્નશ્યેદ્ રોગજરાદિકમ્ ।
જપાદ્યમિષ્ટદેવસ્ય વારાદીનાં ફલં વિદુઃ ॥ ૨૭॥

પાપશાન્તિર્વિશેષેણ હ્યાદિવારે નિવેદયેત્ ।
આદિત્યસ્યૈવ દેવાનાં બ્રાહ્મણાનાં વિશિષ્ટદમ્ ॥ ૨૮॥

સોમવારે ચ લક્ષ્મ્યાદીન્સમ્પદર્થં યજેદ્ બુધઃ ।
આજ્યાન્નેન તથા વિપ્રાન્સપત્નીકાંશ્ચ ભોજયેત્ ॥ ૨૯॥

કાલ્યાદીન્ભૌમવારે તુ યજેદ્ રોગપ્રશાન્તયે ।
માષમુદ્ગાઢકાન્નેન બ્રાહ્મણાંશ્ચૈવ ભોજયેત્ ॥ ૩૦॥

સૌમ્યવારે તથા વિષ્ણું દધ્યન્નેન યજેદ્બુધઃ ।
પુત્રમિત્રકલત્રાદિપુષ્ટિર્ભવતિ સર્વદા ॥ ૩૧॥

આયુષ્કામો ગુરોર્વારે દેવાનાં પુષ્ટિસિદ્ધયે ।
ઉપવીતેન વસ્ત્રેણ ક્ષીરાજ્યેન યજેદ્ બુધઃ ॥ ૩૨॥

ભોગાર્થં ભૃગુવારે તુ યજેદ્ દેવાન્સમાહિતઃ ।
ષડ્રસોપેતમન્નં ચ દદ્યાદ્ બ્રાહ્મણતૃપ્તયે ॥ ૩૩॥

સ્ત્રીણાં ચ તૃપ્તયે તદ્વદ્ દેયં વસ્ત્રાદિકં શુભમ્ ।
અપમૃત્યુહરે મન્દે રુદ્રાદીંશ્ચ યજેદ્ બુધઃ ॥ ૩૪॥

તિલહોમેન દાનેન તિલાન્નેન ચ ભોજયેત્ ।
ઇત્થં યજેચ્ચ વિબુધાનારોગ્યાદિફલં લભેત્ ॥ ૩૫॥

દેવાનાં નિત્યયજને વિશેષયજનેઽપિ ચ ।

સ્નાને દાને જપે હોમે બ્રાહ્મણાનાં ચ તર્પણે ॥ ૩૬॥

તિથિનક્ષત્રયોગે ચ તત્તદ્દેવપ્રપૂજને ।
આદિવારાદિવારેષુ સર્વજ્ઞો જગદીશ્વરઃ ॥ ૩૭॥

તતદ્રૂપેણ સર્વેષામારોગ્યાદિફલપ્રદઃ ।
દેશકાલાનુસારેણ તથા પાત્રાનુસારતઃ ॥ ૩૮॥

દ્રવ્યં શ્રદ્ધાનુસારેણ તથા લોકાનુસારતઃ ।
તારતમ્યક્રમાદ્ દેવસ્ત્વારોગ્યાદીન્પ્રયચ્છતિ ॥ ૩૯॥

શુભાદાવશુભાન્તે ચ જન્મર્ક્ષેષુ ગૃહે ગૃહી ।
આરોગ્યાદિસમૃદ્ધ્યર્થમાદિત્યાદીન્ગ્રહાન્યજેત્ ॥ ૪૦॥

તસ્માદ્વૈ દેવયજનં સર્વાભીષ્ટફલપ્રદમ્ ।
સમન્ત્રકં બ્રાહ્મણાનામન્યેષાં ચૈવ તાન્ત્રિકમ્ ॥ ૪૧॥

યથાશક્ત્યનુરૂપેણ કર્તવ્યં સર્વદા નરૈઃ ।
સપ્તસ્વપિ ચ વારેષુ નરૈઃ શુભફલેપ્સુભિઃ ॥ ૪૨॥

દરિદ્રસ્તપસા દેવાન્યજેદાઢ્યો ધનેન હિ ।
પુનશ્ચૈવંવિધં ધર્મં કુરુતે શ્રદ્ધયા સહ ॥ ૪૩॥

પુનશ્ચ ભોગાન્વિવિધાન્ભુક્ત્વા ભૂમૌ પ્રજાયતે ।
છાયાં જલાશયં બ્રહ્મપ્રતિષ્ઠાં ધર્મસઞ્ચયમ્ ॥ ૪૪॥

સર્વં ચ વિત્તવાન્કુર્યાત્સદા ભોગપ્રસિદ્ધયે ।
કાલાચ્ચ પુણ્યપાકેન જ્ઞાનસિદ્ધિઃ પ્રજાયતે ॥ ૪૫॥

ય ઇમં શ્ૃણુતેઽધ્યાયં પઠતે વા નરો દ્વિજાઃ ।
શ્રવણસ્યોપકર્તા ચ દેવયજ્ઞફલં લભેત્ ॥ ૪૬॥

ઇતિ શ્રીશિવમહાપુરાણે પ્રથમાયાં વિદ્યેશ્વરસંહિતાયામગ્નિયજ્ઞાદિવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૧.૧૪॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

વિદ્યેશ્વરસંહિતા

## ૧.૧૫. પઞ્ચદશોઽધ્યાયઃ । દેવયજ્ઞાદિષુ દેશકાલપાત્રાદિવર્ણનમ્ ।

ઋષય ઊચુઃ ।
દેશાદીન્ક્રમશો બ્રૂહિ સૂત સર્વાર્થવિત્તમ ।
સૂત ઉવાચ ।
શુદ્ધં ગૃહં સમફલં દેવયજ્ઞાદિકર્મસુ ॥ ૧॥

તતો દશગુણં ગોષ્ઠં જલતીરં તતો દશ ।
તતો દશગુણં બિલ્વતુલસ્યશ્વત્થમૂલકમ્ ॥ ૨॥

તતો દેવાલયં વિદ્યાત્તીર્થતીરં તતો દશ ।
તતો દશગુણં નદ્યાસ્તીર્થનદ્યાસ્તતો દશ ॥ ૩॥

સપ્તગઙ્ગાનદીતીર્થં તસ્યા દશગુણં ભવેત્ ।
ગઙ્ગા ગોદાવરી ચૈવ કાવેરી તામ્રપર્ણિકા ॥ ૪॥

સિન્ધુશ્ચ સરયૂ રેવા સપ્ત ગઙ્ગાઃ પ્રકીર્તિતાઃ ।
તતોઽબ્ધિતીરે દશ ચ પર્વતાગ્રે તતો દશ ॥ ૫॥

સર્વસ્માદધિકં જ્ઞેયં યત્ર વા રોચતે મનઃ ।
કૃતે પૂર્ણફલં જ્ઞેયં યજ્ઞદાનાદિકં તથા ॥ ૬॥

ત્રેતાયુગે ત્રિપાદં ચ દ્વાપરેઽર્ધં સદા સ્મૃતમ્ ।
કલૌ પાદં તુ વિજ્ઞેયં તત્પાદોનં તતોઽર્ધકે ॥ ૭॥

શુદ્ધાત્મનઃ શુદ્ધદિનં પુણ્યં સમફલં વિદુઃ ।
તસ્માદ્ દશગુણં જ્ઞેયં રવિસઙ્ક્રમણે બુધાઃ ॥ ૮॥

વિષુવે તદ્દશગુણમયને તદ્દશ સ્મૃતમ્ ।
તદ્દશ મૃગસઙ્ક્રાન્તૌ તચ્ચન્દ્રગ્રહણે દશ ॥ ૯॥

તતશ્ચ સૂર્યગ્રહણે પૂર્ણં કાલોત્તમે વિદુઃ ।
જગદ્રૂપસ્ય સૂર્યસ્ય વિષયોગાચ્ચ રોગદમ્ ॥ ૧૦॥

અતસ્તદ્વિષશાન્ત્યર્થં સ્નાનદાનજપાંશ્ચરેત્ ।
વિષશાન્ત્યર્થકાલત્વાત્સ કાલઃ પુણ્યદઃ સ્મૃતઃ ॥ ૧૧॥

જન્મર્ક્ષે ચ વ્રતાન્તે ચ સૂર્યરાગોપમં વિદુઃ ।
મહતાં સઙ્ગકાલશ્ચ કોટ્યર્કગ્રહણં વિદુઃ ॥ ૧૨॥

તપોનિષ્ઠા જ્ઞાનનિષ્ઠા યોગિનો યતયસ્તથા ।

પૂજાયાઃ પાત્રમેતે હિ પાપસઙ્ક્ષયકારણમ્ ॥ ૧૩॥

ચતુર્વિંશતિલક્ષં વા ગાયત્ર્યા જપસંયુતઃ ।
બ્રાહ્મણસ્તુ ભવેત્પાત્રં સમ્પૂર્ણફલભોગદમ્ ॥ ૧૪॥

પતનાત્ત્રાયત ઇતિ પાત્રં શાસ્ત્રે પ્રયુજ્યતે ।
દાતુશ્ચ પાતકાત્ત્રાણાત્પાત્રમિત્યભિધીયતે ॥ ૧૫॥

ગાયકં ત્રાયતે પાતાદ્ગાયત્રીત્યુચ્યતે હિ સા ।
યથાર્થહિનો લોકેઽસ્મિન્પરસ્યાર્થં ન યચ્છતિ ॥ ૧૬॥

અર્થવાનિહ યો લોકે પરસ્યાર્થં પ્રયચ્છતિ ।
સ્વયં શુદ્ધો હિ પૂતાત્મા નરાન્સન્ત્રાતુમર્હતિ ॥ ૧૭॥

ગાયત્રીજપશુદ્ધો હિ શુદ્ધબ્રાહ્મણ ઉચ્યતે ।
તસ્માદ્ દાને જપે હોમે પૂજાયાં સર્વકર્મણિ ॥ ૧૮॥

દાનં કર્તું તથા ત્રાતું પાત્રત્વં બ્રાહ્મણોઽર્હતિ ।
અન્નસ્ય ક્ષુધિતં પાત્રં નારીનરમયાત્મકમ્ ॥ ૧૯॥

બ્રાહ્મણં શ્રેષ્ઠમાહૂય યત્કાલે સુસમાહિતમ્ ।
તદર્થં શબ્દમર્થં વા સદ્બોધકમભીષ્ટદમ્ ॥ ૨૦॥

ઇચ્છાવતઃ પ્રદાનં ચ સમ્પૂર્ણફલદં વિદુઃ ।
યત્પ્રશ્નાનન્તરં દત્તં તદર્ધફલદં વિદુઃ ॥ ૨૧॥

યત્સેવકાય દત્તં સ્યાત્તત્પાદફલદં વિદુઃ ।
જાતિમાત્રસ્ય વિપ્રસ્ય દીનવૃત્તેર્દ્વિજર્ષભાઃ ॥ ૨૨॥

દત્તમર્થં હિ ભોગાય ભૂર્લોકે દશવાર્ષિકમ્ ।
વેદયુક્તસ્ય વિપ્રસ્ય સ્વર્ગે હિ દશવાર્ષિકમ્ ॥ ૨૩॥

ગાયત્રીજપયુક્તસ્ય સત્યે હિ દશવાર્ષિકમ્ ।
વિષ્ણુભક્તસ્ય વિપ્રસ્ય દત્તં વૈકુણ્ઠદં વિદુઃ ॥ ૨૪॥

શિવભક્તસ્ય વિપ્રસ્ય દત્તં કૈલાસદં વિદુઃ ।
તત્તલ્લોકોપભોગાર્થં સર્વેષાં દાનમિષ્યતે ॥ ૨૫॥

દશાઙ્ગમન્નં વિપ્રસ્ય ભાનુવારે દદન્નરઃ ।
પરજન્મનિ ચારોગ્યં દશવર્ષં સમશ્નુતે ॥ ૨૬॥

બહુમાનમથાહ્વાનમભ્યઙ્ગં પાદસેવનમ્ ।
વાસો ગન્ધાદ્યર્ચનં ચ ઘૃતાપૂપરસોત્તરમ્ ॥ ૨૭॥

ષડ્રસં વ્યઞ્જનં ચૈવ તામ્બૂલં દક્ષિણોત્તરમ્ ।
નમશ્ચાનુગમશ્ચૈવ સ્વન્નદાનં દશાઙ્ગકમ્ ॥ ૨૮॥

દશાઙ્ગમન્નં વિપ્રેભ્યો દશભ્યો વૈ દદન્નરઃ ।
અર્કવારે તથારોગ્યં શતવર્ષં સમશ્નુતે ॥ ૨૯॥

સોમવારાદિવારેષુ તત્તદ્વારગુણં ફલમ્ ।
અન્નદાનસ્ય વિજ્ઞેયં ભૂર્લોકે પરજન્મનિ ॥ ૩૦॥

સપ્તસ્વપિ ચ વારેષુ દશભ્યશ્ચ દશાઙ્ગકમ્ ।
અન્નં દત્ત્વા શતં વર્ષમારોગ્યાદિકમશ્નુતે ॥ ૩૧॥

એવં શતેભ્યો વિપ્રેભ્યો ભાનુવારે દદન્નરઃ ।
સહસ્રવર્ષમારોગ્યં શર્વલોકે સમશ્નુતે ॥ ૩૨॥

સહસ્રેભ્યસ્તથા દત્ત્વાઽયુતવર્ષં સમશ્નુતે ।
એવં સોમાદિવારેષુ વિજ્ઞેયં હિ વિપશ્ચિતા ॥ ૩૩॥

ભાનુવારે સહસ્રાણાં ગાયત્રીપૂતચેતસામ્ ।
અન્નં દત્ત્વા સત્યલોકે હ્યારોગ્યાદિ સમશ્નુતે ॥ ૩૪॥

અયુતાનાં તથા દત્ત્વા વિષ્ણુલોકે સમશ્નુતે ।
અન્નં દત્ત્વા તુ લક્ષાણાં રુદ્રલોકે સમશ્નુતે ॥ ૩૫॥

બાલાનાં બ્રહ્મબુદ્ધ્યા હિ દેયં વિદ્યાર્થિભિર્નરૈઃ ।
યૂનાં ચ વિષ્ણુબુદ્ધ્યા હિ પુત્રકામાર્થિભિર્નરૈઃ ॥ ૩૬॥

વૃદ્ધાનાં રુદ્રબુદ્ધ્યા હિ દેયં જ્ઞાનાર્થિભિર્નરૈઃ ।
બાલસ્ત્રી ભારતીબુદ્ધ્યા બુદ્ધિકામૈર્નરોત્તમૈઃ ॥ ૩૭॥

લક્ષ્મીબુદ્ધ્યા યુવસ્ત્રીષુ ભોગકામૈર્નરોત્તમૈઃ ।
વૃદ્ધાસુ પાર્વતીબુદ્ધ્યા દેયમાત્માર્થિભિર્જનૈઃ ॥ ૩૮॥

શિલવૃત્ત્યોઞ્છવૃત્ત્યા ચ ગુરુદક્ષિણયાર્જિતમ્ ।
શુદ્ધદ્રવ્યમિતિ પ્રાહુસ્તત્પૂર્ણફલદં વિદુઃ ॥ ૩૯॥

શુક્લપ્રતિગ્રહાદ્દત્તં મધ્યમં દ્રવ્યમુચ્યતે ।
કૃષિવાણિજ્યકોપેતમધમં દ્રવ્યમુચ્યતે ॥ ૪૦॥

ક્ષત્રિયાણાં વિશાં ચૈવ શૌર્યવાણિજ્યકાર્જિતમ્ ।
ઉત્તમં દ્રવ્યમિત્યાહુઃ શૂદ્રાણાં ભૃતકાર્જિતમ્ ॥ ૪૧॥

સ્ત્રીણાં ધર્માર્થિનાં દ્રવ્યં પૈતૃકં ભર્તૃકં તથા ।
ગવાદીનાં દ્વાદશાનાં ચૈત્રાદિષુ યથાક્રમમ્ ॥ ૪૨॥

સમ્ભૂય વા પુણ્યકાલે દદ્યાદિષ્ટસમૃદ્ધયે ।
ગોભૂતિલહિરણ્યાજ્યવાસોધાન્યગુડાનિ ચ ॥ ૪૩॥

રૌપ્યં લવણકૂષ્માણ્ડં કન્યા દ્વાદશકં તથા ।
ગોદાનાદ્દત્તગવ્યેન ગોમયેનોપકારિણા ॥ ૪૪॥

ધનધાન્યાદ્યાશ્રિતાનાં દુરિતાનાં નિવારણમ્ ।
જલસ્નેહાદ્યાશ્રિતાનાં દુરિતાનાં તુ ગોજલૈઃ ॥ ૪૫॥

કાયિકાદિત્રયાણાં તુ ક્ષીરદધ્યાજ્યકૈસ્તથા ।
તથા તેષાં ચ પુષ્ટિશ્ચ વિજ્ઞેયા હિ વિપશ્ચિતા ॥ ૪૬॥

ભૂદાનં તુ પ્રતિષ્ઠાર્થમિહ ચામુત્ર ચ દ્વિજાઃ ।
તિલદાનં બલાર્થં હિ સદા મૃત્યુજયં વિદુઃ ॥ ૪૭॥

હિરણ્યં જાઠરાગ્નેસ્તુ વૃદ્ધિદં વીર્યદં તથા ।
આજ્યં પુષ્ટિકરં વિદ્યાદ્વસ્ત્રમાયુષ્કરં વિદુઃ ॥ ૪૮॥

ધાન્યમન્નસમૃદ્ધ્યર્થં મધુરાહારદં ગુડમ્ ।
રૌપ્યં રેતોઽભિવૃદ્ધ્યર્થં ષડ્રસાર્થં તુ લાવણમ્ ॥ ૪૯॥

સર્વં સર્વસમૃદ્ધ્યર્થં કૂષ્માણ્ડં પુષ્ટિદં વિદુઃ ।
પ્રાપ્તિદં સર્વભોગાનામિહ ચામુત્ર ચ દ્વિજાઃ ॥ ૫૦॥

યાવજ્જીવનમુક્તં હિ કન્યાદાનં તુ ભોગદમ્ ।
પનસામ્રકપિત્થાનાં વૃક્ષાણાં ફલમેવ ચ ॥ ૫૧॥

કદલ્યાદ્યૌષધીનાં ચ ફલં ગુલ્મોદ્ભવં તથા ।
માષાદીનાં ચ મુદ્ગાનાં ફલં શાકાદિકં તથા ॥ ૫૨॥

મરીચિસર્ષપાદ્યાનાં શાકોપકરણં તથા ।
યદૃતૌ યત્ફલં સિદ્ધં તદ્દેયં હિ વિપશ્ચિતા ॥ ૫૩॥

શ્રોત્રાદીન્દ્રિયતૃપ્તિશ્ચ સદા દેયા વિપશ્ચિતા ।

શબ્દાદિદશભોગાર્થં દિગાદીનાં ચ તુષ્ટિદા ॥ ૫૪॥

વેદશાસ્ત્રં સમાદાય બુદ્ધ્વા ગુરુમુખાત્સ્વયમ્ ।
કર્મણાં ફલમસ્તીતિ બુદ્ધિરાસ્તિક્યમુચ્યતે ॥ ૫૫॥

બન્ધુરાજભયાદ્બુદ્ધિઃ શ્રદ્ધા સા ચ કનીયસી ।
સર્વાભાવે દરિદ્રસ્તુ વાચા વા કર્મણા યજેત્ ॥ ૫૬॥

વાચિકં યજનં વિદ્યાન્મન્ત્રસ્તોત્રજપાદિકમ્ ।
તીર્થયાત્રા વ્રતાદ્યં હિ કાયિકં યજનં વિદુઃ ॥ ૫૭॥

યેન કેનાપ્યુપાયેન હ્યલ્પં વા યદિ વા બહુ ।
દેવતાર્પણબુદ્ધ્યા ચ કૃતં ભોગાય કલ્પતે ॥ ૫૮॥

તપશ્ચર્યા ચ દાનં ચ કર્તવ્યમુભયં સદા ।
પ્રતિશ્રયં પ્રદાતવ્યં સ્વવર્ણં ગુણશોભિતમ્ ॥ ૫૯॥

દેવાનાં તૃપ્તયેઽત્યર્થં સર્વભોગપ્રદં બુધૈઃ ।
ઇહામુત્રોત્તમં જન્મ સદા ભોગં લભેદ્ બુધઃ ।
ઈશ્વરાર્પણબુદ્ધ્યા હિ કૃત્વા મોક્ષફલં લભેત્ ॥ ૬૦॥

ય ઇમં પઠતેઽધ્યાયં યઃ શ‍ૃણોતિ સદા નરઃ ।
તસ્ય વૈ ધર્મબુદ્ધિશ્ચ જ્ઞાનસિદ્ધિઃ પ્રજાયતે ॥ ૬૧॥

ઇતિ શ્રીશિવમહાપુરાણે પ્રથમાયાં વિદ્યેશ્વરસંહિતાયાં દેશકાલપાત્રાદિવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૧.૧૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
વિદ્યેશ્વરસંહિતા

## ૧.૧૬. ષોડશોઽધ્યાયઃ । પાર્થિવપૂજનપ્રકારાસ્તત્ફલાનિ ચ ।

ઋષય ઊચુઃ ।
પાર્થિવપ્રતિમાપૂજાવિધાનં બ્રૂહિ સત્તમ ।
યેન પૂજાવિધાનેન સર્વાભીષ્ટમવાપ્યતે ॥ ૧॥

સૂત ઉવાચ ।
સુસાધુ પૃષ્ટં યુષ્માભિઃ સદા સર્વાર્થદાયકમ્ ।
સદ્યો દુઃખસ્ય શમનં શ‍ૃણુત પ્રબ્રવીમિ વઃ ॥ ૨॥

અપમૃત્યુહરં કાલમૃત્યોશ્ચાપિ વિનાશનમ્ ।
સદ્યઃ કલત્રપુત્રાદિધનધાન્યપ્રદં દ્વિજાઃ ॥ ૩॥

અન્નાદિભોજ્યં વસ્ત્રાદિ સર્વમુત્પદ્યતે યતઃ ।
તતો મૃદાદિપ્રતિમાપૂજાભીષ્ટપ્રદા ભુવિ ॥ ૪॥

પુરુષાણાં ચ નારીણામધિકારોઽત્ર નિશ્ચિતમ્ ।
નદ્યાં તડાગે કૂપે વા જલાન્તર્મૃદમાહરેત્ ॥ ૫॥

સંશોધ્ય ગન્ધચૂર્ણેન પેષયિત્વા સુમણ્ડપે ।
હસ્તેન પ્રતિમાં કુર્યાત્ક્ષીરેણ ચ સુસંસ્કૃતામ્ ॥ ૬॥

અઙ્ગપ્રત્યઙ્ગકોપેતામાયુધૈશ્ચ સમન્વિતામ્ ।
પદ્માસનસ્થિતાં કૃત્વા પૂજયેદાદરેણ હિ ॥ ૭॥

વિઘ્નેશાદિત્યવિષ્ણૂનામમ્બાયાશ્ચ શિવસ્ય ચ ।
શિવસ્ય શિવલિઙ્ગં ચ સર્વદા પૂજયેદ્ દ્વિજઃ ॥ ૮॥

ષોડશૈરુપચારૈશ્ચ કુર્યાત્તત્ફલસિદ્ધયે ।
પુષ્પેણ પ્રોક્ષણં કુર્યાદભિષેકં સમન્ત્રકમ્ ॥ ૯॥

શાલ્યન્નેનૈવ નૈવેદ્યં સર્વં કુડવમાનતઃ ।
ગૃહે તુ કુડવં જ્ઞેયં માનુષે પ્રસ્થમિષ્યતે ॥ ૧૦॥

દૈવે પ્રસ્થત્રયં યોગ્યં સ્વયમ્ભોઃ પ્રસ્થપઞ્ચકમ્ ।
એવં પૂર્ણફલં વિદ્યાદધિકં વૈ દ્વયં ત્રયમ્ ॥ ૧૧॥

સહસ્રપૂજયા સત્યં સત્યલોકં લભેદ્ દ્વિજઃ ।
દ્વાદશાઙ્ગુલમાયામં દ્વિગુણં ચ તતોઽધિકમ્ ॥ ૧૨॥

પ્રમાણમઙ્ગુલસ્યૈકં તદૂર્ધ્વં પઞ્ચકત્રયમ્ ।
અયોદારુકૃતં પાત્રં શિવમિત્યુચ્યતે બુધૈઃ ॥ ૧૩॥

તદષ્ટભાગઃ પ્રસ્થઃ સ્યાત્તચ્ચતુષ્કુડવં મતમ્ ।
દશપ્રસ્થં શતપ્રસ્થં સહસ્રપ્રસ્થમેવ ચ ॥ ૧૪॥

જલતૈલાદિગન્ધાનાં યથાયોગ્યં ચ માનતઃ ।
માનુષાર્ષસ્વયમ્ભૂનાં મહાપૂજેતિ કથ્યતે ॥ ૧૫॥

અભિષેકાદાત્મશુદ્ધિર્ગન્ધાત્પુણ્યમવાપ્યતે ।
આયુસ્તૃપ્તિશ્ચ નૈવેદ્યાદ્ ધૂપાદર્થમવાપ્યતે ॥ ૧૬॥

દીપાજ્જ્ઞાનમવાપ્નોતિ તામ્બૂલાદ્ભોગમાપ્નુયાત્ ।
તસ્માત્સ્નાનાદિકં ષટ્કં પ્રયત્નેન પ્રસાધયેત્ ॥ ૧૭॥

નમસ્કારો જપશ્ચૈવ સર્વાભીષ્ટપ્રદાવુભૌ ।
પૂજાન્તે ચ સદા કાર્યૌ ભોગમોક્ષાર્થિભિર્નરૈઃ ॥ ૧૮॥

સમ્પૂજ્ય મનસા પૂર્વં કુર્યાત્તત્તત્સદા નરઃ ।
દેવાનાં પૂજયા ચૈવ તત્તલ્લોકમવાપ્નુયાત્ ॥ ૧૯॥

તદવાન્તરલોકે ચ યથેષ્ટં ભોગ્યમાપ્યતે ।
તદ્વિશેષાન્પ્રવક્ષ્યામિ શ઼ૃણુત શ્રદ્ધયા દ્વિજાઃ ॥ ૨૦॥

વિઘ્નેશપૂજયા સમ્યગ્ભૂર્લોકેઽભીષ્ટમાપ્નુયાત્ ।
શુક્રવારે ચતુર્થ્યાઞ્ચ સિતે શ્રાવણભાદ્રકે ॥ ૨૧॥

ભિષગૃક્ષે ધનુર્માસે વિઘ્નેશં વિધિવદ્યજેત્ ।
શતં પૂજા સહસ્રં વા તત્સઙ્ખ્યાકદિનૈર્વ્રજેત્ ॥ ૨૨॥

દેવાગ્નિશ્રદ્ધયા નિત્યં પુત્રદં ચેષ્ટદં નૃણામ્ ।
સર્વપાપપ્રશમનં તત્તદુરિતનાશનમ્ ॥ ૨૩॥

વારપૂજાં શિવાદીનામાત્મશુદ્ધિપ્રદાં વિદુઃ ।
તિથિનક્ષત્રયોગાનામાધારં સાર્વકામિકમ્ ॥ ૨૪॥

તથા વૃદ્ધિક્ષયાભાવાત્પૂર્ણબ્રહ્માત્મકં વિદુઃ ।
ઉદયાદુદયં વારો બ્રહ્મપ્રભૃતિકર્મણામ્ ॥ ૨૫॥

તિથ્યાદૌ દેવપૂજા હિ પૂર્ણભોગપ્રદા નૃણામ્ ।
પૂર્વભાગઃ પિતૃણાં તુ નિશિયુક્તઃ પ્રશસ્યતે ॥ ૨૬॥

પરભાગસ્તુ દેવાનાં દિવાયુક્તઃ પ્રશસ્યતે ।
ઉદયવ્યાપિની ગ્રાહ્યા મધ્યાહ્ને યદિ સા તિથિઃ ॥ ૨૭॥

દેવકાર્યે તથા ગ્રાહ્યાસ્તિથિઋક્ષાદિકાઃ શુભાઃ ।
સમ્યગ્વિચાર્ય વારાદીન્કુર્યાત્પૂજાજપાદિકમ્ ॥ ૨૮॥

પૂર્જાયતે હ્યનેનેતિ વેદેષ્વર્થસ્ય યોજના ।
પૂર્ભોગફલસિદ્ધિશ્ચ જાયતે તેન કર્મણા ॥ ૨૯॥

મનોભાવાંસ્તથા જ્ઞાનમિષ્ટભોગાર્થયોજનાત્ ।

પૂજાશબ્દાર્થ એવં હિ વિશ્રુતો લોકવેદયોઃ ॥ ૩૦॥

નિત્યં નૈમિત્તિકં કાલાત્સદ્યઃ કામ્યે સ્વનુષ્ઠિતે ।
નિત્યં માસં ચ પક્ષં ચ વર્ષં ચૈવ યથાક્રમમ્ ॥ ૩૧॥

તત્તત્કર્મફલપ્રાપ્તિસ્તાદૃક્પાપક્ષયઃ ક્રમાત્ ।
મહાગણપતેઃ પૂજા ચતુર્થ્યાં કૃષ્ણપક્ષકે ॥ ૩૨॥

પક્ષપાપક્ષયકરી પક્ષભોગફલપ્રદા ।
ચૈત્રે ચતુર્થ્યાં પૂજા ચ કૃતા માસફલપ્રદા ॥ ૩૩॥

વર્ષભોગપ્રદા જ્ઞેયા કૃતા વૈ સિંહભાદ્રકે ।
શ્રાવણાદિત્યવારે ચ સપ્તમ્યાં હસ્તભે દિને ॥ ૩૪॥

માઘશુક્લે ચ સપ્તમ્યામાદિત્યયજનં ચરેત્ ।
જ્યેષ્ઠભાદ્રકસૌમ્યે ચ દ્વાદશ્યાં શ્રવણર્ક્ષકે ॥ ૩૫॥

કૃતં શ્રીવિષ્ણુયજનમિષ્ટસમ્પત્કરં વિદુઃ ।
શ્રાવણે વિષ્ણુયજનમિષ્ટારોગ્યપ્રદં ભવેત્ ॥ ૩૬॥

ગવાદીન્દ્વાદશાનર્થાન્સાઙ્ગાન્દત્ત્વા તુ યત્ફલમ્ ।
તત્ફલં સમવાપ્નોતિ દ્વાદશ્યાં વિષ્ણુતર્પણાત્ ॥ ૩૭॥

દ્વાદશ્યાં દ્વાદશાન્વિપ્રાન્ વિષ્ણોર્દ્વાદશનામતઃ ।
ષોડશૈરુપચારૈશ્ચ યજેત્તત્પ્રીતિમાપ્નુયાત્ ॥ ૩૮॥

એવં ચ સર્વદેવાનાં તત્તદ્દ્વાદશનામકૈઃ ।
દ્વાદશબ્રહ્મયજનં તત્તત્પ્રીતિકરં ભવેત્ ॥ ૩૯॥

કર્કટે સોમવારે ચ નવમ્યાં મૃગશીર્ષકે ।
અમ્બાં યજેદ્ ભૂતિકામઃ સર્વભોગફલપ્રદામ્ ॥ ૪૦॥

આશ્વયુક્છુક્લનવમી સર્વાભીષ્ટફલપ્રદા ।
આદિવારે ચતુર્દશ્યાં કૃષ્ણપક્ષે વિશેષતઃ ॥ ૪૧॥

આર્દ્રાયાં ચ મહાર્દ્રાયાં શિવપૂજા વિશિષ્યતે ।
માઘકૃષ્ણચતુર્દશ્યાં સર્વાભીષ્ટફલપ્રદા ॥ ૪૨॥

આયુષ્કરી મૃત્યુહરા સર્વસિદ્ધિકરી નૃણામ્ ।
જ્યેષ્ઠમાસે મહાર્દ્રાયાં ચતુર્દશીદિનેઽપિ ચ ॥ ૪૩॥

માર્ગશીર્ષાર્દ્રકાયાં વા ષોડશૈરુપચારકૈઃ ।
તત્તન્મૂર્તિશિવં પૂજ્ય તસ્ય વૈ પાદદર્શનમ્ ॥ ૪૪॥

શિવસ્ય યજનં જ્ઞેયં ભોગમોક્ષપ્રદં નૃણામ્ ।
વારાદિદેવયજનં કાર્તિકે હિ વિશિષ્યતે ॥ ૪૫॥

કાર્તિકે માસિ સમ્પ્રાપ્તે સર્વાન્દેવાન્યજેદ્ બુધઃ ।
દાનેન તપસા હોમૈર્જપેન નિયમેન ચ ॥ ૪૬॥

ષોડશૈરુપચારૈશ્ચ પ્રતિમાવિપ્રમન્ત્રકૈઃ ।
બ્રાહ્મણાનાં ભોજનેન નિષ્કામાર્તિહરો ભવેત્ ॥ ૪૭॥

કાર્તિકે દેવયજનં સર્વભોગપ્રદં ભવેત્ ।
વ્યાધીનાં હરણં ચૈવ ભવેદ્ભૂતગ્રહક્ષયઃ ॥ ૪૮॥

કાર્તિકાદિત્યવારેષુ નૃણામાદિત્યપૂજનાત્ ।
તૈલકાર્પાસદાનાત્તુ ભવેત્કુષ્ઠાદિસઙ્ક્ષયઃ ॥ ૪૯॥

હરીતકીમરીચીનાં વસ્ત્રક્ષીરાદિદાનતઃ ।
બ્રહ્મપ્રતિષ્ઠયા ચૈવ ક્ષયરોગક્ષયો ભવેત્ ॥ ૫૦॥

દીપસર્ષપદાનાચ્ચ અપસ્મારક્ષયો ભવેત્ ।
કૃત્તિકાસોમવારેષુ શિવસ્ય યજનં નૃણામ્ ॥ ૫૧॥

મહાદારિદ્ર્યશમનં સર્વસમ્પત્કરં ભવેત્ ।
ગૃહક્ષેત્રાદિદાનાચ્ચ ગૃહોપકરણાદિના ॥ ૫૨॥

કૃત્તિકાભૌમવારેષુ સ્કન્દસ્ય યજનાન્નૃણામ્ ।
દીપઘણ્ટાદિદાનાદ્વૈ વાક્સિદ્ધિરચિરાદ્ભવેત્ ॥ ૫૩॥

કૃત્તિકાસૌમ્યવારેષુ વિષ્ણોર્વૈ યજનં નૃણામ્ ।
દધ્યોદનસ્ય દાનં ચ સત્સન્તાનકરં ભવેત્ ॥ ૫૪॥

કૃત્તિકાગુરુવારેષુ બ્રહ્મણો યજનાદ્ધનૈઃ ।
મધુસ્વર્ણાજ્યદાનેન ભોગવૃદ્ધિર્ભવેન્નૃણામ્ ॥ ૫૫॥

કૃત્તિકાશુક્રવારેષુ ગજતુણ્ડસ્ય યાજનાત્ ।
ગન્ધપુષ્પાન્નદાનેન ભોગ્યવૃદ્ધિર્ભવેન્નૃણામ્ ॥ ૫૬॥

વન્ધ્યા સુપુત્રં લભતે સ્વર્ણરૌપ્યાદિદાનતઃ ।
કૃત્તિકાશનિવારેષુ દિક્પાલાનાં ચ વન્દનમ્ ॥ ૫૭॥

દિગ્ગજાનાં ચ નાગાનાં સેતુપાનાં ચ પૂજનમ્ ।
ત્ર્યમ્બકસ્ય ચ રુદ્રસ્ય વિષ્ણોઃ પાપહરસ્ય ચ ॥ ૫૮॥

જ્ઞાનદં બ્રહ્મણશ્ચૈવ ધન્વન્તર્યશ્વિનોસ્તથા ।
રોગાપમૃત્યુહરણં તત્કાલવ્યાધિશાન્તિદમ્ ॥ ૫૯॥

લવણાયસતૈલાનાં માષાદીનાં ચ દાનતઃ ।
ત્રિકટુફલગન્ધાનાં જલાદીનાં ચ દાનતઃ ॥ ૬૦॥

દ્રવાણાં કઠિનાનાં ચ પ્રસ્થેન પલમાનતઃ ।
સ્વર્ગપ્રાપ્તિર્ધનુર્માસે હ્યુષઃકાલે ચ પૂજનમ્ ॥ ૬૧॥

શિવાદીનાં ચ સર્વેષાં ક્રમાદ્વૈ સર્વસિદ્ધયે ।
શાલ્યન્નસ્ય હવિષ્યસ્ય નૈવેદ્યં શસ્તમુચ્યતે ॥ ૬૨॥

વિવિધાન્નસ્ય નૈવેદ્યં ધનુર્માસે વિશિષ્યતે ।
માર્ગશીર્ષેઽન્નદસ્યૈવ સર્વમિષ્ટફલં ભવેત્ ॥ ૬૩॥

પાપક્ષયં ચેષ્ટસિદ્ધિં ચારોગ્યં ધર્મમેવ ચ ।
સમ્યગ્વેદપરિજ્ઞાનં સદનુષ્ઠાનમેવ ચ ॥ ૬૪॥

ઇહામુત્ર મહાભોગાનન્તે યોગં ચ શાશ્વતમ્ ।
વેદાન્તજ્ઞાનસિદ્ધિં ચ માર્ગશીર્ષાન્નદો લભેત્ ॥ ૬૫॥

માર્ગશીર્ષે હ્યુષઃકાલે દિનત્રયમથાપિ વા ।
યજેદ્ દેવાન્ભોગકામો નાધનુર્માસિકો ભવેત્ ॥ ૬૬॥

યાવત્સઙ્ગવકાલં તુ ધનુર્માસો વિધીયતે ।
ધનુર્માસે નિરાહારો માસમાત્રં જિતેન્દ્રિયઃ ॥ ૬૭॥

આમધ્યાહ્નં જપેદ્ વિપ્રો ગાયત્રીં વેદમાતરમ્ ।
પઞ્ચાક્ષરાદિકાન્મન્ત્રાન્પશ્ચાદાસુપ્તિકં જપેત્ ॥ ૬૮॥

જ્ઞાનં લબ્ધ્વા ચ દેહાન્તે વિપ્રો મુક્તિમવાપ્નુયાત્ ।
અન્યેષાં નરનારીણાં ત્રિઃસ્નાનેન જપેન ચ ॥ ૬૯॥

સદા પઞ્ચાક્ષરસ્યૈવ વિશુદ્ધં જ્ઞાનમાપ્યતે ।
ઇષ્ટમન્ત્રાન્સદા જપ્ત્વા મહાપાપક્ષયં લભેત્ ॥ ૭૦॥

ધનુર્માસે વિશેષેણ મહાનૈવેદ્યમાચરેત્ ।

શાલિતણ્ડુલભારેણ મરીચપ્રસ્થકેન ચ ॥ ૭૧॥

ગણનાદ્ દ્વાદશં સર્વં મધ્વાજ્યકુડવેન હિ ।
દ્રોણયુક્તેન મુદ્ગેન દ્વાદશવ્યઞ્જનેન ચ ॥ ૭૨॥

ઘૃતપક્વૈરપૂપૈશ્ચ મોદકૈઃ શાલિકાદિભિઃ ।
દ્વાદશૈશ્ચ દધિક્ષીરૈર્દ્વાદશપ્રસ્થકેન ચ ॥ ૭૩॥

નારિકેલફલાદીનાં તથા ગણનયા સહ ।
દ્વાદશક્રમુકૈર્યુક્તં ષટ્ત્રિંશત્પત્રકૈર્યુતમ્ ॥ ૭૪॥

કર્પૂરખુરચૂર્ણેન પઞ્ચસૌગન્ધિકૈર્યુતમ્ ।
તામ્બૂલયુક્તં તુ યદા મહાનૈવેદ્યલક્ષણમ્ ॥ ૭૫॥

મહાનૈવેદ્યમેતદ્વૈ દેવતાર્પણપૂર્વકમ્ ।
વર્ણાનુક્રમપૂર્વેણ તદ્ભક્તેભ્યઃ પ્રદાપયેત્ ॥ ૭૬॥

એવં ચૌદનનૈવેદ્યાદ્ભૂમૌ રાષ્ટ્રપતિર્ભવેત્ ।
મહાનૈવેદ્યદાનેન નરઃ સ્વર્ગમવાપ્નુયાત્ ॥ ૭૭॥

મહાનૈવેદ્યદાનેન સહસ્રેણ દ્વિજર્ષભાઃ ।
સત્યલોકં ચ તલ્લોકે પૂર્ણમાયુરવાપ્નુયાત્ ॥ ૭૮॥

સહસ્રાણાં ચ ત્રિંશત્યા મહાનૈવેદ્યદાનતઃ ।
તદૂર્ધ્વલોકમાપ્યૈવ ન પુનર્જન્મભાગ્ભવેત્ ॥ ૭૯॥

સહસ્રાણાં ચ ષટ્ત્રિંશજ્જન્મનૈવેદ્યમીરિતમ્ ।
તાવન્નૈવેદ્યદાનં તુ મહાપૂર્ણં તદુચ્યતે ॥ ૮૦॥

મહાપૂર્ણસ્ય નૈવેદ્યં જન્મનૈવેદ્યમિષ્યતે ।
જન્મનૈવેદ્યદાનેન પુનર્જન્મ ન વિદ્યતે ॥ ૮૧॥

ઊર્જે માસિ દિને પુણ્યે જન્મનૈવેદ્યમાચરેત્ ।
સઙ્ક્રાન્તિપાતજન્મર્ક્ષપૌર્ણમાસ્યાદિસંયુતે ॥ ૮૨॥

અબ્દજન્મદિને કુર્યાજ્જન્મનૈવેદ્યમુત્તમમ્ ।
માસાન્તરેષુ જન્મર્ક્ષપૂર્ણયોગદિનેઽપિ ચ ॥ ૮૩॥

મેલને ચ શનૈર્વાપિ તાવત્સાહસ્રમાચરેત્ ।
જન્મનૈવેદ્યદાનેન જન્માર્પણફલં લભેત્ ॥ ૮૪॥

જન્માર્પણાચ્છિવઃ પ્રીતઃ સ્વસાયુજ્યં દદાતિ હિ ।
ઇદં તજ્જન્મનૈવેદ્યં શિવસ્યૈવ પ્રદાપયેત્ ॥ ૮૫॥

યોનિલિઙ્ગસ્વરૂપેણ શિવો જન્મનિરૂપકઃ ।
તસ્માજ્જન્મનિવૃત્ત્યર્થં જન્મપૂજા શિવસ્ય હિ ॥ ૮૬॥

બિન્દુનાદાત્મકં સર્વં જગત્સ્થાવરજઙ્ગમમ્ ।
બિન્દુઃ શક્તિઃ શિવો નાદઃ શિવશક્ત્યાત્મકં જગત્ ॥ ૮૭॥

નાદાધારમિદં બિન્દુર્બિન્દ્વાધારમિદં જગત્ ।
જગદાધારભૂતૌ હિ બિન્દુનાદૌ વ્યવસ્થિતૌ ॥ ૮૮॥

બિન્દુનાદયુતં સર્વં સકલીકરણં ભવેત્ ।
સકલીકરણાજ્જન્મ જગત્પ્રાપ્નોત્યસંશયમ્ ॥ ૮૯॥

બિન્દુનાદાત્મકં લિઙ્ગં જગત્કારણમુચ્યતે ।
બિન્દુર્દેવી શિવો નાદઃ શિવલિઙ્ગં તુ કથ્યતે ॥ ૯૦॥

તસ્માજ્જન્મનિવૃત્ત્યર્થં શિવલિઙ્ગં પ્રપૂજયેત્ ।
માતા દેવી બિન્દુરૂપા નાદરૂપઃ શિવઃ પિતા ॥ ૯૧॥

પૂજિતાભ્યાં પિતૃભ્યાં તુ પરમાનન્દ એવ હિ ।
પરમાનન્દલાભાર્થં શિવલિઙ્ગં પ્રપૂજયેત્ ॥ ૯૨॥

સા દેવી જગતાં માતા સ શિવો જગતઃ પિતા ।
પિત્રોઃ શુશ્રૂષકે નિત્યં કૃપાધિક્યં હિ વર્ધતે ॥ ૯૩॥

કૃપયાન્તર્ગતૈશ્વર્યં પૂજકસ્ય દદાતિ હિ ।
તસ્માદન્તર્ગતાનન્દલાભાર્થં મુનિપુઙ્ગવાઃ ॥ ૯૪॥

પિતૃમાતૃસ્વરૂપેણ શિવલિઙ્ગં પ્રપૂજયેત્ ।
ભર્ગઃ પુરુષરૂપો હિ ભર્ગા પ્રકૃતિરુચ્યતે ॥ ૯૫॥

અવ્યક્તાન્તરધિષ્ઠાનં ગર્ભઃ પુરુષ ઉચ્યતે ।
સુવ્યક્તાન્તરધિષ્ઠાનં ગર્ભઃ પ્રકૃતિરુચ્યતે ॥ ૯૬॥

પુરુષસ્ત્વાદિગર્ભો હિ ગર્ભવાઞ્જનકો યતઃ ।
પુરુષાત્પ્રકૃતૌ યુક્તં પ્રથમં જન્મ કથ્યતે ॥ ૯૭॥

પ્રકૃતેર્વ્યક્તતાં યાતં દ્વિતીયં જન્મ કથ્યતે ।
જન્મ જન્તુર્મૃત્યુજન્મ પુરુષાત્પ્રતિપદ્યતે ॥ ૯૮॥

અન્યતો ભાવ્યતેઽવશ્યં માયયા જન્મ કથ્યતે ।
જીર્યતે જન્મકાલાદ્યત્તસ્માજ્જીવ ઇતિ સ્મૃતઃ ॥ ૯૯॥

જન્યતે તન્યતે પાશૈર્જીવશબ્દાર્થ એવ હિ ।
જન્મપાશનિવૃત્ત્યર્થં જન્મલિઙ્ગં પ્રપૂજયેત્ ॥ ૧૦૦॥

ભં વૃદ્ધિં ગચ્છતીત્યર્થાદ્ભગઃ પ્રકૃતિરુચ્યતે ।
પ્રાકૃતૈઃ શબ્દમાત્રાદ્યૈઃ પ્રાકૃતેન્દ્રિયભોજનાત્ ॥ ૧૦૧॥

ભગસ્યેદં ભોગમિતિ શબ્દાર્થો મુખ્યતઃ શ્રુતઃ ।
મુખ્યો ભગસ્તુ પ્રકૃતિર્ભગવાઞ્છિવ ઉચ્યતે ॥ ૧૦૨॥

ભગવાન્ભોગદાતા હિ નાન્યો ભોગપ્રદાયકઃ ।
ભગસ્વામી ચ ભગવાન્ભર્ગ ઇત્યુચ્યતે બુધૈઃ ॥ ૧૦૩॥

ભગેન સહિતં લિઙ્ગં ભગં લિઙ્ગેન સંયુતમ્ ।
ઇહામુત્ર ચ ભોગાર્થં નિત્યભોગાર્થમેવ ચ ॥ ૧૦૪॥

ભગવન્તં મહાદેવં શિવલિઙ્ગં પ્રપૂજયેત્ ।
લોકપ્રસવિતા સૂર્યસ્તચ્ચિહ્નં પ્રસવાદ્ભવેત્ ॥ ૧૦૫॥

લિઙ્ગે પ્રસૂતિકર્તારં લિઙ્ગિનં પુરુષો યજેત્ ।
લિઙ્ગાર્થગમકં ચિહ્નં લિઙ્ગમિત્યભિધીયતે ॥ ૧૦૬॥

લિઙ્ગમર્થં હિ પુરુષં શિવં ગમયતીત્યદઃ ।
શિવશક્ત્યોશ્ચ ચિહ્નસ્ય મેલનં લિઙ્ગમુચ્યતે ॥ ૧૦૭॥

સ્વચિહ્નપૂજનાત્પ્રીતશ્ચિહ્નકાર્યં ન વીયતે ।
ચિહ્નકાર્યં તુ જન્માદિ જન્માદ્યં વિનિવર્તતે ॥ ૧૦૮॥

પ્રાકૃતૈઃ પુરુષૈશ્ચાપિ બાહ્યાભ્યન્તરસમ્ભવૈઃ ।
ષોડશૈરુપચારૈશ્ચ શિવલિઙ્ગં પ્રપૂજયેત્ ॥ ૧૦૯॥

એવમાદિત્યવારે હિ પૂજા જન્મનિવર્તિકા ।
આદિવારે મહાલિઙ્ગં પ્રણવેનૈવ પૂજયેત્ ॥ ૧૧૦॥

આદિવારે પઞ્ચગવ્યૈરભિષેકો વિશિષ્યતે ।
ગોમયં ગોજલં ક્ષીરં દધ્યાજ્યં પઞ્ચગવ્યકમ્ ॥ ૧૧૧॥

ક્ષીરાદ્યં ચ પૃથક્ચૈવ મધુના ચેક્ષુસારકૈઃ ।

ગવ્યક્ષીરાન્નનૈવેદ્યં પ્રણવેનૈવ કારયેત્ ॥ ૧૧૨॥

પ્રણવં ધ્વનિલિઙ્ગં તુ નાદલિઙ્ગં સ્વયમ્ભુવઃ ।
બિન્દુલિઙ્ગં તુ યન્ત્રં સ્યાન્મકારં તુ પ્રતિષ્ઠિતમ્ ॥ ૧૧૩॥

ઉકારં ચરલિઙ્ગં સ્યાદકારં ગુરુવિગ્રહમ્ ।
ષડ્લિઙ્ગપૂજયા નિત્યં જીવન્મુક્તો ન સંશયઃ ॥ ૧૧૪॥

શિવસ્ય ભક્ત્યા પૂજા હિ જન્મમુક્તિકરી નૃણામ્ ।
રુદ્રાક્ષધારણાત્પાદમર્ધં વૈ ભૂતિધારણાત્ ॥ ૧૧૫॥

ત્રિપાદં મન્ત્રજાપ્યાચ્ચ પૂજયા પૂર્ણભક્તિમાન્ ।
શિવલિઙ્ગં ચ ભક્તં ચ પૂજ્ય મોક્ષં લભેન્નરઃ ॥ ૧૧૬॥

ય ઇમં પઠતેઽધ્યાયં શ‍ૃણુયાદ્વા સમાહિતઃ ।
તસ્યૈવ શિવભક્તિશ્ચ વર્ધતે સુદૃઢા દ્વિજાઃ ॥ ૧૧૭॥

ઇતિ શ્રીશિવમહાપુરાણે પ્રથમાયાં વિદ્યેશ્વરસંહિતાયાં પાર્થિવપૂજાપ્રકારાદિવર્ણનં નામ ષોડશોઽધ્યાયઃ ॥ ૧.૧૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
વિદ્યેશ્વરસંહિતા

## ૧.૧૭. સપ્તદશોઽધ્યાયઃ । પ્રણવપઞ્ચાક્ષરમન્ત્રમાહાત્મ્યમ્ ।

ઋષય ઊચુઃ ।
પ્રણવસ્ય ચ માહાત્મ્યં ષડ્લિઙ્ગસ્ય મહામુને ।
શિવભક્તસ્ય પૂજાં ચ ક્રમશો બ્રૂહિ નઃ પ્રભો ॥ ૧॥

સૂત ઉવાચ ।
તપોધનૈર્ભવદ્ભિશ્ચ સમ્યક્ પ્રશ્નસ્ત્વયં કૃતઃ ।
અસ્યોત્તરં મહાદેવો જાનાતિ સ્મ ન ચાપરઃ ॥ ૨॥

તથાપિ વક્ષ્યે તમહં શિવસ્ય કૃપયૈવ હિ ।
શિવોઽસ્માકં ચ યુષ્માકં રક્ષાં ગૃહ્ણાતુ ભૂરિશઃ ॥ ૩॥

પ્રો હિ પ્રકૃતિજાતસ્ય સંસારસ્ય મહોદધેઃ ।
નવં નાવાન્તરમિતિ પ્રણવં વૈ વિદુર્બુધાઃ ॥ ૪॥

પ્રઃ પ્રપઞ્ચો ન નાસ્તિ વો યુષ્માકં પ્રણવં વિદુઃ ।

પ્રકર્ષેણ નયેદ્યસ્માન્મોક્ષં વઃ પ્રણવં વિદુઃ ॥ ૫॥

સ્વમન્ત્રજાપકાનાં ચ પૂજકાનાં ચ યોગિનામ્ ।
સર્વકર્મક્ષયં કૃત્વા દિવ્યજ્ઞાનં તુ નૂતનમ્ ॥ ૬॥

તમેવ માયારહિતં નૂતનં પરિચક્ષતે ।
પ્રકર્ષેણ મહાત્માનં નવં શુદ્ધસ્વરૂપકમ્ ॥ ૭॥

નૂતનં વૈ કરોતીતિ પ્રણવં તં વિદુર્બુધાઃ ।
પ્રણવં દ્વિવિધં પ્રોક્તં સૂક્ષ્મસ્થૂલવિભેદતઃ ॥ ૮॥

સૂક્ષ્મમેકાક્ષરં વિદ્યાત્સ્થૂલં પઞ્ચાક્ષરં વિદુઃ ।
સૂક્ષ્મમવ્યક્તપઞ્ચાર્ણં સુવ્યક્તાર્ણં તથેતરત્ ॥ ૯॥

જીવન્મુક્તસ્ય સૂક્ષ્મં હિ સર્વસારં હિતસ્ય હિ ।
મન્ત્રેણાર્થાનુસન્ધાનં સ્વદેહવિલયાવધિ ॥ ૧૦॥

સ્વદેહે ગલિતે પૂર્ણં શિવં પ્રાપ્નોતિ નિશ્ચયઃ ।
કેવલં મન્ત્રજાપી તુ યોગં પ્રાપ્નોતિ નિશ્ચયઃ ॥ ૧૧॥

ષટ્ત્રિંશત્કોટિજાપી તુ નિશ્ચયં યોગમાપ્નુયાત્ ।
સૂક્ષ્મં ચ દ્વિવિધં જ્ઞેયં હ્રસ્વદીર્ઘવિભેદતઃ ॥ ૧૨॥

અકારશ્ચ ઉકારશ્ચ મકારશ્ચ તતઃ પરમ્ ।
બિન્દુનાદયુતં તદ્ધિ શબ્દકાલકલાન્વિતમ્ ॥ ૧૩॥

દીર્ઘપ્રણવમેવં હિ યોગિનામેવ હૃદ્ગતમ્ ।
મકારં તન્ત્રિતત્ત્વં હિ હ્રસ્વપ્રણવ ઉચ્યતે ॥ ૧૪॥

શિવઃ શક્તિસ્તયોરૈક્યં મકારં તુ ત્રિકાત્મકમ્ ।
હ્રસ્વમેવં હિ જાપ્યં સ્યાત્સર્વપાપક્ષયૈષિણામ્ ॥ ૧૫॥

ભૂવાયુકનકાર્ણોદ્યોઃ શબ્દાદ્યાશ્ચ તથા દશ ।
આશાન્વયે દશ પુનઃ પ્રવૃત્તા ઇતિ કથ્યતે ॥ ૧૬॥

હ્રસ્વમેવ પ્રવૃત્તાનાં નિવૃત્તાનાં તુ દીર્ઘકમ્ ।
વ્યાહૃત્યાદૌ ચ મન્ત્રાદૌ કામં શબ્દકલાયુતમ્ ॥ ૧૭॥

વેદાદૌ ચ પ્રયોજ્યં સ્યાદ્વન્દને સન્ધ્યયોરપિ ।
નવકોટિજપાઞ્જપ્ત્વા સંશુદ્ધઃ પુરુષો ભવેત્ ॥ ૧૮॥

પુનશ્ચ નવકોટ્યા તુ પૃથિવીજયમાપ્નુયાત્ ।
પુનશ્ચ નવકોટ્યા તુ હ્યપાં જયમવાપ્નુયાત્ ॥ ૧૯॥

પુનશ્ચ નવકોટ્યા તુ તેજસાં જયમાપ્નુયાત્ ।
પુનશ્ચ નવકોટ્યા તુ વાયોર્જયમવાપ્નુયાત્ ।
આકાશજયમાપ્નોતિ નવકોટિજપેન વૈ ॥ ૨૦॥

ગન્ધાદીનાં ક્રમેણૈવ નવકોટિજપેન વૈ ।
અહઙ્કારસ્ય ચ પુનર્નવકોટિજપેન વૈ ॥ ૨૧॥

સહસ્રમન્ત્રજપ્તેન નિત્યશુદ્ધો ભવેત્પુમાન્ ।
તતઃ પરં સ્વસિદ્ધ્યર્થં જપો ભવતિ હિ દ્વિજાઃ ॥ ૨૨॥

એવમષ્ટોત્તરશતકોટિજપ્તેન વૈ પુનઃ ।
પ્રણવેન પ્રબુદ્ધસ્તુ શુદ્ધયોગમવાપ્નુયાત્ ॥ ૨૩॥

શુદ્ધયોગેન સંયુક્તો જીવન્મુક્તો ન સંશયઃ ।
સદા જપન્સદા ધ્યાયઞ્છિવં પ્રણવરૂપિણમ્ ॥ ૨૪॥

સમાધિસ્થો મહાયોગી શિવ એવ ન સંશયઃ ।
ઋષિચ્છન્દો દેવતાદિ ન્યસ્ય દેહે પુનર્જપેત્ ॥ ૨૫॥

પ્રણવં માતૃકાયુક્તં દેહે ન્યસ્ય ઋષિર્ભવેત્ ।
દશમાતૃષડધ્વાદિ સર્વં ન્યાસફલં લભેત્ ॥ ૨૬॥

પ્રવૃત્તાનાં ચ મિશ્રાણાં સ્થૂલપ્રણવમિષ્યતે ।
ક્રિયાતપોજપૈર્યુક્તાસ્ત્રિવિધાઃ શિવયોગિનઃ ॥ ૨૭॥

ધનાદિવિભવૈશ્ચૈવ કરાદ્યઙ્ગૈર્નમાદિભિઃ ।
ક્રિયયા પૂજયા યુક્તઃ ક્રિયાયોગીતિ કથ્યતે ॥ ૨૮॥

પૂજાયુક્તશ્ચ મિતભુગ્બાહ્યેન્દ્રિયજયાન્વિતઃ ।
પરદ્રોહાદિરહિતસ્તપોયોગીતિ કથ્યતે ॥ ૨૯॥

એતૈર્યુક્તઃ સદા શુદ્ધઃ સર્વકામાદિવર્જિતઃ ।
સદા જપપરઃ શાન્તો જપયોગીતિ તં વિદુઃ ॥ ૩૦॥

ઉપચારૈઃ ષોડશભિઃ પૂજયા શિવયોગિનામ્ ।
સાલોક્યાદિક્રમેણૈવ શુદ્ધો મુક્તિં લભેન્નરઃ ॥ ૩૧॥

જપયોગમથો વક્ષ્યે ગદતઃ શ ૃણુત દ્વિજાઃ ।

તપઃ કર્તુર્જપઃ પ્રોક્તો યજ્જપન્પરિમાર્જતે ॥ ૩૨॥

શિવનામ નમઃપૂર્વં ચતુર્થ્યાં પઞ્ચતત્ત્વકમ્ ।
સ્થૂલપ્રણવરૂપં હિ શિવપઞ્ચાક્ષરં દ્વિજાઃ ॥ ૩૩॥

પઞ્ચાક્ષરજપેનૈવ સર્વસિદ્ધિં લભેન્નરઃ ।
પ્રણવેનાદિસંયુક્તં સદા પઞ્ચાક્ષરં જપેત્ ॥ ૩૪॥

ગુરૂપદેશં સઙ્ગમ્ય સુખવાસે સુભૂતલે ।
પૂર્વપક્ષે સમારભ્ય કૃષ્ણભૂતાવધિ દ્વિજાઃ ॥ ૩૫॥

માઘં ભાદ્રં વિશિષ્ટં તુ સર્વકાલોત્તમોત્તમમ્ ।
એકવારં મિતાશી તુ વાગ્યતો નિયતેન્દ્રિયઃ ॥ ૩૬॥

સ્વસ્ય રાજપિતૃણાં ચ નિત્યં શુશ્રૂષણં ચરેત્ ।
સહસ્રજપમાત્રેણ ભવેચ્છુદ્ધોઽન્યથા ઋણી ॥ ૩૭॥

પઞ્ચાક્ષરં પઞ્ચલક્ષં જપેચ્છિવમનુસ્મરન્ ।
પદ્માસનસ્થં શિવદં ગઙ્ગાચન્દ્રકલાન્વિતમ્ ॥ ૩૮॥

વામોરુસ્થિતશક્ત્યા ચ વિરાજન્તં મહાગણૈઃ ।
મૃગટઙ્કધરં દેવં વરદાભયપાણિકમ્ ॥ ૩૯॥

સદાનુગ્રહકર્તારં સદાશિવમનુસ્મરન્ ।
સમ્પૂજ્ય મનસા પૂર્વં હૃદિ વા સૂર્યમણ્ડલે ॥ ૪૦॥

જપેત્પઞ્ચાક્ષરીં વિદ્યાં પ્રાઙ્મુખઃ શુદ્ધકર્મકૃત્ ।
પ્રાતઃ કૃષ્ણચતુર્દશ્યાં નિત્યકર્મ સમાપ્ય ચ ॥ ૪૧॥

મનોરમે શુચૌ દેશે નિયતઃ શુદ્ધમાનસઃ ।
પઞ્ચાક્ષરસ્ય મન્ત્રસ્ય સહસ્રં દ્વાદશં જપેત્ ॥ ૪૨॥

વરયેચ્ચ સપત્નીકાન્ શૈવાન્વૈ બ્રાહ્મણોત્તમાન્ ।
એકં ગુરુવરં શિષ્ટં વરયેત્સામ્બમૂર્તિકમ્ ॥ ૪૩॥

ઈશાનં ચાથ પુરુષમઘોરં વામમેવ ચ ।
સદ્યોજાતં ચ પઞ્ચૈવ શિવભક્તાન્દ્વિજોત્તમાન્ ॥ ૪૪॥

પૂજાદ્રવ્યાણિ સમ્પાદ્ય શિવપૂજાં સમારભેત્ ।
શિવપૂજાં ચ વિધિવત્કૃત્વા હોમં સમારભેત્ ॥ ૪૫॥

મુખાન્તં ચ સ્વસૂત્રેણ કૃત્વા હોમં સમાચરેત્ ।
દશૈકં વા શતૈકં વા સહસ્રૈકમથાપિ વા ॥ ૪૬॥

કાપિલેન ઘૃતેનૈવ જુહુયાત્સ્વયમેવ હિ ।
કારયેચ્છિવભક્તૈર્વાપ્યષ્ટોત્તરશતં બુધઃ ॥ ૪૭॥

હોમાન્તે દક્ષિણા દેયા ગુરોર્ગોમિથુનં તથા ।
ઈશાનાદિસ્વરૂપાંસ્તાન્ગુરું સામ્બં વિભાવ્ય ચ ॥ ૪૮॥

તેષાં પત્સિક્તતોયેન સ્વશિરઃ સ્નાનમાચરેત્ ।
ષટ્ત્રિંશત્કોટિતીર્થેષુ સદ્યઃ સ્નાનફલં લભેત્ ॥ ૪૯॥

દશાઙ્ગમન્નં તેષાં વૈ દદ્યાદ્વૈ ભક્તિપૂર્વકમ્ ।
પરાબુદ્ધ્યા ગુરોઃ પત્નીમીશાનાદિક્રમેણ તુ ॥ ૫૦॥

પરમાન્નેન સમ્પૂજ્ય યથાવિભવવિસ્તરમ્ ।
રુદ્રાક્ષવસ્ત્રપૂર્વં ચ વટકાપૂપકૈર્યુતમ્ ॥ ૫૧॥

બલિદાનં તતઃ કૃત્વા ભૂરિ ભોજનમાચરેત્ ।
તતઃ સમ્પ્રાર્થ્ય દેવેશં જપં તાવત્સમાપયેત્ ॥ ૫૨॥

પુરશ્ચરણમેવં તુ કૃત્વા મન્ત્રી ભવેન્નરઃ ।
પુનશ્ચ પઞ્ચલક્ષેણ સર્વપાપક્ષયો ભવેત્ ॥ ૫૩॥

અતલાદિ સમારભ્ય સત્યલોકાવધિ ક્રમાત્ ।
પઞ્ચલક્ષજપાત્તત્તલ્લોકૈશ્વર્યમવાપ્નુયાત્ ॥ ૫૪॥

મધ્યેમૃતશ્ચેદ્ભોગાન્તે ભૂમૌ તજ્જાપકો ભવેત્ ।
પુનશ્ચ પઞ્ચલક્ષેણ બ્રહ્મસામીપ્યમાપ્નુયાત્ ॥ ૫૫॥

પુનશ્ચ પઞ્ચલક્ષેણ સારૂપ્યૈશ્વર્યમાપ્નુયાત્ ।
આહત્ય શતલક્ષેણ સાક્ષાદ્ બ્રહ્મસમો ભવેત્ ॥ ૫૬॥

કાર્યબ્રહ્મણ એવં હિ સાયુજ્યં પ્રતિપદ્ય વૈ ।
યથેષ્ટં ભોગમાપ્નોતિ તદ્ બ્રહ્મ પ્રલયાવધિ ॥ ૫૭॥

પુનઃ કલ્પાન્તરે વૃત્તે બ્રહ્મપુત્રઃ સ જાયતે ।
પુનશ્ચ તપસા દીપ્તઃ ક્રમાન્મુક્તો ભવિષ્યતિ ॥ ૫૮॥

પૃથ્વ્યાદિકાર્યભૂતેભ્યો લોકા વૈ નિર્મિતાઃ ક્રમાત્ ।
પાતાલાદિ ચ સત્યાન્તં બ્રહ્મલોકાશ્ચતુર્દશ ॥ ૫૯॥

સત્યાદૂર્ધ્વં ક્ષમાન્તં વૈ વિષ્ણુલોકાશ્ચતુર્દશ ।
ક્ષમાલોકે કાર્યવિષ્ણુર્વૈકુણ્ઠે વરપત્તને ॥ ૬૦॥

કાર્યલક્ષ્મ્યા મહાભોગી રક્ષાં કૃત્વાધિતિષ્ઠતિ ।
તદૂર્ધ્વગાશ્ચ શુચ્યન્તા લોકાષ્ટાવિંશતિઃ સ્થિતાઃ ॥ ૬૧॥

શુચૌ લોકે તુ કૈલાસે રુદ્રો વૈ ભૂતહૃત્સ્થિતઃ ।
ષડુત્તરાશ્ચ પઞ્ચાશદહિંસાન્તાસ્તદૂર્ધ્વગાઃ ॥ ૬૨॥

અહિંસાલોકમાસ્થાય જ્ઞાનકૈલાસકે પુરે ।
કાર્યેશ્વરસ્તિરોભાવં સર્વાન્કૃત્વાધિતિષ્ઠતિ ॥ ૬૩॥

તદન્તે કાલચક્રં હિ કાલાતીતસ્તતઃ પરમ્ ।
શિવેનાધિષ્ઠિતસ્તત્ર કાલશ્ચક્રેશ્વરાહ્વયઃ ॥ ૬૪॥

માહિષં ધર્મમાસ્થાય સર્વાન્કાલેન યુઞ્જતિ ।
અસત્યશ્ચાશુચિશ્ચૈવ હિંસા ચૈવાથ નિર્ઘૃણા ॥ ૬૫॥

અસત્યાદિચતુષ્પાદઃ સર્વાંશઃ કામરૂપધૃક્ ।
નાસ્તિક્યલક્ષ્મીર્દુઃસઙ્ગો વેદબાહ્યધ્વનિઃ સદા ॥ ૬૬॥

ક્રોધસઙ્ગઃ કૃષ્ણવર્ણો મહામહિષવેષવાન્ ।
તાવન્મહેશ્વરઃ પ્રોક્તસ્તિરોધાસ્તાવદેવ હિ ॥ ૬૭॥

તદર્વાક્કર્મભોગો હિ તદૂર્ધ્વં જ્ઞાનભોગકમ્ ।
તદર્વાક્કર્મમાયા હિ જ્ઞાનમાયા તદૂર્ધ્વકમ્ ॥ ૬૮॥

મા લક્ષ્મીઃ કર્મભોગો વૈ યાતિ માયેતિ કથ્યતે ।
મા લક્ષ્મીર્જ્ઞાનભોગો વૈ યાતિ માયેતિ કથ્યતે ॥ ૬૯॥

તદૂર્ધ્વં નિત્યભોગો હિ તદર્વાઙ્ નશ્વરં વિદુઃ ।
તદર્વાક્ચ તિરોધાનં તદૂર્ધ્વં ન તિરોધનમ્ ॥ ૭૦॥

તદર્વાક્ પાશબન્ધો હિ તદૂર્ધ્વં નહિ બન્ધનમ્ ।
તદર્વાક્ પરિવર્તન્તે કામ્યકર્માનુસારિણઃ ॥ ૭૧॥

નિષ્કામકર્મભોગસ્તુ તદૂર્ધ્વં પરિકીર્તિતઃ ।
તદર્વાક્ પરિવર્તન્તે બિન્દુપૂજાપરાયણાઃ ॥ ૭૨॥

તદૂર્ધ્વં હિ વ્રજન્ત્યેવ નિષ્કામા લિઙ્ગપૂજકાઃ ।

તદર્વાક્ પરિવર્તન્તે શિવાન્યસુરપૂજકાઃ ॥ ૭૩॥

શિવૈકનિરતા યે ચ તદૂર્ધ્વં સમ્પ્રયાન્તિ તે ।
તદર્વાગ્જીવકોટિઃ સ્યાત્તદૂર્ધ્વં પરકોટિકાઃ ॥ ૭૪॥

સાંસારિકાસ્તદર્વાક્ ચ મુક્તાઃ ખલુ તદૂર્ધ્વગાઃ ।
તદર્વાક્ પરિવર્તન્તે પ્રાકૃતદ્રવ્યપૂજકાઃ ॥ ૭૫॥

તદૂર્ધ્વં હિ વ્રજન્ત્યેતે પૌરુષદ્રવ્યપૂજકાઃ ।
તદર્વાક્છક્તિલિઙ્ગં તુ શિવલિઙ્ગં તદૂર્ધ્વકમ્ ॥ ૭૬॥

તદર્વાગાવૃતં લિઙ્ગં તદૂર્ધ્વં હિ નિરાકૃતિ ।
તદર્વાક્કલ્પિતં લિઙ્ગં તદૂર્ધ્વં વૈ ન કલ્પિતમ્ ॥ ૭૭॥

તદર્વાગ્બાહ્યલિઙ્ગં સ્યાદન્તરઙ્ગં તદૂર્ધ્વકમ્ ।
તદર્વાક્છક્તિલોકા હિ શતં વૈ દ્વાદશાધિકમ્ ॥ ૭૮॥

તદર્વાગ્બિન્દુરૂપં હિ નાદરૂપં તદુત્તરમ્ ।
તદર્વાક્કર્મલોકસ્તુ તદૂર્ધ્વં જ્ઞાનલોકકઃ ॥ ૭૯॥

નમસ્કારસ્તદૂર્ધ્વં હિ મદાહઙ્કારનાશનઃ ।
જનં તસ્માત્ તિરોધાનં પ્રત્યાયાતિ ન ના યતઃ ॥ ૮૦॥

જ્ઞાનશબ્દાર્થ એવં હિ તિરોધાનનિવારણાત્ ।
તદર્વાક્ પરિવર્તન્તે હ્યાધિભૌતિકપૂજકાઃ ॥ ૮૧॥

આધ્યાત્મિકાર્ચકા એવ તદૂર્ધ્વં સમ્પ્રયાન્તિ વૈ ।
તાવદ્વૈ વેદિભાગં તન્મહાલોકાત્મલિઙ્ગકે ॥ ૮૨॥

પ્રકૃત્યાદ્યષ્ટબન્ધોઽપિ વેદ્યતે સમ્પ્રતિષ્ઠિતઃ ।
એવમેતાદૃશં જ્ઞેયં સર્વં લૌકિકવૈદિકમ્ ॥ ૮૩॥

અધર્મમહિષારૂઢં કાલચક્રં તરન્તિ તે ।
સત્યાદિધર્મયુક્તા યે શિવપૂજાપરાશ્ચ યે ॥ ૮૪॥

તદૂર્ધ્વં વૃષભો ધર્મો બ્રહ્મચર્યસ્વરૂપધૃક્ ।
સત્યાદિપાદયુક્તસ્તુ શિવલોકાગ્રતઃ સ્થિતઃ ॥ ૮૫॥

ક્ષમાશૃઙ્ગઃ શમશ્રોત્રો વેદધ્વનિવિભૂષિતઃ ।
આસ્તિક્યચક્ષુર્નિશ્વાસગુરુબુદ્ધિમના વૃષઃ ॥ ૮૬॥

ક્રિયાદિવૃષભા જ્ઞેયાઃ કારણાદિષુ સર્વદા ।
તં ક્રિયાવૃષભં ધર્મં કાલાતીતોઽધિતિષ્ઠતિ ॥ ૮૭॥

બ્રહ્મવિષ્ણુમહેશાનાં સ્વસ્વાયુર્દિનમુચ્યતે ।
તદૂર્ધ્વં ન દિનં રાત્રિર્ન જન્મમરણાદિકમ્ ॥ ૮૮॥

પુનઃ કારણસત્યાન્તાઃ કારણબ્રહ્મણસ્તથા ।
ગન્ધાદિભ્યસ્તુ ભૂતેભ્યસ્તદૂર્ધ્વં નિર્મિતાઃ સદા ॥ ૮૯॥

સૂક્ષ્મગન્ધસ્વરૂપા હિ સ્થિતા લોકાશ્ચતુર્દશ ।
પુનઃ કારણવિષ્ણોર્વૈ સ્થિતા લોકાશ્ચતુર્દશ ॥ ૯૦॥

પુનઃ કારણરુદ્રસ્ય લોકાષ્ટાવિંશકા મતાઃ ।
પુનશ્ચ કારણેશસ્ય ષટ્પઞ્ચાશત્તદૂર્ધ્વગાઃ ॥ ૯૧॥

તતઃ પરં બ્રહ્મચર્યલોકાખ્યં શિવસમ્મતમ્ ।
તત્રૈવ જ્ઞાનકૈલાસે પઞ્ચાવરણસંયુતે ॥ ૯૨॥

પઞ્ચમણ્ડલસંયુક્તં પઞ્ચબ્રહ્મકલાન્વિતમ્ ।
આદિશક્તિસમાયુક્તમાદિલિઙ્ગં તુ તત્ર વૈ ॥ ૯૩॥

શિવાલયમિદં પ્રોક્તં શિવસ્ય પરમાત્મનઃ ।
પરશક્ત્યા સમાયુક્તસ્તત્રૈવ પરમેશ્વરઃ ॥ ૯૪॥

સૃષ્ટિઃ સ્થિતિશ્ચ સંહારસ્તિરોભાવોઽપ્યનુગ્રહઃ ।
પઞ્ચકૃત્યપ્રવીણોઽસૌ સચ્ચિદાનન્દવિગ્રહઃ ॥ ૯૫॥

ધ્યાનધર્મઃ સદા યસ્ય સદાનુગ્રહતત્પરઃ ।
સમાધ્યાસનમાસીનઃ સ્વાત્મારામો વિરાજતે ॥ ૯૬॥

તસ્ય સન્દર્શનં સાધ્યં કર્મધ્યાનાદિભિઃ ક્રમાત્ ।
નિત્યાદિકર્મયજનાચ્છિવકર્મમતિર્ભવેત્ ॥ ૯૭॥

ક્રિયાદિશિવકર્મભ્યઃ શિવજ્ઞાનં પ્રસાધયેત્ ।
તદ્દર્શનગતાઃ સર્વે મુક્તા એવ ન સંશયઃ ॥ ૯૮॥

મુક્તિરાત્મસ્વરૂપેણ સ્વાત્મારામત્વમેવ હિ ।
ક્રિયાતપોજપજ્ઞાનધ્યાનધર્મેષુ સુસ્થિતઃ ॥ ૯૯॥

શિવસ્ય દર્શનં લબ્ધ્વા સ્વાત્મારામત્વમેવ હિ ।
યથા રવિઃ સ્વકિરણાદશુદ્ધિમપનેષ્યતિ ॥ ૧૦૦॥

કૃપાવિચક્ષણઃ શમ્ભુરજ્ઞાનમપનેષ્યતિ ।
અજ્ઞાનવિનિવૃત્તૌ તુ શિવજ્ઞાનં પ્રવર્તતે ॥ ૧૦૧॥

શિવજ્ઞાનાત્સ્વસ્વરૂપમાત્મારામત્વમેષ્યતિ ।
આત્મારામત્વસંસિદ્ધૌ કૃતકૃત્યો ભવેન્નરઃ ॥ ૧૦૨॥

પુનશ્ચ શતલક્ષેણ બ્રહ્મણઃ પદમાપ્નુયાત્ ।
પુનશ્ચ શતલક્ષેણ વિષ્ણોઃ પદમવાપ્નુયાત્ ॥ ૧૦૩॥

પુનશ્ચ શતલક્ષેણ રુદ્રસ્ય પદમાપ્નુયાત્ ।
પુનશ્ચ શતલક્ષેણ ઐશ્વર્યં પદમાપ્નુયાત્ ॥ ૧૦૪॥

પુનશ્ચૈવંવિધેનૈવ જપેન સુસમાહિતઃ ।
શિવલોકાદિભૂતં હિ કાલચક્રમવાપ્નુયાત્ ॥ ૧૦૫॥

કાલચક્રં પઞ્ચચક્રમેકૈકેન ક્રમોત્તરે ।
સૃષ્ટિમોહૌ બ્રહ્મચક્રં ભોગમોહૌ તુ વૈષ્ણવમ્ ॥ ૧૦૬॥

કોપમોહૌ રૌદ્રચક્રં ભ્રમણં ચૈશ્વરં વિદુઃ ।
શિવચક્રં જ્ઞાનમોહૌ પઞ્ચચક્રં વિદુર્બુધાઃ ॥ ૧૦૭॥

પુનશ્ચ દશકોટ્યા હિ કારણબ્રહ્મણઃ પદમ્ ।
પુનશ્ચ દશકોટ્યા હિ તત્પદૈશ્વર્યમાપ્નુયાત્ ॥ ૧૦૮॥

એવં ક્રમેણ વિષ્ણ્વાદેઃ પદં લબ્ધ્વા મહૌજસઃ ।
ક્રમેણ તત્પદૈશ્વર્યં લબ્ધ્વા ચૈવ મહાત્મનઃ ॥ ૧૦૯॥

શતકોટિમનું જપ્ત્વા પઞ્ચોત્તરમતન્દ્રિતઃ ।
શિવલોકમવાપ્નોતિ પઞ્ચમાવરણાદ્ બહિઃ ॥ ૧૧૦॥

રાજસં મણ્ડપં તત્ર નન્દિસંસ્થાનમુત્તમમ્ ।
તપોરૂપશ્ચ વૃષભસ્તત્રૈવ પરિદૃશ્યતે ॥ ૧૧૧॥

સદ્યોજાતસ્ય તત્સ્થાનં પઞ્ચમાવરણં પરમ્ ।
વામદેવસ્ય ચ સ્થાનં ચતુર્થાવરણં પુનઃ ॥ ૧૧૨॥

અઘોરનિલયં પશ્ચાત્ તૃતીયાવરણં પરમ્ ।
પુરુષસ્યૈવ સામ્બસ્ય દ્વિતીયાવરણં શુભમ્ ॥ ૧૧૩॥

ઈશાનસ્ય પરસ્યૈવ પ્રથમાવરણં તતઃ ।

ધ્યાનધર્મસ્ય ચ સ્થાનં પઞ્ચમં મણ્ડપં તતઃ ॥ ૧૧૪॥

બલિનાથસ્ય સંસ્થાનં તત્ર પૂર્ણામૃતપ્રદમ્ ।
ચતુર્થં મણ્ડપં પશ્ચાચ્ચન્દ્રશેખરમૂર્તિમત્ ॥ ૧૧૫॥

સોમસ્કન્દસ્ય ચ સ્થાનં તૃતીયં મણ્ડપં પરમ્ ।
દ્વિતીયં મણ્ડપં નૃત્યમણ્ડપં પ્રાહુરાસ્તિકાઃ ॥ ૧૧૬॥

પ્રથમં મૂલમાયાયાઃ સ્થાનં તત્રૈવ શોભનમ્ ।
તત પરં ગર્ભગૃહં લિઙ્ગસ્થાનં પરં શુભમ્ ॥ ૧૧૭॥

નન્દિસંસ્થાનતઃ પશ્ચાન્ન વિદુઃ શિવવૈભવમ્ ।
નન્દીશ્વરો બહિસ્તિષ્ઠન્પઞ્ચાક્ષરમુપાસતે ॥ ૧૧૮॥

એવં ગુરુક્રમાલ્લબ્ધં નન્દીશાચ્ચ મયા પુનઃ ।
તતઃ પરં સ્વસંવેદ્યં શિવેનૈવાનુભાવિતમ્ ॥ ૧૧૯॥

શિવસ્ય કૃપયા સાક્ષાચ્છિવલોકસ્ય વૈભવમ્ ।
વિજ્ઞાતું શક્યતે સર્વૈર્નાન્યથેત્યાહુરાસ્તિકાઃ ॥ ૧૨૦॥

એવં ક્રમેણ મુક્તાઃ સ્યુર્બ્રાહ્મણા વૈ જિતેન્દ્રિયાઃ ।
અન્યેષાં ચ ક્રમં વક્ષ્યે ગદતઃ શ૒ૃણુતાદરાત્ ॥ ૧૨૧॥

ગુરૂપદેશાજ્જાપ્યં વૈ બ્રાહ્મણાનાં નમોઽન્તકમ્ ।
પઞ્ચાક્ષરં પઞ્ચલક્ષમાયુષ્યં પ્રજપેદ્વિધિઃ ॥ ૧૨૨॥

સ્ત્રીત્વાપનયનાર્થં તુ પઞ્ચલક્ષં જપેત્પુનઃ ।
મન્ત્રેણ પુરુષો ભૂત્વા ક્રમાન્મુક્તો ભવેદ્ બુધઃ ॥ ૧૨૩॥

ક્ષત્રિયઃ પઞ્ચલક્ષેણ ક્ષત્રત્વમપનેષ્યતિ ।
પુનશ્ચ પઞ્ચલક્ષેણ ક્ષત્રિયો બ્રાહ્મણો ભવેત્ ॥ ૧૨૪॥

મન્ત્રસિદ્ધિર્જપાચ્ચૈવ ક્રમાન્મુક્તો ભવેન્નરઃ ।
વૈશ્યસ્તુ પઞ્ચલક્ષેણ વૈશ્યત્વમપનેષ્યતિ ॥ ૧૨૫॥

પુનશ્ચ પઞ્ચલક્ષેણ મન્ત્રક્ષત્રિય ઉચ્યતે ।
પુનશ્ચ પઞ્ચલક્ષેણ ક્ષત્રત્વમપનેષ્યતિ ॥ ૧૨૬॥

પુનશ્ચ પઞ્ચલક્ષેણ મન્ત્રબ્રાહ્મણ ઉચ્યતે ।
શૂદ્રશ્ચૈવ નમોઽન્તેન પઞ્ચવિંશતિલક્ષતઃ ॥ ૧૨૭॥

મન્ત્રવિપ્રત્વમાપદ્ય પશ્ચાચ્છુદ્ધો ભવેદ્ દ્વિજઃ ।
નારી વાથ નરો વાથ બ્રાહ્મણો વાન્ય એવ વા ॥ ૧૨૮॥

નમોઽન્તં વા નમઃ પૂર્વમાતુરઃ સર્વદા જપેત્ ।
તત્ર સ્ત્રીણાં તથૈવોહ્ય ગુરુર્નિર્દર્શયેત્ક્રમાત્ ॥ ૧૨૯॥

સાધકઃ પઞ્ચલક્ષાન્તે શિવપ્રીત્યર્થમેવ હિ ।
મહાભિષેકનૈવેદ્યં કૃત્વા ભક્તાંશ્ચ પૂજયેત્ ॥ ૧૩૦॥

પૂજયા શિવભક્તસ્ય શિવઃ પ્રીતતરો ભવેત્ ।
શિવસ્ય શિવભક્તસ્ય ભેદો નાસ્તિ શિવો હિ સઃ ॥ ૧૩૧॥

શિવસ્વરૂપમન્ત્રસ્ય ધારણાચ્છિવ એવ હિ ।
શિવભક્તશરીરે હિ શિવે તત્પરમો ભવેત્ ॥ ૧૩૨॥

શિવભક્તાઃ ક્રિયાઃ સર્વા વેદ સર્વક્રિયાં વિદુઃ ।
યાવદ્યાવચ્છિવં મન્ત્રં યેન જપ્તં ભવેત્ક્રમાત્ ॥ ૧૩૩॥

તાવદ્વૈ શિવસાન્નિધ્યં તસ્મિન્દેહે ન સંશયઃ ।
દેવીલિઙ્ગં ભવેદ્ રૂપં શિવભક્તસ્ત્રિયાસ્તથા ॥ ૧૩૪॥

યાવન્મન્ત્રં જપેદ્દેવ્યાસ્તાવત્સાન્નિધ્યમસ્તિ હિ ।
શિવં સમ્પૂજયેદ્ધીમાન્સ્વયં વૈ શબ્દરૂપભાક્ ॥ ૧૩૫॥

સ્વયં ચૈવ શિવો ભૂત્વા પરાં શક્તિં પ્રપૂજયેત્ ।
શક્તિં વેરં ચ લિઙ્ગં ચ હ્યાલેખ્યામાયયા યજેત્ ॥ ૧૩૬॥

શિવલિઙ્ગં શિવં મત્વા સ્વાત્માનં શક્તિરૂપકમ્ ।
શક્તિલિઙ્ગં ચ દેવીં ચ મત્વા સ્વં શિવરૂપકમ્ ॥ ૧૩૭॥

શિવલિઙ્ગં નાદરૂપં બિન્દુરૂપં સશક્તિકમ્ ।
ઉપપ્રધાનભાવેન અન્યોન્યાસક્તલિઙ્ગકમ્ ॥ ૧૩૮॥

પૂજયેચ્ચ શિવં શક્તિં સ શિવો મૂલભાવનાત્ ।
શિવભક્તાઞ્છિવમન્ત્રરૂપકાઞ્છિવરૂપકાન્ ॥ ૧૩૯॥

ષોડશૈરુપચારૈશ્ચ પૂજયેદિષ્ટમાપ્નુયાત્ ।
યેન શુશ્રૂષણાદ્યૈશ્ચ શિવભક્તસ્ય લિઙ્ગિનઃ ॥ ૧૪૦॥

આનન્દં જનયેદ્વિદ્વાઞ્છિવઃ પ્રીતતરો ભવેત્ ।
શિવભક્તાન્સપત્નીકાન્પત્ન્યા સહ સદૈવ તત્ ॥ ૧૪૧॥

પૂજયેદ્ભોજનાદ્યૈશ્ચ પઞ્ચ વા દશ વા શતમ્ ।
ધને દેહે ચ મન્ત્રે ચ ભાવનાયામવઞ્ચકઃ ॥ ૧૪૨॥

શિવશક્તિસ્વરૂપેણ ન પુનર્જાયતે ભુવિ ।
નાભેરધો બ્રહ્મભાગમાકણ્ઠં વિષ્ણુભાગકમ્ ॥ ૧૪૩॥

મુખં લિઙ્ગમિતિ પ્રોક્તં શિવભક્તશરીરકમ્ ।
મૃતાન્દાહાદિયુક્તાન્વા દાહાદિરહિતાન્મૃતાન્ ॥ ૧૪૪॥

ઉદ્દિશ્ય પૂજયેદાદિપિતરં શિવમેવ હિ ।
પૂજાં કૃત્વાદિમાતુશ્ચ શિવભક્તાંશ્ચ પૂજયેત્ ॥ ૧૪૫॥

પિતૃલોકં સમાસાદ્ય ક્રમાન્મુક્તો ભવેન્મૃતઃ ।
ક્રિયાયુક્તદશભ્યશ્ચ તપોયુક્તો વિશિષ્યતે ॥ ૧૪૬॥

તપોયુક્તશતેભ્યશ્ચ જપયુક્તો વિશિષ્યતે ।
જપયુક્તસહસ્રેભ્યઃ શિવજ્ઞાની વિશિષ્યતે ॥ ૧૪૭॥

શિવજ્ઞાનિષુ લક્ષેષુ ધ્યાનયુક્તો વિશિષ્યતે ।
ધ્યાનયુક્તેષુ કોટિભ્યઃ સમાધિસ્થો વિશિષ્યતે ॥ ૧૪૮॥

ઉત્તરોત્તરવૈશિષ્ટ્યાત્પૂજાયામુત્તરોત્તરમ્ ।
ફલં વૈશિષ્ટ્યરૂપં ચ દુર્વિજ્ઞેયં મનીષિભિઃ ॥ ૧૪૯॥

તસ્માદ્વૈ શિવભક્તસ્ય માહાત્મ્યં વેત્તિ કો નરઃ ।
શિવશક્ત્યોઃ પૂજનં ચ શિવભક્તસ્ય પૂજનમ્ ॥ ૧૫૦॥

કુરુતે યો નરો ભક્ત્યા સ શિવઃ શિવમેધતે ।
ય ઇમં પઠતેઽધ્યાયમર્થવદ્વેદસમ્મતમ્ ॥ ૧૫૧॥

શિવજ્ઞાની ભવેદ્વિપ્રઃ શિવેન સહ મોદતે ।
શ્રાવયેચ્છિવભક્તાંશ્ચ વિશેષજ્ઞો મનીશ્વરાઃ ॥ ૧૫૨॥

શિવપ્રસાદસિદ્ધિઃ સ્યાચ્છિવસ્ય કૃપયા બુધાઃ ॥ ૧૫૩॥

ઇતિ શ્રીશિવમહાપુરાણે પ્રથમાયાં વિદ્યેશ્વરસંહિતાયાં પ્રણવપઞ્ચાક્ષરમન્ત્રમાહાત્મ્યવર્ણનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૧.૧૭॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

વિદ્યેશ્વરસંહિતા

## ૧.૧૮. અષ્ટાદશોઽધ્યાયઃ । બન્ધમોક્ષસ્વરૂપં શિવલિઙ્ગમાહાત્મ્યં ચ ।

ઋષય ઊચુઃ ।
બન્ધમોક્ષસ્વરૂપં હિ બ્રૂહિ સર્વાર્થવિત્તમ ।
સૂત ઉવાચ ।
બન્ધં મોક્ષં તથોપાયં વક્ષ્યેઽહં શૄણુતાદરાત્ ॥ ૧॥

પ્રકૃત્યાદ્યષ્ટબન્ધેન બદ્ધો જીવઃ સ ઉચ્યતે ।
પ્રકૃત્યાદ્યષ્ટબન્ધેન નિર્મુક્તો મુક્ત ઉચ્યતે ॥ ૨॥

પ્રકૃત્યાદિવશીકારો મોક્ષ ઇત્યુચ્યતે સ્વતઃ ।
બદ્ધજીવસ્તુ નિર્મુક્તો મુક્તજીવઃ સ કથ્યતે ॥ ૩॥

પ્રકૃત્યગ્રે તતો બુદ્ધિરહઙ્કારો ગુણાત્મકઃ ।
પઞ્ચતન્માત્રમિત્યેતત્પ્રકૃત્યાદ્યષ્ટકં વિદુઃ ॥ ૪॥

પ્રકૃત્યાદ્યષ્ટજો દેહો દેહજં કર્મ ઉચ્યતે ।
પુનશ્ચ કર્મજો દેહો જન્મ કર્મ પુનઃ પુનઃ ॥ ૫॥

શરીરં ત્રિવિધં જ્ઞેયં સ્થૂલં સૂક્ષ્મં ચ કારણમ્ ।
સ્થૂલં વ્યાપારદં પ્રોક્તં સૂક્ષ્મમિન્દ્રિયભોગદમ્ ॥ ૬॥

કારણં ત્વાત્મભોગાર્થં જીવકર્માનુરૂપતઃ ।
સુખં દુઃખં પુણ્યપાપૈઃ કર્મભિઃ ફલમશ્નુતે ॥ ૭॥

તસ્માદ્ધિ કર્મરજ્જ્વા હિ બદ્ધો જીવઃ પુનઃ પુનઃ ।
શરીરત્રયકર્મભ્યાં ચક્રવદ્ ભ્રામ્યતે સદા ॥ ૮॥

ચક્રભ્રમનિવૃત્યર્થં ચક્રકર્તારમીડયેત્ ।
પ્રકૃત્યાદિમહાચક્રં પ્રકૃતેઃ પરતઃ શિવઃ ॥ ૯॥

ચક્રકર્તા મહેશો હિ પ્રકૃતેઃ પરતો યતઃ ।
પિબતિ વાથ વમતિ જીવાબાલો જલં યથા ॥ ૧૦॥

શિવસ્તથા પ્રકૃત્યાદિ વશીકૃત્યાધિતિષ્ઠતિ ।
સર્વં વશીકૃતં યસ્માત્તસ્માચ્છિવ ઇતિ સ્મૃતઃ ।
શિવ એવ હિ સર્વજ્ઞઃ પરિપૂર્ણશ્ચ નિઃસ્પૃહઃ ॥ ૧૧॥

સર્વજ્ઞતા તૃપ્તિરનાદિબોધઃ
સ્વતન્ત્રતા નિત્યમલુપ્તશક્તિઃ ।
અનન્તશક્તિશ્ચ મહેશ્વરસ્ય
યન્માનસૈશ્વર્યમવૈતિ વેદઃ ॥ ૧૨॥

અતઃ શિવપ્રસાદેન પ્રકૃત્યાદિ વશં ભવેત્ ।
શિવપ્રસાદલાભાર્થં શિવમેવ પ્રપૂજયેત્ ॥ ૧૩॥

નિઃસ્પૃહસ્ય ચ પૂર્ણસ્ય તસ્ય પૂજા કથં ભવેત્ ।
શિવોદ્દેશકૃતં કર્મ પ્રસાદજનકં ભવેત્ ॥ ૧૪॥

લિઙ્ગે વેરે ભક્તજને શિવમુદ્દિશ્ય પૂજયેત્ ।
કાયેન મનસા વાચા ધનેનાપિ પ્રપૂજયેત્ ॥ ૧૫॥

પૂજયા તુ મહેશો હિ પ્રકૃતેઃ પરમઃ શિવઃ ।
પ્રસાદં કુરુતે સત્યં પૂજકસ્ય વિશેષતઃ ॥ ૧૬॥

શિવપ્રસાદાત્કર્માદ્યં ક્રમેણ સ્વવશં ભવેત્ ।
કર્મારભ્ય પ્રકૃત્યન્તં યદા સર્વં વશં ભવેત્ ॥ ૧૭॥

તદા મુક્ત ઇતિ પ્રોક્તઃ સ્વાત્મારામો વિરાજતે ।
પ્રસાદાત્પરમેશસ્ય કર્મદેહો યદા વશઃ ॥ ૧૮॥

તદા વૈ શિવલોકે તુ વાસઃ સાલોક્યમુચ્યતે ।
સામીપ્યં યાતિ સામ્બસ્ય તન્માત્રે ચ વશં ગતે ॥ ૧૯॥

તદા તુ શિવસાયુજ્યમાયુધાદ્યૈઃ ક્રિયાદિભિઃ ।
મહાપ્રસાદલાભે ચ બુદ્ધિશ્ચાપિ વશા ભવેત્ ॥ ૨૦॥

બુદ્ધિસ્તુ કાર્યં પ્રકૃતેસ્તત્સાર્ષ્ટિરિતિ કથ્યતે ।
પુનર્મહાપ્રસાદેન પ્રકૃતિર્વશમેષ્યતિ ॥ ૨૧॥

શિવસ્ય માનસૈશ્વર્યં તદાઽયત્નં ભવિષ્યતિ ।
સાર્વજ્ઞાદ્યં શિવૈશ્વર્યં લબ્ધ્વા સ્વાત્મનિ રાજતે ॥ ૨૨॥

તત્સાયુજ્યમિતિ પ્રાહુર્વેદાગમપરાયણાઃ ।
એવં ક્રમેણ મુક્તિઃ સ્યાલ્લિઙ્ગાદૌ પૂજયા સ્વતઃ ॥ ૨૩॥

અતઃ શિવપ્રસાદાર્થં ક્રિયાદ્યૈઃ પૂજયેચ્છિવમ્ ।
શિવક્રિયા શિવતપઃ શિવમન્ત્રજપઃ સદા ॥ ૨૪॥

શિવજ્ઞાનં શિવધ્યાનમુત્તરોત્તરમભ્યસેત્ ।
આસુપ્તેરામૃતેઃ કાલં નયેદ્વૈ શિવચિન્તયા ॥ ૨૫॥

સદ્યાદિભિશ્ચ કુસુમૈરર્ચયેચ્છિવમેષ્યતિ ॥

ઋષય ઊચુઃ ।
લિઙ્ગાદૌ શિવપૂજાયા વિધાનં બ્રૂહિ સુવ્રત ॥ ૨૬॥

સૂત ઉવાચ ।
લિઙ્ગાનાં ચ ક્રમં વક્ષ્યે યથાવચ્છૃણુત દ્વિજાઃ ।
તદેવ લિઙ્ગં પ્રથમં પ્રણવં સાર્વકામિકમ્ ॥ ૨૭॥

સૂક્ષ્મપ્રણવરૂપં હિ સૂક્ષ્મરૂપં તુ નિષ્કલમ્ ।
સ્થૂલલિઙ્ગં હિ સકલં તત્પઞ્ચાક્ષરમુચ્યતે ॥ ૨૮॥

તયોઃ પૂજા તપઃ પ્રોક્તં સાક્ષાન્મોક્ષપ્રદે ઉભે ।
પૌરુષપ્રકૃતિભૂતાનિ લિઙ્ગાનિ સુબહૂનિ ચ ॥ ૨૯॥

તાનિ વિસ્તરતો વક્તું શિવો વેત્તિ ન ચાપરઃ ।
ભૂવિકારાણિ લિઙ્ગાનિ જ્ઞાતાનિ પ્રબ્રવીમિ વઃ ॥ ૩૦॥

સ્વયમ્ભૂલિઙ્ગં પ્રથમં બિન્દુલિઙ્ગં દ્વિતીયકમ્ ।
પ્રતિષ્ઠિતં ચરં ચૈવ ગુરુલિઙ્ગં તુ પઞ્ચમમ્ ॥ ૩૧॥

દેવર્ષિતપસા તુષ્ટઃ સાન્નિધ્યાર્થં તુ તત્ર વૈ ।
પૃથિવ્યન્તર્ગતઃ શર્વો બીજં વૈ નાદરૂપતઃ ॥ ૩૨॥

સ્થાવરાઙ્કુરવદ્ભૂમિમુદ્ભિદ્ય વ્યક્ત એવ સઃ ।
સ્વયમ્ભૂતં જાતમિતિ સ્વયમ્ભૂરિતિ તં વિદુઃ ॥ ૩૩॥

તલ્લિઙ્ગપૂજયા જ્ઞાનં સ્વયમેવ પ્રવર્ધતે ।
સુવર્ણરજતાદૌ વા પૃથિવ્યાં સ્થણ્ડિલેઽપિ વા ॥ ૩૪॥

સ્વહસ્તાલ્લિખિતં લિઙ્ગં શુદ્ધપ્રણવમન્ત્રકમ્ ।
યન્ત્રલિઙ્ગં સમાલિખ્ય પ્રતિષ્ઠાવાહનં ચરેત્ ॥ ૩૫॥

બિન્દુનાદમયં લિઙ્ગં સ્થાવરં જઙ્ગમં ચ યત્ ।
ભાવનામયમેતદ્ધિ શિવદૃષ્ટં ન સંશયઃ ॥ ૩૬॥

યત્ર વિશ્વસ્યતે શમ્ભુસ્તત્ર તસ્મૈ ફલપ્રદઃ ।
સ્વહસ્તાલ્લિખિતે યન્ત્રે સ્થાવરાદાવકૃત્રિમે ॥ ૩૭॥

આવાહ્ય પૂજયેચ્છમ્ભું ષોડશૈરુપચારકૈઃ ।
સ્વયમૈશ્વર્યમાપ્નોતિ જ્ઞાનમભ્યાસતો ભવેત્ ॥ ૩૮॥

દેવૈશ્ચ ઋષિભિશ્ચાપિ સ્વાત્મસિદ્ધ્યર્થમેવ હિ ।
સમન્ત્રેણાત્મહસ્તેન કૃતં યચ્છુદ્ધમણ્ડલે ॥ ૩૯॥

શુદ્ધભાવનયા ચૈવ સ્થાપિતં લિઙ્ગમુત્તમ્ ।
તલ્લિઙ્ગં પૌરુષં પ્રાહુસ્તત્પ્રતિષ્ઠિતમુચ્યતે ॥ ૪૦॥

તલ્લિઙ્ગપૂજયા નિત્યં પૌરુષૈશ્વર્યમાપ્નુયાત્ ।
મહદ્ભિર્બ્રાહ્મણૈશ્ચાપિ રાજભિશ્ચ મહાધનૈઃ ॥ ૪૧॥

શિલ્પિના કલ્પિતં લિઙ્ગં મન્ત્રેણ સ્થાપિતં ચ યત્ ।
પ્રતિષ્ઠિતં પ્રાકૃતં હિ પ્રાકૃતૈશ્વર્યભોગદમ્ ॥ ૪૨॥

યદૂર્જિતં ચ નિત્યં ચ તદ્ધિ પૌરુષમુચ્યતે ।
યદ્ દુર્બલમનિત્યં ચ તદ્ધિ પ્રાકૃતમુચ્યતે ॥ ૪૩॥

લિઙ્ગં નાભિસ્તથા જિહ્વા નાસાગ્રં ચ શિખા ક્રમાત્ ।
કટ્યાદિષુ ત્રિલોકેષુ લિઙ્ગમાધ્યાત્મિકં ચરમ્ ॥ ૪૪॥

પર્વતં પૌરુષં પ્રોક્તં ભૂતલં પ્રાકૃતં વિદુઃ ।
વૃક્ષાદિ પૌરુષં જ્ઞેયં ગુલ્માદિ પ્રાકૃતં વિદુઃ ॥ ૪૫॥

ષાષ્ટિકં પ્રાકૃતં જ્ઞેયં શાલિગોધૂમપૌરુષમ્ ।
ઐશ્વર્યં પૌરુષં વિદ્યાદણિમાદ્યષ્ટસિદ્ધિદમ્ ॥ ૪૬॥

સુસ્ત્રીધનાદિવિષયં પ્રાકૃતં પ્રાહુરાસ્તિકાઃ ।
પ્રથમં ચરલિઙ્ગેષુ રસલિઙ્ગં પ્રકથ્યતે ॥ ૪૭॥

રસલિઙ્ગં બ્રાહ્મણાનાં સર્વાભીષ્ટપ્રદં ભવેત્ ।
બાણલિઙ્ગં ક્ષત્રિયાણાં મહારાજ્યપ્રદં શુભમ્ ॥ ૪૮॥

સ્વર્ણલિઙ્ગં તુ વૈશ્યાનાં મહાધનપતિત્વદમ્ ।
શિલાલિઙ્ગં તુ શૂદ્રાણાં મહાશુદ્ધિકરં શુભમ્ ॥ ૪૯॥

સ્ફાટિકં બાણલિઙ્ગં ચ સર્વેષાં સર્વકામદમ્ ।
સ્વીયાભાવેઽન્યદીયં તુ પૂજાયાં ન નિષિદ્ધ્યતે ॥ ૫૦॥

સ્ત્રીણાં તુ પાર્થિવં લિઙ્ગં સભર્તૃણાં વિશેષતઃ ।

વિધવાનાં પ્રવૃત્તાનાં સ્ફાટિકં પરિકીર્તિતમ્ ॥ ૫૧॥

વિધવાનાં નિવૃત્તાનાં રસલિઙ્ગં વિશિષ્યતે ।
બાલ્યે વા યૌવને વાપિ વાર્ધકે વાપિ સુવ્રતાઃ ॥ ૫૨॥

શુદ્ધસ્ફટિકલિઙ્ગં તુ સ્ત્રીણાં તત્સર્વભોગદમ્ ।
પ્રવૃત્તાનાં પીઠપૂજા સર્વાભીષ્ટપ્રદા ભુવિ ॥ ૫૩॥

પાત્રેણૈવ પ્રવૃત્તસ્તુ સર્વપૂજાં સમાચરેત્ ।
નૈવેદ્યં ચાભિષેકાન્તે શાલ્યન્નેન સમાચરેત્ ॥ ૫૪॥

પૂજાન્તે સ્થાપયેલ્લિઙ્ગં સમ્પુટેષુ પૃથગ્ગૃહે ।
કરપૂજાનિવૃત્તાનાં સ્વભોજ્યં તુ નિવેદયેત્ ॥ ૫૫॥

નિવૃત્તાનાં પરં સૂક્ષ્મં લિઙ્ગમેવ વિશિષ્યતે ।
વિભૂત્યભ્યર્ચનં કુર્યાદ્વિભૂતિં ચ નિવેદયેત્ ॥ ૫૬॥

પૂજાં કૃત્વાથ તલ્લિઙ્ગં શિરસા ધારયેત્સદા ।
વિભૂતિસ્ત્રિવિધા પ્રોક્તા લોકવેદશિવાગ્નિભિઃ ॥ ૫૭॥

લોકાગ્નિજમથો ભસ્મ દ્રવ્યશુદ્ધ્યર્થમાવહેત્ ।
મૃદ્દારુલોહરૂપાણાં ધાન્યાનાં ચ તથૈવ ચ ॥ ૫૮॥

તિલાદીનાં ચ દ્રવ્યાણાં વસ્ત્રાદીનાં તથૈવ ચ ।
તથા પર્યુષિતાનાં ચ ભસ્મના શુદ્ધિરિષ્યતે ॥ ૫૯॥

શ્વાદિભિર્દૂષિતાનાં ચ ભસ્મના શુદ્ધિરિષ્યતે ।
સજલં નિર્જલં ભસ્મ યથાયોગ્યં તુ યોજયેત્ ॥ ૬૦॥

વેદાગ્નિજં તથા ભસ્મ તત્કર્માન્તેષુ ધારયેત્ ।
મન્ત્રેણ ક્રિયયા જન્યં કર્માગ્નૌ ભસ્મરૂપધૃક્ ॥ ૬૧॥

તદ્ભસ્મધારણાત્કર્મ સ્વાત્મન્યારોપિતં ભવેત્ ।
અઘોરેણાત્મમન્ત્રેણ બિલ્વકાષ્ઠં પ્રદાહયેત્ ॥ ૬૨॥

શિવાગ્નિરિતિ સમ્પ્રોક્તસ્તેન દગ્ધં શિવાગ્નિજમ્ ।
કપિલાગોમયં પૂર્વં કેવલં ગવ્યમેવ વા ॥ ૬૩॥

શમ્યશ્વત્થપલાશાન્વા વટારગ્વધબિલ્વકાન્ ।
શિવાગ્નિના દહેચ્છુદ્ધં તદ્વૈ ભસ્મ શિવાગ્નિજમ્ ॥ ૬૪॥

દર્ભાગ્નૌ વા દહેત્કાષ્ઠં શિવમન્ત્રં સમુચ્ચરન્ ।
સમ્યક્સંશોધ્ય વસ્ત્રેણ નવકુમ્ભે નિધાપયેત્ ॥ ૬૫॥

દીપ્ત્યર્થં તત્તુ સઙ્ગ્રાહ્યં મન્યતે પૂજ્યતેઽપિ ચ ।
ભસ્મશબ્દાર્થ એવં હિ શિવઃ પૂર્વં તથાકરોત્ ॥ ૬૬॥

યથા સ્વવિષયે રાજા સારં ગૃહ્ણાતિ યત્કરમ્ ।
યથા મનુષ્યાઃસસ્યાદીન્દગ્ધ્વા સારં ભજન્તિ વૈ ॥ ૬૭॥

યથા હિ જાઠરાગ્નિશ્ચ ભક્ષ્યાદીન્વિવિધાન્બહૂન્ ।
દગ્ધ્વા સારતરં સારાત્સ્વદેહં પરિપુષ્યતિ ॥ ૬૮॥

તથા પ્રપઞ્ચકર્તાપિ સ શિવઃ પરમેશ્વરઃ ।
સ્વાધિષ્ઠેયપ્રપઞ્ચસ્ય દગ્ધ્વા સારં ગૃહીતવાન્ ॥ ૬૯॥

દગ્ધ્વા પ્રપઞ્ચં તદ્ભસ્મ સ્વાત્મન્યારોપયેચ્છિવઃ ।
ઉદ્ધૂલનસ્ય વ્યાજેન જગત્સારં ગૃહીતવાન્ ॥ ૭૦॥

સ્વરત્નં સ્થાપયામાસ સ્વકીયે હિ શરીરકે ।
કેશમાકાશસારેણ વાયુસારેણ વૈ મુખમ્ ॥ ૭૧॥

હૃદયં ચાગ્નિસારેણ ત્વપાં સારેણ વૈ કટિમ્ ।
જાનુ ચાવનિસારેણ તદ્વત્સર્વં તદઙ્ગકમ્ ॥ ૭૨॥

બ્રહ્મવિષ્ણ્વોશ્ચ રુદ્રાણાં સારં ચૈવ ત્રિપુણ્ડ્રકમ્ ।
તથા તિલકરૂપેણ લલાટાન્તે મહેશ્વરઃ ॥ ૭૩॥

ભૂવૃદ્ધ્યા સર્વમેતદ્ધિ મન્યતે સ્વયમિત્યસૌ ।
પ્રપઞ્ચસારસર્વસ્વમનેનૈવ વશીકૃતમ્ ॥ ૭૪॥

તસ્માદસ્ય વશીકર્તા નાન્યોઽસ્તિ સ શિવઃ સ્મૃતઃ ।
યથા સર્વમૃગાણાં ચ હિંસકો મૃગહિંસકઃ ॥ ૭૫॥

અસ્ય હિંસામૃગો નાસ્તિ તસ્માત્સિંહ ઇતીરિતઃ ।
શં નિત્યં સુખમાનન્દમિકારઃ પુરુષઃ સ્મૃતઃ ॥ ૭૬॥

વકારઃ શક્તિરમૃતં મેલનં શિવ ઉચ્યતે ।
તસ્માદેવં સ્વમાત્માનં શિવં કૃત્વાર્ચયેચ્છિવમ્ ॥ ૭૭॥

તસ્માદુદ્ધૂલનં પૂર્વં ત્રિપુણ્ડ્રં ધારયેત્પરમ્ ।
પૂજાકાલે હિ સજલં શુદ્ધ્યર્થં નિર્જલં ભવેત્ ॥ ૭૮॥

દિવા વા યદિ વા રાત્રૌ નારી વાથ નરોઽપિ વા ।
પૂજાર્થં સજલં ભસ્મ ત્રિપુણ્ડ્રેણૈવ ધારયેત્ ॥ ૭૯॥

ત્રિપુણ્ડ્રં સજલં ભસ્મ ધૃત્વા પૂજાં કરોતિ યઃ ।
શિવપૂજાફલં સાઙ્ગં તસ્યૈવ હિ સુનિશ્ચિતમ્ ॥ ૮૦॥

ભસ્મ વૈ શિવમન્ત્રેણ ધૃત્વા હ્યુચ્યાશ્રમી ભવેત્ ।
શિવાશ્રમીતિ સમ્પ્રોક્તઃ શિવૈકપરમો યતઃ ॥ ૮૧॥

શિવવ્રતૈકનિષ્ઠસ્ય નાશૌચં ન ચ સૂતકમ્ ।
લલાટેઽગ્રે સિતં ભસ્મ તિલકં ધારયેન્મૃદા ॥ ૮૨॥

સ્વહસ્તાદ્ ગુરુહસ્તાદ્વા શિવભક્તસ્ય લક્ષણમ્ ।
ગુણાન્રુન્ધ ઇતિ પ્રોક્તો ગુરુશબ્દસ્ય વિગ્રહઃ ॥ ૮૩॥

સવિકારાન્રાજસાદીન્ગુણાન્રુન્ધે વ્યપોહતિ ।
ગુણાતીતઃ પરશિવો ગુરુરૂપં સમાશ્રિતઃ ॥ ૮૪॥

ગુણત્રયં વ્યપોહ્યાગ્રે શિવં બોધયતીતિ સઃ ।
વિશ્વસ્તાનાં તુ શિષ્યાણાં ગુરુરિત્યભિધીયતે ॥ ૮૫॥

તસ્માદ્ ગુરુશરીરં તુ ગુરુલિઙ્ગં ભવેદ્ બુધઃ ।
ગુરુલિઙ્ગસ્ય પૂજા તુ ગુરુશુશ્રૂષણં ભવેત્ ॥ ૮૬॥

શ્રુતં કરોતિ શુશ્રૂષા કાયેન મનસા ગિરા ।
ઉક્તં યદ્ ગુરુણા પૂર્વં શક્યં વાઽશક્યમેવ વા ॥ ૮૭॥

કરોત્યેવ હિ પૂતાત્મા પ્રાણૈરપિ ધનૈરપિ ।
તસ્માદ્વૈ શાસને યોગ્યઃ શિષ્ય ઇત્યભિધીયતે ॥ ૮૮॥

શરીરાદ્યર્થકં સર્વં ગુરોર્દત્ત્વા સુશિષ્યકઃ ।
અગ્રપાકં નિવેદ્યાગ્રે ભુઞ્જીયાદ્ ગુર્વનુજ્ઞયા ॥ ૮૯॥

શિષ્યઃપુત્ર ઇતિ પ્રોક્તઃ સદા શિષ્યત્વયોગતઃ ।
જિહ્વાલિઙ્ગાન્મન્ત્રશુક્રં કર્ણયોનૌ નિષિચ્ય વૈ ॥ ૯૦॥

જાતઃ પુત્રો મન્ત્રપુત્રઃ પિતરં પૂજયેદ્ ગુરુમ્ ।
નિમજ્જયતિ પુત્રં વૈ સંસારે જનકઃ પિતા ॥ ૯૧॥

સન્તારયતિ સંસારાદ્ ગુરુર્વૈ બોધકઃ પિતા ।

ઉભયોરન્તરં જ્ઞાત્વા પિતરં ગુરુમર્ચયેત્ ॥ ૯૨॥

અઙ્ગશુશ્રૂષયા ચાપિ ધનાદ્યૈઃ સ્વાર્જિતૈર્ગુરુમ્ ।
પાદાદિકેશપર્યન્તં લિઙ્ગાન્યઙ્ગાનિ યદ્ગુરોઃ ॥ ૯૩॥

ધનરૂપૈઃ પાદુકાદ્યૈઃ પાદસઙ્ગ્રહણાદિભિઃ ।
સ્નાનાભિષેકનૈવેદ્યૈર્ભોજનૈશ્ચ પ્રપૂજયેત્ ॥ ૯૪॥

ગુરુપૂજૈવ પૂજા સ્યાચ્છિવસ્ય પરમાત્મનઃ ।
ગુરુસેવા તુ યત્સર્વમાત્મશુદ્ધિકરી ભવેત્ ॥ ૯૫॥

ગુરોઃ શેષઃ શિવોચ્છિષ્ટં જલમન્નાદિનિર્મિતમ્ ।
શિષ્યાણાં શિવભક્તાનાં ગ્રાહ્યં ભોજ્યં ભવેદ્ દ્વિજાઃ ॥ ૯૬॥

ગુર્વનુજ્ઞાવિરહિતં ચોરવત્સકલં ભવેત્ ।
ગુરોરપિ વિશેષજ્ઞં યત્નાદ્ ગૃહ્ણીત વૈ ગુરુમ્ ॥ ૯૭॥

અજ્ઞાનમોચનં સાધ્યં વિશેષજ્ઞો હિ મોચકઃ ।
આદૌ ચ વિઘ્નશમનં કર્તવ્યં કર્મપૂર્તયે ॥ ૯૮॥

નિર્વિઘ્નેન કૃતં સાઙ્ગં કર્મ વૈ સફલં ભવેત્ ।
તસ્માત્સકલકર્માદૌ વિઘ્નેશં પૂજયેદ્ બુધઃ ॥ ૯૯॥

સર્વબાધાનિવૃત્ત્યર્થં સર્વાન્દેવાન્ યજેદ્ બુધઃ ।
જ્વરાદિગ્રન્થિરોગાશ્ચ બાધા હ્યાધ્યાત્મિકી મતા ॥ ૧૦૦॥

પિશાચજમ્બુકાદીનાં વલ્મીકાદ્યુદ્ભવે તથા ।
અકસ્માદેવ ગોધાદિજન્તૂનાં પતનેઽપિ ચ ॥ ૧૦૧॥

ગૃહે કચ્છપસર્પસ્ત્રીદુર્જનાદર્શનેઽપિ ચ ।
વૃક્ષનારીગવાદીનાં પ્રસૂતિવિષયેઽપિ ચ ॥ ૧૦૨॥

ભાવિદુઃખં સમાયાતિ તસ્માત્તે ભૌતિકા મતાઃ ।
અમેધ્યાશનિપાતશ્ચ મહામારી તથૈવ ચ ॥ ૧૦૩॥

જ્વરમારી વિષૂચિશ્ચ ગોમારી ચ મસૂરિકા ।
જન્મર્ક્ષગ્રહસઙ્ક્રાન્તિગ્રહયોગાઃ સ્વરાશિકે ॥ ૧૦૪॥

દુઃસ્વપ્નદર્શનાદ્યાશ્ચ મતા વૈ હ્યાધિદૈવિકાઃ ।
શવચાણ્ડાલપતિતસ્પર્શાદન્તર્ગૃહે ગતે ॥ ૧૦૫॥

એતાદૃશે સમુત્પન્ને ભાવિદુઃખસ્ય સૂચકે ।
શાન્તિયજ્ઞં તુ મતિમાન્કુર્યાત્તદ્દોષશાન્તયે ॥ ૧૦૬॥

દેવાલયેઽથ ગોષ્ઠે વા ચૈત્યે વાપિ ગૃહાઙ્ગણે ।
પ્રદેશોન્નતધિષ્ણ્યે વૈ દ્વિહસ્તે ચ સ્વલઙ્કૃતે ॥ ૧૦૭॥

ભારમાત્રં વ્રીહિધાન્યં પ્રસ્થાપ્ય પરિસૃત્ય ચ ।
મધ્યે વિલિખ્ય કમલં તથા દિક્ષુ વિલિખ્ય વૈ ॥ ૧૦૮॥

તન્તુના વેષ્ટિતં કુમ્ભં નવગુગ્ગુલધૂપિતમ્ ।
મધ્યે સ્થાપ્ય મહાકુમ્ભં તથા દિક્ષ્વપિ વિન્યસેત્ ॥ ૧૦૯॥

સનાલામ્રકકૂર્ચાદીન્કલશાંશ્ચ તથાષ્ટસુ ।
પૂરયેન્મન્ત્રપૂતેન પઞ્ચદ્રવ્યયુતેન હિ ॥ ૧૧૦॥

પ્રક્ષિપેન્નવરત્નાનિ નીલાદીન્ક્રમશસ્તથા ।
કર્મજ્ઞં ચ સપત્નીકમાચાર્યં વરયેદ્ બુધઃ ॥ ૧૧૧॥

સુવર્ણપ્રતિમાં વિષ્ણોરિન્દ્રાદીનાં ચ નિક્ષિપેત્ ।
સશિરસ્કે મધ્યકુમ્ભે વિષ્ણુમાવાહ્ય પૂજયેત્ ॥ ૧૧૨॥

પ્રાગાદિષુ યથામન્ત્રમિન્દ્રાદીન્ક્રમશો યજેત્ ।
તત્તન્નામ્ના ચતુર્થ્યા ચ નમોઽન્તેન યથાક્રમમ્ ॥ ૧૧૩॥

આવાહનાદિકં સર્વમાચાર્યેણૈવ કારયેત્ ।
આચાર્યઋત્વિજૈઃ સાર્ધં તન્મત્રાન્પ્રજપેચ્છતમ્ ॥ ૧૧૪॥

કુમ્ભસ્ય પશ્ચિમે ભાગે જપાન્તે હોમમાચરેત્ ।
કોટિં લક્ષં સહસ્રં વા શતમષ્ટોત્તરં બુધાઃ ॥ ૧૧૫॥

એકાહં વા નવાહં વા તથા મણ્ડલમેવ વા ।
યથાયોગ્યં પ્રકુર્વીત કાલદેશાનુસારતઃ ॥ ૧૧૬॥

શમીહોમશ્ચ શાન્ત્યર્થે વૃત્ત્યર્થે ચ પલાશકમ્ ।
સમિદન્નાજ્યકૈર્દ્રવ્યૈર્નામ્ના મન્ત્રેણ વા હુનેત્ ॥ ૧૧૭॥

પ્રારમ્ભે યત્કૃતં દ્રવ્યં તત્ક્રિયાન્તં સમાચરેત્ ।
પુણ્યાહં વાચયિત્વાન્તે દિને સમ્પ્રોક્ષયેજ્જલૈઃ ॥ ૧૧૮॥

બ્રાહ્મણાન્ભોજયેત્પશ્ચાદ્યાવદાહુતિસઙ્ખ્યયા ।
આચાર્યશ્ચ હવિષ્યાશી ઋત્વિજશ્ચ ભવેદ્ બુધાઃ ॥ ૧૧૯॥

આદિત્યાદીન્ગ્રહાનિષ્ટ્વા સર્વહોમાન્ત એવ હિ ।
ઋત્વિગ્ભ્યો દક્ષિણાં દદ્યાન્નવરત્નં યથાક્રમમ્ ॥ ૧૨૦॥

દશદાનં તતઃ કુર્યાદ્ ભૂરિદાનં તતઃ પરમ્ ।
બાલાનામુપનીતાનાં ગૃહિણાં વનિનાં ધનમ્ ॥ ૧૨૧॥

કન્યાનાં ચ સભર્તૃણાં વિધવાનાં તતઃ પરમ્ ।
તન્ત્રોપકરણં સર્વમાચાર્યાય નિવેદયેત્ ॥ ૧૨૨॥

ઉત્પાતાનાં ચ મારીણાં દુઃખસ્વામી યમઃ સ્મૃતઃ ।
તસ્માદ્યમસ્ય પ્રીત્યર્થં કાલદાનં પ્રદાપયેત્ ॥ ૧૨૩॥

શતનિષ્કેણ વા કુર્યાદ્દશનિષ્કેણ વા પુનઃ ।
પાશાઙ્કુશધરં કાલં કુર્યાત્પુરુષરૂપિણમ્ ॥ ૧૨૪॥

તત્સ્વર્ણપ્રતિમાદાનં કુર્યાદ્દક્ષિણયા સહ ।
તિલદાનં તતઃ કુર્યાત્પૂર્ણાયુષ્યપ્રસિદ્ધયે ॥ ૧૨૫॥

આજ્યાવેક્ષણદાનં ચ કુર્યાદ્વ્યાધિનિવૃત્તયે ।
સહસ્રં ભોજયેદ્વિપ્રાન્દરિદ્રઃ શતમેવ વા ॥ ૧૨૬॥

વિત્તાભાવે દરિદ્રસ્તુ યથાશક્તિ સમાચરેત્ ।
ભૈરવસ્ય મહાપૂજાં કુર્યાદ્ભૂતાદિશાન્તયે ॥ ૧૨૭॥

મહાભિષેકં નૈવેદ્યં શિવસ્યાન્તે તુ કારયેત્ ।
બ્રાહ્મણાન્ભોજયેત્પશ્ચાદ્ભૂરિભોજનરૂપતઃ ॥ ૧૨૮॥

એવં કૃતેન યજ્ઞેન દોષશાન્તિમવાપ્નુયાત્ ।
શાન્તિયજ્ઞમિમં કુર્યાદ્વર્ષે વર્ષે તુ ફાલ્ગુને ॥ ૧૨૯॥

દુર્દર્શનાદૌ સદ્યો વૈ માસમાત્રે સમાચરેત્ ।
મહાપાપાદિસમ્પ્રાપ્તૌ કુર્યાદ્ભૈરવપૂજનમ્ ॥ ૧૩૦॥

મહાવ્યાધિસમુત્પત્તૌ સઙ્કલ્પં પુનરાચરેત્ ।
સર્વાભાવે દરિદ્રસ્તુ દીપદાનમથાચરેત્ ॥ ૧૩૧॥

તદપ્યશક્તઃ સ્નાત્વા વૈ યત્કિઞ્ચિદ્ દાનમાચરેત્ ।
દિવાકરં નમસ્કુર્યાન્મન્ત્રેણાષ્ટોત્તરં શતમ્ ॥ ૧૩૨॥

સહસ્રમયુતં લક્ષં કોટિં વા કારયેદ્ બુધઃ ।

નમસ્કારાત્મયજ્ઞેન તુષ્ટાઃ સ્યુઃ સર્વદેવતાઃ ॥ ૧૩૩॥

ત્વત્સ્વરૂપેઽર્પિતા બુદ્ધિર્ન તેઽશૂન્યે ચ રોચતે ।
યા ચાસ્ત્યસ્મદહન્તેતિ ત્વયિ દૃષ્ટે વિવર્જિતા ॥ ૧૩૪॥

નમ્રોઽહં હિ સ્વદેહેન ભો મહાંસ્ત્વમસિ પ્રભો ।
ન શૂન્યો મત્સ્વરૂપો વૈ તવ દાસોઽસ્મિ સામ્પ્રતમ્ ॥ ૧૩૫॥

યથાયોગ્યં સ્વાત્મયજ્ઞં નમસ્કારં પ્રકલ્પયેત્ ।
અથાત્ર શિવનૈવેદ્યં દત્ત્વા તામ્બૂલમાહરેત્ ॥ ૧૩૬॥

શિવપ્રદક્ષિણં કુર્યાત્સ્વયમષ્ટોત્તરં શતમ્ ।
સહસ્રમયુતં લક્ષં કોટિમન્યેન કારયેત્ ॥ ૧૩૭॥

શિવપ્રદક્ષિણાત્સર્વં પાતકં નશ્યતિ ક્ષણાત્ ।
દુઃખસ્ય મૂલં વ્યાધિર્હિ વ્યાધેર્મૂલં હિ પાતકમ્ ॥ ૧૩૮॥

ધર્મેણૈવ હિ પાપાનામપનોદનમીરિતમ્ ।
શિવોદ્દેશકૃતો ધર્મઃ ક્ષમઃ પાપવિનોદને ॥ ૧૩૯॥

અધ્યક્ષં શિવધર્મેષુ પ્રદક્ષિણમિતીરિતમ્ ।
ક્રિયયા જપરૂપં હિ પ્રણવં તુ પ્રદક્ષિણમ્ ॥ ૧૪૦॥

જનનં મરણં દ્વન્દ્વં માયાચક્રમિતીરિતમ્ ।
શિવસ્ય માયાચક્રં હિ બલિપીઠં તદુચ્યતે ॥ ૧૪૧॥

બલિપીઠં સમારભ્ય પ્રાદક્ષિણ્યક્રમેણ વૈ ।
પદે પદાન્તરં ગત્વા બલિપીઠં સમાવિશેત્ ॥ ૧૪૨॥

નમસ્કારં તતઃ કુર્યાત્પ્રદક્ષિણમિતીરિતમ્ ।
નિર્ગમાજ્જનનં પ્રાપ્તં નમસ્ત્વાત્મસમર્પણમ્ ॥ ૧૪૩॥

જનનં મરણં દ્વન્દ્વં શિવમાયાસમર્પિતમ્ ।
શિવમાયાર્પિતદ્વન્દ્વો ન પુનસ્ત્વાત્મભાગ્ભવેત્ ॥ ૧૪૪॥

યાવદ્દેહં ક્રિયાધીનઃ સ જીવો બદ્ધ ઉચ્યતે ।
દેહત્રયવશીકારે મોક્ષ ઇત્યુચ્યતે બુધૈઃ ॥ ૧૪૫॥

માયાચક્રપ્રણેતા હિ શિવઃ પરમકારણમ્ ।
શિવમાયાર્પિતદ્વન્દ્વં શિવસ્તુ પરિમાર્જતિ ॥ ૧૪૬॥

શિવેન કલ્પિતં દ્વન્દ્વં તસ્મિન્નેવ સમર્પયેત્ ।
શિવસ્યાતિપ્રિયં વિદ્યાત્પ્રદક્ષિણનમો બુધાઃ ॥ ૧૪૭॥

પ્રદક્ષિણનમસ્કારાઃ શિવસ્ય પરમાત્મનઃ ।
ષોડશૈરુપચારૈશ્ચ કૃતા પૂજા ફલપ્રદા ॥ ૧૪૮॥

પ્રદક્ષિણાઽવિનાશ્યં હિ પાતકં નાસ્તિ ભૂતલે ।
તસ્માત્પ્રદક્ષિણેનૈવ સર્વપાપં વિનાશયેત્ ॥ ૧૪૯॥

શિવપૂજાપરો મૌની સત્યાદિગુણસંયુતઃ ।
ક્રિયાતપોજપજ્ઞાનધ્યાનેષ્વેકૈકમાચરેત્ ॥ ૧૫૦॥

ઐશ્વર્યં દિવ્યદેહશ્ચ જ્ઞાનમજ્ઞાનસંક્ષયઃ ।
શિવસાન્નિધ્યમિત્યેતત્ક્રિયાદીનાં ફલં ભવેત્ ॥ ૧૫૧॥

કરણેન ફલં યાતિ તમસઃ પરિહાપનાત્ ।
જન્મનઃ પરિમાર્જિત્વાજ્જ્ઞાબુદ્ધ્યા જનિતાનિવ ॥ ૧૫૨॥

યથાદેશં યથાકાલં યથાદેહં યથાધનમ્ ।
યથાયોગ્યં પ્રકુર્વીત ક્રિયાદીન્ શિવભક્તિમાન્ ॥ ૧૫૩॥

ન્યાયાર્જિતસુવિત્તેન વસેત્પ્રાજ્ઞઃ શિવસ્થલે ।
જીવહિંસાદિરહિતમતિક્લેશવિવર્જિતમ્ ॥ ૧૫૪॥

પઞ્ચાક્ષરેણ જપ્તં ચ તોયમન્નં વિદુઃ સુખમ્ ।
અથવાહુર્દરિદ્રસ્ય ભિક્ષાન્નં જ્ઞાનદં ભવેત્ ॥ ૧૫૫॥

શિવભક્તસ્ય ભિક્ષાન્નં શિવભક્તિવિવર્ધનમ્ ।
શમ્ભુસત્રમિતિ પ્રાહુર્ભિક્ષાન્નં શિવયોગિનઃ ॥ ૧૫૬॥

યેન કેનાપ્યુપાયેન યત્ર કુત્રાપિ ભૂતલે ।
શુદ્ધાન્નભુક્સદા મૌની રહસ્યં ન પ્રકાશયેત્ ॥ ૧૫૭॥

પ્રકાશયેત્તુ ભક્તાનાં શિવમાહાત્મ્યમેવ હિ ।
રહસ્યં શિવમન્ત્રસ્ય શિવો જાનાતિ નાપરઃ ॥ ૧૫૮॥

શિવભક્તો વસેન્નિત્યં શિવલિઙ્ગં સમાશ્રિતઃ ।
સ્થાણુલિઙ્ગાશ્રયેણૈવ સ્થાણુર્ભવતિ ભૂસુરાઃ ॥ ૧૫૯॥

પૂજયા ચરલિઙ્ગસ્ય ક્રમાન્મુક્તો ભવેદ્ ધ્રુવમ્ ।
સર્વમુક્તં સમાસેન સાધ્યસાધનમુત્તમમ્ ॥ ૧૬૦॥

વ્યાસેન યત્પુરા પ્રોક્તં યચ્છ્રુતં હિ મયા પુરા ।
ભદ્રમસ્તુ હિ વોઽસ્માકં શિવભક્તિર્દૃઢાસ્તુ સા ॥ ૧૬૧॥

ય ઇમં પઠતેઽધ્યાયં યઃ શ‍ૃણોતિ નરઃ સદા ।
શિવજ્ઞાનં સ લભતે શિવસ્ય કૃપયા બુધાઃ ॥ ૧૬૨॥

ઇતિ શ્રીશિવમહાપુરાણે પ્રથમાયાં વિદ્યેશ્વરસંહિતાયાં સાધ્યસાધનખણ્ડે શિવલિઙ્ગમાહાત્મ્યવર્ણનં નામાષ્ટાદશોઽધ્યાયઃ ॥ ૧.૧૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
વિદ્યેશ્વરસંહિતા

## ૧.૧૯. એકોનવિંશોઽધ્યાયઃ । પાર્થિવપૂજનમાહાત્મ્યં ભસ્મપ્રકારાભિધાનં ચ ।

ઋષય ઊચુઃ ।
સૂત સૂત ચિરઞ્જીવ ધન્યસ્ત્વં શિવભક્તિમાન્ ।
સમ્યગુક્તસ્ત્વયા લિઙ્ગમહિમા સત્ફલપ્રદઃ ॥ ૧॥

યત્ર પાર્થિવમાહેશલિઙ્ગસ્ય મહિમાધુના ।
સર્વોત્કૃષ્ટશ્ચ કથિતો વ્યાસતો બ્રૂહિ તં પુનઃ ॥ ૨॥

સૂત ઉવાચ ।
શ‍ૃણુધ્વમૃષયઃ સર્વે સદ્ભક્ત્યાદરતોઽખિલાઃ ।
શિવપાર્થિવલિઙ્ગસ્ય મહિમા પ્રોચ્યતે મયા ॥ ૩॥

ઉક્તેષ્વેતેષુ લિઙ્ગેષુ પાર્થિવં લિઙ્ગમુત્તમમ્ ।
તસ્ય પૂજનતો વિપ્રા બહવઃ સિદ્ધિમાગતાઃ ॥ ૪॥

હરિર્બ્રહ્મા ચ ઋષયઃ સપ્રજાપતયસ્તથા ।
સમ્પૂજ્ય પાર્થિવં લિઙ્ગં પ્રાપુઃ સર્વેપ્સિતં દ્વિજાઃ ॥ ૫॥

દેવાસુરમનુષ્યાશ્ચ ગન્ધર્વોરગરાક્ષસાઃ ।
અન્યેઽપિ બહવઃ સિદ્ધિં તં સમ્પૂજ્ય ગતાઃ પરામ્ ॥ ૬॥

કૃતે રત્નમયં લિઙ્ગં ત્રેતાયાં હેમસમ્ભવમ્ ।
દ્વાપરે પારદં શ્રેષ્ઠં પાર્થિવં તુ કલૌ યુગે ॥ ૭॥

અષ્ટમૂર્તિષુ સર્વાસુ મૂર્તિર્વૈ પાર્થિવી વરા ।
અનન્યપૂજિતા વિપ્રાસ્તપસ્તસ્માન્મહત્ફલમ્ ॥ ૮॥

યથા સર્વેષુ દેવેષુ જ્યેષ્ઠઃ શ્રેષ્ઠઃ મહેશ્વરઃ ।
એવં સર્વેષુ લિઙ્ગેષુ પાર્થિવં શ્રેષ્ઠમુચ્યતે ॥ ૯॥

યથા નદીષુ સર્વાસુ જ્યેષ્ઠા શ્રેષ્ઠા સુરાપગા ।
તથા સર્વેષુ લિઙ્ગેષુ પાર્થિવં શ્રેષ્ઠમુચ્યતે ॥ ૧૦॥

યથા સર્વેષુ મન્ત્રેષુ પ્રણવો હિ મહાન્સ્મૃતઃ ।
તથેદં પાર્થિવં શ્રેષ્ઠમારાધ્યં પૂજ્યમેવ હિ ॥ ૧૧॥

યથા સર્વેષુ વર્ણેષુ બ્રાહ્મણઃ શ્રેષ્ઠ ઉચ્યતે ।
તથા સર્વેષુ લિઙ્ગેષુ પાર્થિવં શ્રેષ્ઠમુચ્યતે ॥ ૧૨॥

યથા પુરીષુ સર્વાસુ કાશી શ્રેષ્ઠતમા સ્મૃતા ।
તથા સર્વેષુ લિઙ્ગેષુ પાર્થિવં શ્રેષ્ઠમુચ્યતે ॥ ૧૩॥

યથા વ્રતેષુ સર્વેષુ શિવરાત્રિવ્રતં પરમ્ ।
તથા સર્વેષુ લિઙ્ગેષુ પાર્થિવં શ્રેષ્ઠમુચ્યતે ॥ ૧૪॥

યથા દેવીષુ સર્વાસુ શૈવી શક્તિઃ પરા સ્મૃતા ।
તથા સર્વેષુ લિઙ્ગેષુ પાર્થિવં શ્રેષ્ઠમુચ્યતે ॥ ૧૫॥

પ્રકૃત્ય પાર્થિવં લિઙ્ગં યોઽન્યદેવં પ્રપૂજયેત્ ।
વૃથા ભવતિ સા પૂજા સ્નાનદાનાદિકં વૃથા ॥ ૧૬॥

પાર્થિવારાધનં પુણ્યં ધન્યમાયુર્વિવર્ધનમ્ ।
તુષ્ટિદં પુષ્ટિદં શ્રીદં કાર્યં સાધકસત્તમૈઃ ॥ ૧૭॥

યથાલબ્ધોપચારૈશ્ચ ભક્તિશ્રદ્ધાસમન્વિતઃ ।
પૂજયેત્પાર્થિવં લિઙ્ગં સર્વકામાર્થસિદ્ધિદમ્ ॥ ૧૮॥

યઃ કૃત્વા પાર્થિવં લિઙ્ગં પૂજયેચ્છુભવેદિકમ્ ।
ઇહૈવ ધનવાઞ્છ્રીમાનન્તે રુદ્રોઽભિજાયતે ॥ ૧૯॥

ત્રિસન્ધ્યં યોઽર્ચયંલ્લિઙ્ગં કૃત્વા બિલ્વેન પાર્થિવમ્ ।
દશૈકાદશકં યાવત્તસ્ય પુણ્યફલં શ◌ૃણુ ॥ ૨૦॥

અનેનૈવ સ્વદેહેન રુદ્રલોકે મહીયતે ।
પાપહં સર્વમર્ત્યાનાં દર્શનાત્સ્પર્શનાદપિ ॥ ૨૧॥

જીવન્મુક્તઃ સ વૈ જ્ઞાની શિવ એવ ન સંશયઃ ।
તસ્ય દર્શનમાત્રેણ ભુક્તિર્મુક્તિશ્ચ જાયતે ॥ ૨૨॥

શિવં યઃ પૂજયેન્નિત્યં કૃત્વા લિઙ્ગં તુ પાર્થિવમ્ ।
યાવજ્જીવનપર્યન્તં સ યાતિ શિવમન્દિરમ્ ॥ ૨૩॥

મૃડેનાપ્રમિતાન્વર્ષાઞ્છિવલોકે હિ તિષ્ઠતિ ।
સકામઃ પુનરાગત્ય રાજેન્દ્રો ભારતે ભવેત્ ॥ ૨૪॥

નિષ્કામઃ પૂજયેન્નિત્યં પાર્થિવં લિઙ્ગમુત્તમમ્ ।
શિવલોકે સદા તિષ્ઠેત્તસ્ય સાયુજ્યમાપ્નુયાત્ ॥ ૨૫॥

પાર્થિવં શિવલિઙ્ગં ચ વિપ્રો યદિ ન પૂજયેત્ ।
સ યાતિ નરકં ઘોરં શૂલપ્રોતં સુદારુણમ્ ॥ ૨૬॥

યથાકથઞ્ચિદ્વિધિના રમ્યં લિઙ્ગં પ્રકારયેત્ ।
પઞ્ચસૂત્રવિધાનં ચ પાર્થિવે ન વિચારયેત્ ॥ ૨૭॥

અખણ્ડં તદ્ધિ કર્તવ્યં ન વિખણ્ડં પ્રકારયેત્ ।
વિખણ્ડં તુ પ્રકુર્વાણો નૈવ પૂજાફલં લભેત્ ॥ ૨૮॥

રત્નજં હેમજં લિઙ્ગં પારદં સ્ફાટિકં તથા ।
પાર્થિવં પુષ્પરાગોત્થમખણ્ડં તુ પ્રકારયેત્ ॥ ૨૯॥

અખણ્ડં તુ ચરં લિઙ્ગં દ્વિખણ્ડમચરં સ્મૃતમ્ ।
ખણ્ડાખણ્ડવિચારોઽયં સચરાચરયોઃ સ્મૃતઃ ॥ ૩૦॥

વેદિકા તુ મહાવિદ્યા લિઙ્ગં દેવો મહેશ્વરઃ ।
અતો હિ સ્થાવરે લિઙ્ગે સ્મૃતા શ્રેષ્ઠા દ્વિખણ્ડતા ॥ ૩૧॥

દ્વિખણ્ડં સ્થાવરં લિઙ્ગં કર્તવ્યં હિ વિધાનતઃ ।
અખણ્ડં જઙ્ગમં પ્રોક્તં શૈવસિદ્ધાન્તવેદિભિઃ ॥ ૩૨॥

દ્વિખણ્ડં તુ ચરં લિઙ્ગં કુર્વન્ત્યજ્ઞાનમોહિતાઃ ।
નૈવ સિદ્ધાન્તવેત્તારો મુનયઃ શાસ્ત્રકોવિદાઃ ॥ ૩૩॥

અખણ્ડં સ્થાવરં લિઙ્ગં દ્વિખણ્ડં ચરમેવ ચ ।
યે કુર્વન્તિ નરા મૂઢા ન પૂજાફલભાગિનઃ ॥ ૩૪॥

તસ્માચ્છાસ્ત્રોક્તવિધિના અખણ્ડં ચરસંજ્ઞકમ્ ।

દ્વિખણ્ડં સ્થાવરં લિઙ્ગં કર્તવ્યં પરયા મુદા ॥ ૩૫॥

અખણ્ડે તુ ચરે પૂજા સમ્પૂર્ણફલદાયિની ।
દ્વિખણ્ડે તુ ચરે પૂજા મહાહાનિપ્રદા સ્મૃતા ॥ ૩૬॥

અખણ્ડે સ્થાવરે પૂજા ન કામફલદાયિની ।
પ્રત્યવાયકરી નિત્યમિત્યુક્તં શાસ્ત્રવેદિભિઃ ॥ ૩૭॥

ઇતિ શ્રીશિવમહાપુરાણે પ્રથમાયાં વિદ્યેશ્વરસંહિતાયાં સાધ્યસાધનખણ્ડે પાર્થિવશિવલિઙ્ગપૂજનમાહાત્મ્યવર્ણનં નામૈકોનવિંશોઽધ્યાયઃ ॥ ૧.૧૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
વિદ્યેશ્વરસંહિતા

## ૧.૨૦. વિંશોઽધ્યાયઃ । વૈદિકઃ પાર્થિવપૂજનપ્રકારઃ ।

સૂત ઉવાચ -
અથ વૈદિકભક્તાનાં પાર્થિવાર્ચા નિગદ્યતે ।
વૈદિકેનૈવ માર્ગેણ ભુક્તિમુક્તિપ્રદાયિની ॥ ૧॥

સૂત્રોક્તવિધિના સ્નાત્વા સન્ધ્યાં કૃત્વા યથાવિધિ ।
બ્રહ્મયજ્ઞં વિધાયાદૌ તતસ્તર્પણમાચરેત્ ॥ ૨॥

નૈત્યિકં સકલં કામં વિધાયાનન્તરં પુમાન્ ।
શિવસ્મરણપૂર્વં હિ ભસ્મરુદ્રાક્ષધારકઃ ॥ ૩॥

વેદોક્તવિધિના સમ્યક્ સમ્પૂર્ણફલસિદ્ધયે ।
પૂજયેત્પરયા ભક્ત્યા પાર્થિવં લિઙ્ગમુત્તમમ્ ॥ ૪॥

નદીતીરે તડાગે ચ પર્વતે કાનનેઽપિ ચ ।
શિવાલયે શુચૌ દેશે પાર્થિવાર્ચા વિધીયતે ॥ ૫॥

શુદ્ધપ્રદેશસમ્ભૂતાં મૃદમાહૃત્ય યત્નતઃ ।
શિવલિઙ્ગં પ્રકલ્પેત સાવધાનતયા દ્વિજાઃ ॥ ૬॥

વિપ્રે ગૌરા સ્મૃતા શોણા બાહુજે પીતવર્ણકા ।
વૈશ્યે કૃષ્ણા પાદજાતે હ્યથવા યત્ર યા ભવેત્ ॥ ૭॥

સઙ્ગૃહ્ય મૃત્તિકાં લિઙ્ગનિર્માણાર્થં પ્રયત્નતઃ ।

અતીવ શુભદેશે ચ સ્થાપયેત્તાં મૃદં શુભામ્ ॥ ૮॥

સંશોધ્ય ચ જલેનાપિ પિણ્ડીકૃત્ય શનૈઃ શનૈઃ ।
વિધીયેત શુભં લિઙ્ગં પાર્થિવં વેદમાર્ગતઃ ॥ ૯॥

તતઃ સમ્પૂજયેદ્ભક્ત્યા ભુક્તિમુક્તિફલાપ્તયે ।
તત્પ્રકારમહં વચ્મિ શ‍ૃણુધ્વં સવિધાનતઃ ॥ ૧૦॥

નમઃ શિવાય મન્ત્રેણાર્ચનદ્રવ્યં ચ પ્રોક્ષયેત્ ।
ભૂરસીતિ ચ મન્ત્રેણ ક્ષેત્રસિદ્ધિં પ્રકારયેત્ ॥ ૧૧॥

આપોઽસ્માનિતિ મન્ત્રેણ જલસંસ્કારમાચરેત્ ।
નમસ્તે રુદ્રમન્ત્રેણ સ્ફાટિકાબન્ધમુચ્યતે ॥ ૧૨॥

શમ્ભવાયેતિ મન્ત્રેણ ક્ષેત્રશુદ્ધિં પ્રકારયેત્ ।
કુર્યાત્પઞ્ચામૃતસ્યાપિ નમઃપૂર્વેણ પ્રોક્ષણમ્ ॥ ૧૩॥

નીલગ્રીવાય મન્ત્રેણ નમઃપૂર્વેણ ભક્તિમાન્ ।
ચરેચ્છઙ્કરલિઙ્ગસ્ય પ્રતિષ્ઠાપનમુત્તમમ્ ॥ ૧૪॥

ભક્તિતસ્તત એતત્તે રુદ્રાવેતિ ચ મન્ત્રતઃ ।
આસનં રમણીયં વૈ દદ્યાદ્વૈદિકમાર્ગકૃત્ ॥ ૧૫॥

માનો મહાન્તમિતિ ચ મન્ત્રેણાવાહનં ચરેત્ ।
યા તે રુદ્રેણ મન્ત્રેણ સઞ્ચરેદુપવેશનમ્ ॥ ૧૬॥

મન્ત્રેણ યામિષુમિતિ ન્યાસં કુર્યાચ્છિવસ્ય ચ ।
અધ્યવોચદિતિ પ્રેમ્ણાધિવાસં મનુનાચરેત્ ॥ ૧૭॥

મનુનાસૌ જીવ ઇતિ દેવતાન્યાસમાચરેત્ ।
અસૌ યોઽવસર્પતીતિ ચાચરેદુપસર્પણમ્ ॥ ૧૮॥

નમોઽસ્તુ નીલગ્રીવાયેતિ પાદ્યં મનુનાહરેત્ ।
અર્ઘ્યં ચ રુદ્રગાયત્ર્યાચમનં ત્ર્યમ્બકેણ ચ ॥ ૧૯॥

પયઃ પૃથિવ્યાં મન્ત્રેણ પયસા સ્નાનમાચરેત્ ।
દધિક્રાવ્ણેતિ મન્ત્રેણ દધિસ્નાનં ચ કારયેત્ ॥ ૨૦॥

ઘૃતસ્નાનં ખલુ ઘૃતં ઘૃતયાવેતિ મન્ત્રતઃ ।
મધુવ્વાતા મધુનક્તં મધુમાન્ન ઇતિ ત્ર્યૃચા ॥ ૨૧॥

મધુખણ્ડસ્નપનં પ્રોક્તમિતિ પઞ્ચામૃતં સ્મૃતમ્ ।
અથવા પાદ્યમન્ત્રેણ સ્નાનં પઞ્ચામૃતેન ચ ॥ ૨૨॥

માનસ્તોકે ઇતિ પ્રેમ્ણા મન્ત્રેણ કટિબન્ધનમ્ ।
નમો ધૃષ્ણવે ઇતિ વા ઉત્તરીયં ચ ધારયેત્ ॥ ૨૩॥

યા તે હેતિરિતિ પ્રેમ્ણા ઋક્ચતુષ્કેણ વૈદિકઃ ।
શિવાય વિધિના ભક્તશ્ચરેદ્વસ્ત્રસમર્પણમ્ ॥ ૨૪॥

નમઃ શ્વભ્ય ઇતિ પ્રેમ્ણા ગન્ધં દદ્યાદૃચા સુધીઃ ।
નમસ્તક્ષભ્ય ઇતિ ચાક્ષતાન્મન્ત્રેણ ચાર્પયેત્ ॥ ૨૫॥

નમઃ પાર્યાય ઇતિ વા પુષ્પં મન્ત્રેણ ચાર્પયેત્ ।
નમઃ પણ્ર્ણાય ઇતિ વા બિલ્વપત્રસમર્પણમ્ ॥ ૨૬॥

નમઃ કપર્દિને ચેતિ ધૂપં દદ્યાદ્યથાવિધિ ।
દીપં દદ્યાદ્યથોક્તં તુ નમ આશવ ઇત્યૃચા ॥ ૨૭॥

નમો જ્યેષ્ઠાય મન્ત્રેણ દદ્યાન્નૈવેદ્યમુત્તમમ્ ।
મનુના ત્ર્યમ્બકમિતિ પુનરાચમનં સ્મૃતમ્ ॥ ૨૮॥

ઇમા રુદ્રાયેતિ ઋચા કુર્યાત્ફલસમર્પણમ્ ।
નમો વ્રજ્યાયેતિ ઋચા સકલં શમ્ભવેઽર્પયેત્ ॥ ૨૯॥

માનો મહાન્તમિતિ ચ માનસ્તોકે ઇતિ તતઃ ।
મન્ત્રદ્વયેનૈકાદશાક્ષતૈ રુદ્રાન્પ્રપૂજયેત્ ॥ ૩૦॥

હિરણ્યગર્ભ ઇતિ ત્ર્યૃચા દક્ષિણાં હિ સમર્પયેત્ ।
દેવસ્યત્વેતિ મન્ત્રેણ હ્યભિષેકં ચરેદ્બુધઃ ॥ ૩૧॥

દીપમન્ત્રેણ વા શમ્ભોર્નીરાજનવિધિં ચરેત્ ।
પુષ્પાઞ્જલિં ચરેદ્ભક્ત્યા ઇમા રુદ્રાય ચ ત્ર્યૃચા ॥ ૩૨॥

માનો મહાન્તમિતિ ચ ચરેત્પ્રાજ્ઞઃ પ્રદક્ષિણામ્ ।
માનસ્તોકેતિ મન્ત્રેણ સાષ્ટાઙ્ગં પ્રણમેત્સુધીઃ ॥ ૩૩॥

એષ તે ઇતિ મન્ત્રેણ શિવમુદ્રાં પ્રદર્શયેત્ ।
યતો યત ઇત્યભયાં જ્ઞાનાખ્યાં ત્ર્યમ્બકેણ ચ ॥ ૩૪॥

નમઃ સેનેતિ મન્ત્રેણ મહામુદ્રાં પ્રદર્શયેત્ ।
દર્શયેદ્ધેનુમુદ્રાં ચ નમો ગોભ્ય ઋચાનયા ॥ ૩૫॥

પઞ્ચ મુદ્રાઃ પ્રદર્શ્યાથ શિવમન્ત્રજપં ચરેત્ ।
શતરુદ્રિયમન્ત્રેણ જપેદ્ વેદવિચક્ષણઃ ॥ ૩૬॥

તતઃ પઞ્ચાઙ્ગપાઠં ચ કુયાદ્ વેદવિચક્ષણઃ ।
દેવાગાત્વિતિ મન્ત્રેણ કુર્યાચ્છમ્ભોર્વિસર્જનમ્ ॥ ૩૭॥

ઇત્યુક્તઃ શિવપૂજાયા વ્યાસતો વૈદિકો વિધિઃ ।
સમાસતશ્ચ શ ृણુત વૈદિકં વિધિમુત્તમમ્ ॥ ૩૮॥

ઋચા સદ્યોજાતમિતિ મૃદાહરણમાચરેત્ ।
વામદેવાય ઇતિ ચ જલપ્રક્ષેપમાચરેત્ ॥ ૩૯॥

અઘોરેણ ચ મન્ત્રેણ લિઙ્ગનિર્માણમાચરેત્ ।
તત્પુરુષાય મન્ત્રેણાહ્વાનં કુર્યાદ્યથાવિધિ ॥ ૪૦॥

સંયોજયેદ્વેદિકાયામીશાનમનુના હરમ્ ।
અન્યત્સર્વં વિધાનં ચ કુર્યાત્સઙ્ક્ષેપતઃ સુધીઃ ॥ ૪૧॥

પઞ્ચાક્ષરેણ મન્ત્રેણ ગુરુદત્તેન વા તથા ।
કુર્યાત્પૂજાં ષોડશોપચારેણ વિધિવત્સુધીઃ ॥ ૪૨॥

ભવાય ભવનાશાય મહાદેવાય ધીમહિ ।
ઉગ્રાય ઉગ્રનાશાય શર્વાય શશિમૌલિને ॥ ૪૩॥

અનેન મનુના વાપિ પૂજયેચ્છઙ્કરં સુધીઃ ।
સુભક્ત્યા ચ ભ્રમં ત્યક્ત્વા ભક્ત્યૈવ ફલદઃ શિવઃ ॥ ૪૪॥

ઇત્યપિ પ્રોક્તમાદૃત્ય વૈદિકં ક્રમપૂજનમ્ ।
પ્રોચ્યતેઽન્યવિધિઃ સમ્યક્સાધારણતયા દ્વિજાઃ ॥ ૪૫॥

પૂજા પાર્થિવલિઙ્ગસ્ય સમ્પ્રોક્તા શિવનામભિઃ ।
તાં શ ृણુધ્વં મુનિશ્રેષ્ઠાઃ સર્વકામપ્રદાયિનીમ્ ॥ ૪૬॥

હરો મહેશ્વરઃ શમ્ભુઃ શૂલપાણિઃ પિનાકધૃક્ ।
શિવઃ પશુપતિશ્ચૈવ મહાદેવ ઇતિ ક્રમાત્ ॥ ૪૭॥

મૃદાહરણસઙ્ઘટ્ટપ્રતિષ્ઠાહ્વાનમેવ ચ ।
સ્નપનં પૂજનં ચૈવ ક્ષમસ્વેતિ વિસર્જનમ્ ॥ ૪૮॥

ઊँકારાદિચતુર્થ્યન્તૈર્નમોઽન્તૈર્નામભિઃ ક્રમાત્ ।

કર્તવ્યાશ્ચ ક્રિયાઃ સર્વા ભક્ત્યા પરમયા મુદા ॥ ૪૯॥

કૃત્વા ન્યાસવિધિં સમ્યક્ ષડઙ્ગં કરયોસ્તથા ।
ષડક્ષરેણ મન્ત્રેણ તતો ધ્યાનં સમાચરેત્ ॥ ૫૦॥

કૈલાસપીઠાસનમધ્યસંસ્થં
ભક્તૈઃ સનન્દાદિભિરર્ચ્યમાનમ્ ।
ભક્તાર્તિદાવાનલમપ્રમેયં
ધ્યાયેદુમાલિઙ્ગિતવિશ્વભૂષણમ્ ॥ ૫૧॥

ધ્યાયેન્નિત્યં મહેશં રજતગિરિનિભં ચારુચન્દ્રાવતંસં
રત્નાકલ્પોજ્જ્વલાઙ્ગં પરશુમૃગવરાભીતિહસ્તં પ્રસન્નમ્ ।
પદ્માસીનં સમન્તાત્સ્તુતમમરગણૈર્વ્યાઘ્રકૃત્તિં વસાનમ્
વિશ્વાદ્યં વિશ્વબીજં નિખિલભયહરં પઞ્ચવક્ત્રં ત્રિનેત્રમ્ ॥ ૫૨॥

ઇતિ ધ્યાત્વા ચ સમ્પૂજ્ય પાર્થિવં લિઙ્ગમુત્તમમ્ ।
જપેત્પઞ્ચાક્ષરં મન્ત્રં ગુરુદત્તં યથાવિધિ ॥ ૫૩॥

સ્તુતિભિશ્ચૈવ દેવેશં સ્તુવીત પ્રણમન્સુધીઃ ।
નાનાભિધાભિર્વિપ્રેન્દ્રાઃ પઠેદ્ વૈ શતરુદ્રિયમ્ ॥ ૫૪॥

તતઃ સાક્ષતપુષ્પાણિ ગૃહીત્વાઞ્જલિના મુદા ।
પ્રાર્થયેચ્છઙ્કરં ભક્ત્યા મન્ત્રૈરેભિઃ સુભક્તિતઃ ॥ ૫૫॥

તાવકસ્ત્વદ્ગુણપ્રાણસ્ત્વચ્ચિત્તોઽહં સદા મૃડ ।
કૃપાનિધે ઇતિ જ્ઞાત્વા ભૂતનાથ પ્રસીદ મે ॥ ૫૬॥

અજ્ઞાનાદ્યદિ વા જ્ઞાનાજ્જપપૂજાદિકં મયા ।
કૃતં તદસ્તુ સફલં કૃપયા તવ શઙ્કર ॥ ૫૭॥

અહં પાપી મહાનદ્ય પાવનશ્ચ ભવાન્મહાન્ ।
ઇતિ વિજ્ઞાય ગૌરીશ યદિચ્છસિ તથા કુરુ ॥ ૫૮॥

વેદૈઃ પુરાણૈઃ સિદ્ધાન્તૈરૃષિભિર્વિવિધૈરપિ ।
ન જ્ઞાતોઽસિ મહાદેવ કુતોઽહં ત્વાં સદાશિવ ॥ ૫૯॥

યથા તથા ત્વદીયોઽસ્મિ સર્વભાવૈર્મહેશ્વર ।
રક્ષણીયસ્ત્વયાહં વૈ પ્રસીદ પરમેશ્વર ॥ ૬૦॥

ઇત્યેવં ચાક્ષતાન્પુષ્પાણ્યારોપ્ય ચ શિવોપરિ ।

પ્રણમેદ્ભક્તિતઃ શમ્ભું સાષ્ટાઙ્ગં વિધિવન્મુને ॥ ૬૧॥

તતઃ પ્રદક્ષિણાં કુર્યાદ્યથોક્તવિધિના સુધીઃ ।
પુનઃ સ્તુવીત દેવેશં સ્તુતિભિઃ શ્રદ્ધયાન્વિતઃ ॥ ૬૨॥

તતો ગલરવં કૃત્વા પ્રણમેચ્છુચિનમ્રધીઃ ।
કુર્યાદ્વિજ્ઞપ્તિમાદૃત્ય વિસર્જનમથાચરેત્ ॥ ૬૩॥

ઇત્યુક્ત્વા મુનિશાર્દૂલાઃ પાર્થિવાર્ચા વિધાનતઃ ।
ભુક્તિદા મુક્તિદા ચૈવ શિવભક્તિવિવર્ધિની ॥ ૬૪॥

ઇત્યધ્યાયં સુચિત્તેન યઃ પઠેચ્છૃણુયાદપિ ।
સર્વપાપવિશુદ્ધાત્મા સર્વાન્કામાનવાપ્નુયાત્ ॥ ૬૫॥

આયુરારોગ્યદં ચૈવ યશસ્યં સ્વર્ગ્યમેવ ચ ।
પુત્રપૌત્રાદિસુખદમાખ્યાનમિદમુત્તમમ્ ॥ ૬૬॥

ઇતિ શ્રીશિવમહાપુરાણે પ્રથમાયાં વિદ્યેશ્વરસંહિતાયાં સાધ્યસાધનખણ્ડે પાર્થિવશિવલિઙ્ગપૂજાવિધિવર્ણનં @નામ વિંશોઽધ્યાયઃ ॥ ૧.૨૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
વિદ્યેશ્વરસંહિતા

## ૧.૨૧. એકવિંશોઽધ્યાયઃ । કામનાનુરોધેન પૂજને શિવલિઙ્ગસઙ્ખ્યાભિધાનમ્ ।

ઋષય ઊચુઃ ।
સૂત સૂત મહાભાગ વ્યાસશિષ્ય નમોઽસ્તુ તે ।
સમ્યગુક્તં ત્વયા તાત પાર્થિવાર્ચાવિધાનકમ્ ॥ ૧॥

કામનાભેદમાશ્રિત્ય સઙ્ખ્યાં બ્રૂહિ વિધાનતઃ ।
શિવપાર્થિવલિઙ્ગાનાં કૃપયા દીનવત્સલ ॥ ૨॥

સૂત ઉવાચ ।
શ઼ૃણુધ્વમૃષયઃ સર્વે પાર્થિવાર્ચાવિધાનકમ્ ।
યસ્યાનુષ્ઠાનમાત્રેણ કૃતકૃત્યો ભવેન્નરઃ ॥ ૩॥

અકૃત્વા પાર્થિવં લિઙ્ગં યોઽન્યદેવં પ્રપૂજયેત્ ।
વૃથા ભવતિ સા પૂજા દમદાનાદિકં વૃથા ॥ ૪॥

સઙ્ખ્યા પાર્થિવલિઙ્ગાનાં યથાકામં નિગદ્યતે ।
સઙ્ખ્યા સદ્યો મુનિશ્રેષ્ઠ નિશ્ચયેન ફલપ્રદા ॥ ૫॥

પ્રથમાવાહનં તત્ર પ્રતિષ્ઠા પૂજનં પૃથક્ ।
લિઙ્ગાકારં સમં તત્ર સર્વં જ્ઞેયં પૃથક્પૃથક્ ॥ ૬॥

વિદ્યાર્થી પુરુષઃ પ્રીત્યા સહસ્રમિતપાર્થિવમ્ ।
પૂજયેચ્છિવલિઙ્ગં હિ નિશ્ચયાત્તત્ફલપ્રદમ્ ॥ ૭॥

નરઃ પાર્થિવલિઙ્ગાનાં ધનાર્થી ચ તદર્ધકમ્ ।
પુત્રાર્થી સાર્ધસાહસ્રં વસ્ત્રાર્થી શતપઞ્ચકમ્ ॥ ૮॥

મોક્ષાર્થી કોટિગુણિતં ભૂકામશ્ચ સહસ્રકમ્ ।
દયાર્થી ચ ત્રિસાહસ્રં તીર્થાર્થી દ્વિસહસ્રકમ્ ॥ ૯॥

સુહૃત્કામી ત્રિસાહસ્રં વશ્યાર્થી શતમષ્ટકમ્ ।
મારણાર્થી સપ્તશતં મોહનાર્થી શતાષ્ટકમ્ ॥ ૧૦॥

ઉચ્ચાટનપરશ્ચૈવ સહસ્રં ચ યથોક્તતઃ ।
સ્તમ્ભનાર્થી સહસ્રં તુ દ્વેષણાર્થી તદર્ધકમ્ ॥ ૧૧॥

નિગડાન્મુક્તિકામસ્તુ સહસ્રં સાર્ધમુત્તમમ્ ।
મહારાજભયે પઞ્ચશતં જ્ઞેયં વિચક્ષણૈઃ ॥ ૧૨॥

ચૌરાદિસઙ્કટે જ્ઞેયં પાર્થિવાનાં શતદ્વયમ્ ।
ડાકિન્યાદિભયે પઞ્ચશતમુક્તં ચ પાર્થિવમ્ ॥ ૧૩॥

દારિદ્ર્યે પઞ્ચસાહસ્રમયુતં સર્વકામદમ્ । પ્લેઅસે ચેચ્ક્
અથ નિત્યવિધિં વક્ષ્યે શ્ૃણુધ્વં મુનિસત્તમાઃ ॥ ૧૪॥

એકં પાપહરં પ્રોક્તં દ્વિલિઙ્ગં ચાર્થસિદ્ધિદમ્ ।
ત્રિલિઙ્ગં સર્વકામાનાં કારણં પરમીરિતમ્ ॥ ૧૫॥

ઉત્તરોત્તરમેવં સ્યાત્પૂર્વોક્તગણનાવધિ ।
મતાન્તરમથો વક્ષ્યે સઙ્ખ્યાયાં મુનિભેદતઃ ॥ ૧૬॥

લિઙ્ગાનામયુતં કૃત્વા પાર્થિવાનાં સુબુદ્ધિમાન્ ।
નિર્ભયો હિ ભવેન્નૂનં મહારાજભયં હરેત્ ॥ ૧૭॥

કારાગૃહાદિમુક્ત્યર્થમયુતં કારયેદ્ બુધઃ ।
ડાકિન્યાદિભયે સપ્તસહસ્રં કારયેત્તથા ॥ ૧૮॥

અપુત્રઃ પઞ્ચપઞ્ચાશત્ સહસ્રાણિ પ્રકારયેત્ ।
લિઙ્ગાનામયુતેનૈવ કન્યકાસન્તતિં લભેત્ ॥ ૧૯॥

લિઙ્ગાનામયુતેનૈવ વિષ્ણ્વાદ્યૈશ્વર્યમાપ્નુયાત્ ।
લિઙ્ગાનાં પ્રયુતેનૈવ હ્યતુલાં શ્રિયમાપ્નુયાત્ ॥ ૨૦॥

કોટિમેકાં તુ લિઙ્ગાનાં યઃ કરોતિ નરો ભુવિ ।
શિવ એવ ભવેત્સોઽપિ નાત્ર કાર્યા વિચારણા ॥ ૨૧॥

અર્ચા પાર્થિવલિઙ્ગાનાં કોટિયજ્ઞફલપ્રદા ।
ભુક્તિદા મુક્તિદા નિત્યં તતઃ કામાર્થિનાં નૃણામ્ ॥ ૨૨॥

વિના લિઙ્ગાર્ચનં યસ્ય કાલો ગચ્છતિ નિત્યશઃ ।
મહાહાનિર્ભવેત્તસ્ય દુર્વૃત્તસ્ય દુરાત્મનઃ ॥ ૨૩॥

એકતઃ સર્વદાનાનિ વ્રતાનિ વિવિધાનિ ચ ।
તીર્થાનિ નિયમા યજ્ઞા લિઙ્ગાર્ચા ચૈકતઃ સ્મૃતા ॥ ૨૪॥

કલૌ લિઙ્ગાર્ચનં શ્રેષ્ઠં યથા લોકે પ્રદૃશ્યતે ।
તથાન્યન્નાસ્તિ શાસ્ત્રાણામેષ સિદ્ધાન્તનિશ્ચયઃ ॥ ૨૫॥

ભુક્તિમુક્તિપ્રદં લિઙ્ગં વિવિધાપન્નિવારણમ્ ।
પૂજયિત્વા નરો નિત્યં શિવસાયુજ્યમાપ્નુયાત્ ॥ ૨૬॥

શિવનામમયં લિઙ્ગં નિત્યં પૂજ્યં મહર્ષિભિઃ ।
યતશ્ચ સર્વલિઙ્ગેષુ તસ્માત્પૂજ્યં વિધાનતઃ ॥ ૨૭॥

ઉત્તમં મધ્યમં નીચં ત્રિવિધં લિઙ્ગમીરિતમ્ ।
માનતો મુનિશાર્દૂલાસ્તચ્છૃણુધ્વં વદામ્યહમ્ ॥ ૨૮॥

ચતુરઙ્ગુલમુચ્છ્રાયં રમ્યં વેદિકયા યુતમ્ ।
ઉત્તમં લિઙ્ગમાખ્યાતં મુનિભિઃ શાસ્ત્રકોવિદૈઃ ॥ ૨૯॥

તદર્દ્ધં મધ્યમં પ્રોક્તં તદર્દ્ધમધમં સ્મૃતમ્ ।
ઇત્થં ત્રિવિધમાખ્યાતમુત્તરોત્તરતઃ પરમ્ ॥ ૩૦॥

અનેકલિઙ્ગં યો નિત્યં ભક્તિશ્રદ્ધાસમન્વિતઃ ।
પૂજયેત્સ લભેત્કામાન્મનસા માનસેપ્સિતાન્ ॥ ૩૧॥

ન લિઙ્ગારાધનાદન્યત્પુણ્યં વેદચતુષ્ટયે ।

વિદ્યતે સર્વશાસ્ત્રાણામેષ એવ વિનિશ્ચયઃ ॥ ૩૨॥

સર્વમેતત્પરિત્યજ્ય કર્મજાલમશેષતઃ ।
ભક્ત્યા પરમયા વિદ્વાઁલ્લિઙ્ગમેકં પ્રપૂજયેત્ ॥ ૩૩॥

લિઙ્ગેઽર્ચિતેઽર્ચિતં સર્વં જગત્સ્થાવરજઙ્ગમમ્ ।
સંસારામ્બુધિમગ્નાનાં નાન્યત્તરણસાધનમ્ ॥ ૩૪॥

અજ્ઞાનતિમિરાન્ધાનાં વિષયાસક્તચેતસામ્ ।
પ્લવો નાન્યોઽસ્તિ જગતિ લિઙ્ગારાધનમન્તરા ॥ ૩૫॥

હરિબ્રહ્માદયો દેવા મુનયો યક્ષરાક્ષસાઃ ।
ગન્ધર્વાશ્ચારણાઃ સિદ્ધા દૈતેયા દાનવાસ્તથા ॥ ૩૬॥

નાગાઃ શેષપ્રભૃતયો ગરુડાદ્યાઃ ખગાસ્તથા ।
સપ્રજાપતયશ્ચાન્યે મનવઃ કિન્નરા નરાઃ ॥ ૩૭॥

પૂજયિત્વા મહાભક્ત્યા લિઙ્ગં સર્વાર્થસિદ્ધિદમ્ ।
પ્રાપ્તાઃ કામાનભીષ્ટાંશ્ચ તાંસ્તાન્સર્વાન્હૃદિ સ્થિતાન્ ॥ ૩૮॥

બ્રાહ્મણઃ ક્ષત્રિયો વૈશ્યઃ શૂદ્રો વા પ્રતિલોમજઃ ।
પૂજયેત્સતતં લિઙ્ગં તત્તન્મન્ત્રેણ સાદરમ્ ॥ ૩૯॥

કિં બહૂક્તેન મુનયઃ સ્ત્રીણામપિ તથાન્યતઃ ।
અધિકારોઽસ્તિ સર્વેષાં શિવલિઙ્ગાર્ચને દ્વિજાઃ ॥ ૪૦॥

દ્વિજાનાં વૈદિકેનાપિ માર્ગેણારાધનં વરમ્ ।
અન્યેષામપિ જન્તૂનાં વૈદિકેન ન સમ્મતમ્ ॥ ૪૧॥

વૈદિકાનાં દ્વિજાનાં ચ પૂજા વૈદિકમાર્ગતઃ ।
કર્તવ્યા નાન્યમાર્ગેણ ઇત્યાહ ભગવાન્ શિવઃ ॥ ૪૨॥

દધીચિગૌતમાદીનાં શાપેનાદગ્ધચેતસામ્ ।
દ્વિજાનાં જાયતે શ્રદ્ધા નૈવ વૈદિકકર્મણિ ॥ ૪૩॥

યો વૈદિકમનાદૃત્ય કર્મ સ્માર્તમથાપિ વા ।
અન્યત્સમાચરેન્મર્ત્યો ન સઙ્કલ્પફલં લભેત્ ॥ ૪૪॥

ઇત્થં કૃત્વાર્ચનં શમ્ભોર્નૈવેદ્યાન્તં વિધાનતઃ ।
પૂજયેદષ્ટમૂર્તીશ્ચ તત્રૈવ ત્રિજગન્મયીઃ ॥ ૪૫॥

ક્ષિતિરાપોઽનલો વાયુરાકાશઃ સૂર્યસોમકૌ ।
યજમાન ઇતિ ત્વષ્ટૌ મૂર્તયઃ પરિકીર્તિતાઃ ॥ ૪૬॥

શર્વો ભવશ્ચ રુદ્રશ્ચ ઉગ્રો ભીમ ઇતીશ્વરઃ ।
મહાદેવઃ પશુપતિરેતાન્મૂર્તિભિરર્ચયેત્ ॥ ૪૭॥

પૂજયેત્પરિવારં ચ તતઃ શમ્ભોઃ સુભક્તિતઃ ।
ઈશાનાદિક્રમાત્તત્ર ચન્દનાક્ષતપત્રકૈઃ ॥ ૪૮॥

ઈશાનં નન્દિનં ચણ્ડં મહાકાલં ચ ભૃઙ્ગિણમ્ ।
વૃષં સ્કન્દં કપર્દીશં સોમં શુક્રં ચ તત્ક્રમાત્ ॥ ૪૯॥

અગ્રતો વીરભદ્રં ચ પૃષ્ઠે કીર્તિમુખં તથા ।
તત એકાદશાન્ રુદ્રાન્પૂજયેદ્વિધિના તતઃ ॥ ૫૦॥

તતઃ પઞ્ચાક્ષરં જપ્ત્વા શતરુદ્રિયમેવ ચ ।
સ્તુતીર્નાનાવિધાઃ કૃત્વા પઞ્ચાઙ્ગપઠનં તથા ॥ ૫૧॥

તતઃ પ્રદક્ષિણાં કૃત્વા નત્વા લિઙ્ગં વિસર્જયેત્ ।
ઇતિ પ્રોક્તમશેષં ચ શિવપૂજનમાદરાત્ ॥ ૫૨॥

રાત્રાવુદઙ્મુખઃ કુર્યાદ્ દેવકાર્યં સદૈવ હિ ।
શિવાર્ચનં સદાપ્યેવં શુચિઃ કુર્યાદુદઙ્મુખઃ ॥ ૫૩॥

ન પ્રાચીમગ્રતઃ શમ્ભોર્નોદીચીં શક્તિસંહિતામ્ ।
ન પ્રતીચીં યતઃ પૃષ્ઠમતો ગ્રાહ્યં સમાશ્રયેત્ ॥ ૫૪॥

વિના ભસ્મત્રિપુણ્ડ્રેણ વિના રુદ્રાક્ષમાલયા ।
બિલ્વપત્રં વિના નૈવ પૂજયેચ્છઙ્કરં બુધઃ ॥ ૫૫॥

ભસ્માપ્રાપ્તૌ મુનિશ્રેષ્ઠાઃ પ્રવૃત્તે શિવપૂજને ।
તસ્માન્મૃદાપિ કર્તવ્યં લલાટે ચ ત્રિપુણ્ડ્રકમ્ ॥ ૫૬॥

ઇતિ શ્રીશિવમહાપુરાણે પ્રથમાયાં વિદ્યેશ્વરસંહિતાયાં સાધ્યસાધનખણ્ડે પાર્થિવપૂજનવર્ણનં નામૈકવિંશોઽધ્યાયઃ ॥ ૧.૨૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
વિદ્યેશ્વરસંહિતા

## ૧.૨૨. દ્વાવિંશોઽધ્યાયઃ । શિવનૈવેદ્યભક્ષણનિર્ણયઃ બિલ્વમાહાત્મ્યં ચ ।

ઋષય ઊચુઃ ।
અગ્રાહ્યં શિવનૈવેદ્યમિતિ પૂર્વં શ્રુતં વચઃ ।
બ્રૂહિ તન્નિર્ણયં બિલ્વમાહાત્મ્યમપિ સન્મુને ॥ ૧॥

સૂત ઉવાચ ।
શ‍ૃણુધ્વં મુનયઃસર્વે સાવધાનતયાધુના ।
સર્વં વદામિ સમ્પ્રીત્યા ધન્યા યૂયં શિવવ્રતાઃ ॥ ૨॥

શિવભક્તઃ શુચિઃ શુદ્ધઃ સદ્વ્રતી દૃઢનિશ્ચયઃ ।
ભક્ષયેચ્છિવનૈવેદ્યં ત્યજેદગ્રાહ્યભાવનામ્ ॥ ૩॥

દૃષ્ટ્વાપિ શિવનૈવેદ્યં યાન્તિ પાપાનિ દૂરતઃ ।
ભુક્તે તુ શિવનૈવેદ્યે પુણ્યાન્યાયાન્તિ કોટિશઃ ॥ ૪॥

અલં યાગસહસ્રેણાપ્યલં યાગાર્બુદૈરપિ ।
ભક્ષિતે શિવનૈવેદ્યે શિવસાયુજ્યમાપ્નુયાત્ ॥ ૫॥

યદ્ગૃહે શિવનૈવેદ્યપ્રચારોઽપિ પ્રજાયતે ।
તદ્ગૃહં પાવનં સર્વમન્યપાવનકારણમ્ ॥ ૬॥

આગતં શિવનૈવેદ્યં ગૃહીત્વા શિરસા મુદા ।
ભક્ષણીયં પ્રયત્નેન શિવસ્મરણપૂર્વકમ્ ॥ ૭॥

આગતં શિવનૈવેદ્યમન્યદા ગ્રાહ્યમિત્યપિ ।
વિલમ્બે પાપસમ્બન્ધો ભવત્યેવ હિ માનવઃ ॥ ૮॥

ન યસ્ય શિવનૈવેદ્ય ગ્રહણેચ્છા પ્રજાયતે ।
સ પાપિષ્ઠઃ ગરિષ્ઠઃ સ્યાન્નરકં યાત્યપિ ધ્રુવમ્ ॥ ૯॥

હૃદયે ચન્દ્રકાન્તે ચ સ્વર્ણરૂપ્યાદિનિર્મિતે ।
શિવદીક્ષાવતા ભક્તેનેદં ભક્ષ્યમિતીર્યતે ॥ ૧૦॥

શિવદીક્ષાન્વિતો ભક્તો મહાપ્રસાદસંજ્ઞકમ્ ।
સર્વેષામપિ લિઙ્ગાનાં નૈવેદ્યં ભક્ષયેચ્છુભમ્ ॥ ૧૧॥

અન્યદીક્ષાયુજાં નૃણાં શિવભક્તિરતાત્મનામ્ ।
શ‍ૃણુધ્વં નિર્ણયં પ્રીત્યા શિવનૈવેદ્યભક્ષણે ॥ ૧૨॥

શાલગ્રામોદ્ભવે લિઙ્ગે રસલિઙ્ગે તથા દ્વિજાઃ ।

પાષાણે રાજતે સ્વર્ણે સુરસિદ્ધપ્રતિષ્ઠિતે ॥ ૧૩॥

કાશ્મીરે સ્ફાટિકે રાત્ને જ્યોતિર્લિઙ્ગેષુ સર્વશઃ ।
ચાન્દ્રાયણસમં પ્રોક્તં શમ્ભોર્નૈવેદ્યભક્ષણમ્ ॥ ૧૪॥

બ્રહ્મહાપિ શુચિર્ભૂત્વા નિર્માલ્યં યસ્તુ ધારયેત્ ।
ભક્ષયિત્વા દ્રુતં તસ્ય સર્વપાપં પ્રણશ્યતિ ॥ ૧૫॥

ચણ્ડાધિકારો યત્રાસ્તિ તદ્ભોક્તવ્યં ન માનવૈઃ ।
ચણ્ડાધિકારો નો યત્ર ભોક્તવ્યં તચ્ચ ભક્તિતઃ ॥ ૧૬॥

બાણલિઙ્ગે ચ લૌહે ચ સિદ્ધે લિઙ્ગે સ્વયમ્ભુવિ ।
પ્રતિમાસુ ચ સર્વાસુ ન ચણ્ડોઽધિકૃતો ભવેત્ ॥ ૧૭॥

સ્નાપયિત્વા વિધાનેન યો લિઙ્ગસ્નપનોદકમ્ ।
ત્રિઃપિબેત્ત્રિવિધં પાપં તસ્યેહાશુ વિનશ્યતિ ॥ ૧૮॥

અગ્રાહ્યં શિવનૈવેદ્યં પત્રં પુષ્પં ફલં જલમ્ ।
શાલગ્રામશિલાસઙ્ગાત્સર્વં યાતિ પવિત્રતામ્ ॥ ૧૯॥

લિઙ્ગોપરિ ચ યદ્ દ્રવ્યં તદગ્રાહ્યં મુનીશ્વરાઃ ।
સુપવિત્રં ચ તજ્જ્ઞેયં યલ્લિઙ્ગસ્પર્શબાહ્યતઃ ॥ ૨૦॥

નૈવેદ્યનિર્ણયઃ પ્રોક્ત ઇત્થં વો મુનિસત્તમાઃ ।
શ઼ૃણુધ્વં બિલ્વમાહાત્મ્યં સાવધાનતયાદરાત્ ॥ ૨૧॥

મહાદેવસ્વરૂપોઽયં બિલ્વો દેવૈરપિ સ્તુતઃ ।
યથાકથઞ્ચિદેતસ્ય મહિમા જ્ઞાયતે કથમ્ ॥ ૨૨॥

પુણ્યતીર્થાનિ યાવન્તિ લોકેષુ પ્રથિતાન્યપિ ।
તાનિ સર્વાણિ તીર્થાનિ બિલ્વમૂલે વસન્તિ હિ ॥ ૨૩॥

બિલ્વમૂલે મહાદેવં લિઙ્ગરૂપિણમવ્યયમ્ ।
યઃ પૂજયતિ પુણ્યાત્મા સ શિવં પ્રાપ્નુયાદ્ ધ્રુવમ્ ॥ ૨૪॥

બિલ્વમૂલે જલૈર્યસ્તુ મૂર્ધાનમભિષિઞ્ચતિ ।
સ સર્વતીર્થસ્નાતઃ સ્યાત્સ એવ ભુવિ પાવનઃ ॥ ૨૫॥

એતસ્ય બિલ્વમૂલસ્યાથાલવાલમનુત્તમમ્ ।
જલાકુલં મહાદેવો દૃષ્ટ્વા તુષ્ટો ભવત્યલમ્ ॥ ૨૬॥

પૂજયેદ્ બિલ્વમૂલં યો ગન્ધપુષ્પાદિભિર્નરઃ ।
શિવલોકમવાપ્નોતિ સન્તતિર્વર્ધતે સુખમ્ ॥ ૨૭॥

બિલ્વમૂલે દીપમાલાં યઃ કલ્પયતિ સાદરમ્ ।
સ તત્ત્વજ્ઞાનસમ્પન્નો મહેશાન્તર્ગતો ભવેત્ ॥ ૨૮॥

બિલ્વશાખાં સમાદાય હસ્તેન નવપલ્લવમ્ ।
ગૃહીત્વા પૂજયેદ્ બિલ્વં સ ચ પાપૈઃ પ્રમુચ્યતે ॥ ૨૯॥

બિલ્વમૂલે શિવરતં ભોજયેદ્યસ્તુ ભક્તિતઃ ।
એકં વા કોટિગુણિતં તસ્ય પુણ્યં પ્રજાયતે ॥ ૩૦॥

બિલ્વમૂલે ક્ષીરયુક્તમન્નમાજ્યેન સંયુતમ્ ।
યો દદ્યાચ્છિવભક્તાય સ દરિદ્રો ન જાયતે ॥ ૩૧॥

સાઙ્ગોપાઙ્ગમિતિ પ્રોક્તં શિવલિઙ્ગપ્રપૂજનમ્ ।
પ્રવૃત્તાનાં નિવૃત્તાનાં ભેદતો દ્વિવિધં દ્વિજાઃ ॥ ૩૨॥

પ્રવૃત્તાનાં પીઠપૂજા સર્વાભીષ્ટપ્રદા ભુવિ ।
પાત્રેણૈવ પ્રવૃત્તસ્તુ સર્વપૂજાં સમાચરેત્ ॥ ૩૩॥

નૈવેદ્યમભિષેકાન્તે શાલ્યન્નેન સમાચરેત્ ।
પૂજાન્તે સ્થાપયેલ્લિઙ્ગં પુટે શુદ્ધે પૃથગ્ગૃહે ॥ ૩૪॥

કરપૂજાનિવૃત્તાનાં સ્વભોજ્યં તુ નિવેદયેત્ ।
નિવૃત્તાનાં પરં સૂક્ષ્મં લિઙ્ગમેવ વિશિષ્યતે ॥ ૩૫॥

વિભૂત્યભ્યર્ચનં કુર્યાદ્વિભૂતિં ચ નિવેદયેત્ ।
પૂજાં કૃત્વા તથા લિઙ્ગં શિરસા ધારયેત્સદા ॥ ૩૬॥

ઇતિ શ્રીશિવમહાપુરાણે પ્રથમાયાં વિદ્યેશ્વરસંહિતાયાં સાધ્યસાધનખણ્ડે શિવનૈવેદ્યવર્ણનં નામ દ્વાવિંશોઽધ્યાયઃ ॥ ૧.૨૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
વિદ્યેશ્વરસંહિતા

## ૧.૨૩. ત્રયોવિંશોઽધ્યાયઃ । રુદ્રાક્ષમાહાત્મ્યં શિવનામમહિમા ચ ।

ઋષય ઊચુઃ ।
સૂત સૂત મહાભાગ વ્યાસશિષ્ય નમોઽસ્તુ તે ।
તદેવ વ્યાસતો બ્રૂહિ ભસ્મમાહાત્મ્યમુત્તમમ્ ॥ ૧॥

તથા રુદ્રાક્ષમાહાત્મ્યં નામમાહાત્મ્યમુત્તમમ્ ।
ત્રિતયં બ્રૂહિ સુપ્રીત્યા મમાનન્દય માનસમ્ ॥ ૨॥

સૂત ઉવાચ ।
સાધુ પૃષ્ટં ભવદ્ભિશ્ચ લોકાનાં હિતકારકમ્ ।
ભવન્તો વૈ મહાધન્યાઃ પવિત્રાઃ કુલભૂષણાઃ ॥ ૩॥

યેષાં ચૈવ શિવઃ સાક્ષાદ્ દૈવતં પરમં શુભમ્ ।
સદાશિવકથા લોકે વલ્લભા ભવતાં સદા ॥ ૪॥

તે ધન્યાશ્ચ કૃતાર્થાશ્ચ સફલં દેહધારણમ્ ।
ઉદ્ધૃતં ચ કુલં તેષાં યે શિવં સમુપાસતે ॥ ૫॥

શિવનામ મુખે યસ્ય સદા શિવશિવેતિ ચ ।
પાપાનિ ન સ્પૃશન્ત્યેવ ખદિરાઙ્ગારકં યથા ॥ ૬॥

શ્રીશિવાય નમસ્તુભ્યં મુખં વ્યાહરતે યદા ।
તન્મુખં પાવનં તીર્થં સર્વપાપવિનાશનમ્ ॥ ૭॥

તન્મુખં ચ તથા યો વૈ પશ્યતિ પ્રીતિમાન્નરઃ ।
તીર્થજન્યં ફલં તસ્ય ભવતીતિ સુનિશ્ચિતમ્ ॥ ૮॥

યત્ર ત્રયં સદા તિષ્ઠેદેતચ્છુભતરં દ્વિજાઃ ।
તસ્ય દર્શનમાત્રેણ વેણીસ્નાનફલં લભેત્ ॥ ૯॥

શિવનામ વિભૂતિશ્ચ તથા રુદ્રાક્ષ એવ ચ ।
એતત્ત્રયં મહાપુણ્યં ત્રિવેણીસદૃશં સ્મૃતમ્ ॥ ૧૦॥

એતત્ત્રયં શરીરે ચ યસ્ય તિષ્ઠતિ નિત્યશઃ ।
તસ્યૈવ દર્શનં લોકે દુર્લભં પાપહારકમ્ ॥ ૧૧॥

તદ્દર્શનં યથા વેણી નોભયોરન્તરં મનાક્ ।
એવં યો ન વિજાનાતિ સ પાપિષ્ઠો ન સંશયઃ ॥ ૧૨॥

વિભૂતિર્યસ્ય નો ભાલે નાઙ્ગે રુદ્રાક્ષધારણમ્ ।

નાસ્યે શિવમયી વાણી તં ત્યજેદધમં યથા ॥ ૧૩॥

શૈવં નામ યથા ગઙ્ગા વિભૂતિર્યમુના મતા ।
રુદ્રાક્ષં વિધિજા પ્રોક્તા સર્વપાપવિનાશિની ॥ ૧૪॥

શરીરે ચ ત્રયં યસ્ય તત્ફલં ચૈકતઃ સ્થિતમ્ ।
એકતો વેણિકાયાશ્ચ સ્નાનજં તુ ફલં બુધૈઃ ॥ ૧૫॥

તદેવં તુલિતં પૂર્વં બ્રહ્મણા હિતકારિણા ।
સમાનં ચૈવ તજ્જાતં તસ્માદ્ ધાર્યં સદા બુધૈઃ ॥ ૧૬॥

તદ્દિનં હિ સમારભ્ય બ્રહ્મવિષ્ણ્વાદિભિઃ સુરૈઃ ।
ધાર્યતે ત્રિતયં તચ્ચ દર્શનાત્પાપહારકમ્ ॥ ૧૭॥

ઋષ્ય ઊચુઃ ।
ઈદૃશં હિ ફલં પ્રોક્તં નામાદિત્રિતયોદ્ભવમ્ ।
તન્માહાત્મ્યં વિશેષેણ વક્તુમર્હસિ સુવ્રત ॥ ૧૮॥

સૂત ઉવાચ ।
ઋષયો હિ મહાપ્રાજ્ઞાઃ સચ્છૈવા જ્ઞાનિનાં વરાઃ ।
તન્માહાત્મ્યં હિ સદ્ભક્ત્યા શૃણુતાદરતો દ્વિજાઃ ॥ ૧૯॥

સુગૂઢમપિ શાસ્ત્રેષુ પુરાણેષુ શ્રુતિષ્વપિ ।
ભવત્સ્નેહાન્મયા વિપ્રાઃ પ્રકાશઃ ક્રિયતેઽધુના ॥ ૨૦॥

કસ્તત્ત્રિતયમાહાત્મ્યં સઞ્જાનાતિ દ્વિજોત્તમાઃ ।
મહેશ્વરં વિના સર્વં બ્રહ્માણ્ડે સદસત્પરમ્ ॥ ૨૧॥

વચ્મ્યહં નામમાહાત્મ્યં યથાભક્તિ સમાસતઃ ।
શૃણુત પ્રીતિતો વિપ્રાઃ સર્વપાપહરં પરમ્ ॥ ૨૨॥

શિવેતિ નામદાવાગ્નેર્મહાપાતકપર્વતાઃ ।
ભસ્મીભવન્ત્યનાયાસાત્સત્યં સત્યં ન સંશયઃ ॥ ૨૩॥

પાપમૂલાનિ દુઃખાનિ વિવિધાન્યપિ શૌનક ।
શિવનામૈકનશ્યાનિ નાન્યનશ્યાનિ સર્વથા ॥ ૨૪॥

સ વૈદિકઃ સ પુણ્યાત્મા સ ધન્યઃ સ બુધો મતઃ ।
શિવનામજપાસક્તો યો નિત્યં ભુવિ માનવઃ ॥ ૨૫॥

ભવન્તિ વિવિધા ધર્માસ્તેષાં સદ્યઃ ફલોન્મુખાઃ ।

યેષાં ભવતિ વિશ્વાસઃ શિવનામજપે મુને ॥ ૨૬॥

પાતકાનિ વિનશ્યન્તિ યાવન્તિ શિવનામતઃ ।
ભુવિ તાવન્તિ પાપાનિ ક્રિયન્તે ન નરૈર્મુને ॥ ૨૭॥

બ્રહ્મહત્યાદિપાપાનાં રાશીનપ્રમિતાન્મુને ।
શિવનામ દ્રુતં પ્રોક્તં નાશયત્યખિલાન્નરૈઃ ॥ ૨૮॥

શિવનામતરીં પ્રાપ્ય સંસારાબ્ધિં તરન્તિ યે ।
સંસારમૂલપાપાનિ તાનિ નશ્યન્ત્યસંશયમ્ ॥ ૨૯॥

સંસારમૂલભૂતાનાં પાતકાનાં મહામુને ।
શિવનામકુઠારેણ વિનાશો જાયતે ધ્રુવમ્ ॥ ૩૦॥

શિવનામામૃતં પેયં પાપદાવાનલાર્દિતૈઃ ।
પાપદાવાગ્નિતપ્તાનાં શાન્તિસ્તેન વિના ન હિ ॥ ૩૧॥

શિવેતિ નામપીયૂષવર્ષધારાપરિપ્લુતાઃ ।
સંસારદવમધ્યેઽપિ ન શોચન્તિ કદાચન ॥ ૩૨॥

શિવનામ્નિ મહદ્ભક્તિર્જાતા યેષાં મહાત્મનામ્ ।
તદ્વિધાનાં તુ સહસા મુક્તિર્ભવતિ સર્વથા ॥ ૩૩॥

અનેકજન્મભિર્યેન તપસ્તપ્તં મુનીશ્વર ।
શિવનામ્નિ ભવેદ્ભક્તિઃ સર્વપાપાપહારિણી ॥ ૩૪॥

યસ્યાસાધારણી શમ્ભુનામ્નિ ભક્તિરખણ્ડિતા ।
તસ્યૈવ મોક્ષઃ સુલભો નાન્યસ્યેતિ મતિર્મમ ॥ ૩૫॥

કૃત્વાપ્યનેકપાપાનિ શિવનામજપાદરઃ ।
સર્વપાપવિનિર્મુક્તો ભવત્યેવ ન સંશયઃ ॥ ૩૬॥

ભવન્તિ ભસ્મસાદ્ વૃક્ષા દવદગ્ધા યથા વને ।
તથા તાવન્તિ દગ્ધાનિ પાપાનિ શિવનામતઃ ॥ ૩૭॥

યો નિત્યં ભસ્મપૂતાઙ્ગઃ શિવનામજપાદરઃ ।
સ તરત્યેવ સંસારમઘોરમપિ શૌનક ॥ ૩૮॥

બ્રહ્મસ્વહરણં કૃત્વા હત્વાપિ બ્રાહ્મણાન્બહૂન્ ।
ન લિપ્યતે નરઃ પાપૈઃ શિવનામજપાદરઃ ॥ ૩૯॥

વિલોક્ય વેદાનખિલાન્ શિવનામજપઃ પરઃ ।
સંસારતરણોપાય ઇતિ પૂર્વૈર્વિનિશ્ચિતમ્ ॥ ૪૦॥

કિં બહૂક્ત્યા મુનિશ્રેષ્ઠાઃ શ્લોકેનૈકેન વચ્મ્યહમ્ ।
શિવાભિધાનમાહાત્મ્યં સર્વપાપાપહારણમ્ ॥ ૪૧॥

પાપાનાં હરણે શમ્ભોર્નામ્નઃ શક્તિર્હિ યાવતી ।
શક્નોતિ પાતકં તાવત્કર્તું નાપિ નરઃ ક્વચિત્ ॥ ૪૨॥

શિવનામપ્રભાવેણ લેભે સદ્ગતિમુત્તમામ્ ।
ઇન્દ્રદ્યુમ્નનૃપઃ પૂર્વં મહાપાપયુતો મુને ॥ ૪૩॥

તથા કાચિદ્ દ્વિજા યોષાઽસૌ મુને બહુપાપિની ।
શિવનામપ્રભાવેણ લેભે સદ્ગતિમુત્તમામ્ ॥ ૪૪॥

ઇત્યુક્તં વો દ્વિજશ્રેષ્ઠા નામમાહાત્મ્યમુત્તમમ્ ।
શ‍ૃણુધ્વં ભસ્મમાહાત્મ્યં સર્વપાવનપાવનમ્ ॥ ૪૫॥

ઇતિ શ્રીશિવમહાપુરાણે પ્રથમાયાં વિદ્યેશ્વરસંહિતાયાં સાધ્યસાધનખણ્ડે શિવનામમાહાત્મ્યવર્ણનં નામ ત્રયોવિંશોઽધ્યાયઃ ॥ ૧.૨૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
વિદ્યેશ્વરસંહિતા

## ૧.૨૪. ચતુર્વિંશોઽધ્યાયઃ । ભસ્મમાહાત્મ્મ્ ।

સૂત ઉવાચ ।
દ્વિવિધં ભસ્મ સમ્પ્રોક્તં સર્વમઙ્ગલદં પરમ્ ।
તત્પ્રકારમહં વક્ષ્યે સાવધાનતયા શ‍ૃણુ ॥ ૧॥

એકં જ્ઞેયં મહાભસ્મ દ્વિતીયં સ્વલ્પસંજ્ઞકમ્ ।
મહાભસ્મ ઇતિ પ્રોક્તં ભસ્મ નાનાવિધં પરમ્ ॥ ૨॥

તદ્ભસ્મ ત્રિવિધં પ્રોક્તં શ્રૌતં સ્માર્તં ચ લૌકિકમ્ ।
ભસ્મૈવ સ્વલ્પસંજ્ઞં હિ બહુધા પરિકીર્તિતમ્ ॥ ૩॥

શ્રૌતં ભસ્મ તથા સ્માર્તં દ્વિજાનામેવ કીર્તિતમ્ ।
અન્યેષામપિ સર્વેષામપરં ભસ્મ લૌકિકમ્ ॥ ૪॥

ધારણં મન્ત્રતઃ પ્રોક્તં દ્વિજાનાં મુનિપુઙ્ગવૈઃ ।
કેવલં ધારણં જ્ઞેયમન્યેષાં મન્ત્રવર્જિતમ્ ॥ ૫॥

આગ્નેયમુચ્યતે ભસ્મ દગ્ધગોમયસમ્ભવમ્ ।
તદપિ દ્રવ્યમિત્યુક્તં ત્રિપુણ્ડ્રસ્ય મહામુને ॥ ૬॥

અગ્નિહોત્રોત્થિતં ભસ્મ સઙ્ગ્રાહ્યં વા મનીષિભિઃ ।
અન્યયજ્ઞોત્થિતં વાપિ ત્રિપુણ્ડ્રસ્ય ચ ધારણે ॥ ૭॥

અગ્નિરિત્યાદિભિર્મન્ત્રૈર્જાબાલોપનિષદ્ગતૈઃ ।
સપ્તભિર્ધૂલનં કાર્યં ભસ્મના સજલેન ચ ॥ ૮॥

વર્ણાનામાશ્રમાણાં ચ મન્ત્રતોઽમન્ત્રતોઽપિ ચ ।
ત્રિપુણ્ડ્રોદ્ધૂલનં પ્રોક્તં જાબાલૈરાદરેણ ચ ॥ ૯॥

ભસ્મનોદ્ધૂલનં ચૈવ ધૃતં તિર્યક્ ત્રિપુણ્ડ્રકમ્ ।
પ્રમાદાદપિ મોક્ષાર્થી ન ત્યજેદિતિ વૈ શ્રુતિઃ ॥ ૧૦॥

શિવેન વિષ્ણુના ચૈવ ધૃતં તિર્યક્ ત્રિપુણ્ડ્રકમ્ ।
ઉમાદેવ્યા ચ લક્ષ્મ્યા ચ સ્તુતમન્યૈશ્ચ નિત્યશઃ ॥ ૧૧॥

બ્રાહ્મણૈઃ ક્ષત્રિયૈર્વૈશ્યૈઃ શૂદ્રૈરપિ ચ સઙ્કરૈઃ ।
અપભ્રંશૈર્ધૃતં ભસ્મ ત્રિપુણ્ડ્રોદ્ધૂલનાત્મના ॥ ૧૨॥

ઉદ્ધૂલનં ત્રિપુણ્ડ્રં ચ શ્રદ્ધયા નાચરન્તિ યે ।
તેષાં નાસ્તિ સમાચારો વર્ણાશ્રમસમન્વિતઃ ॥ ૧૩॥

ઉદ્ધૂલનં ત્રિપુણ્ડ્રં ચ શ્રદ્ધયા નાચરન્તિ યે ।
તેષાં નાસ્તિ વિનિર્મુક્તિઃ સંસારાજ્જન્મકોટિભિઃ ॥ ૧૪॥

ઉદ્ધૂલનં ત્રિપુણ્ડ્રઞ્ચ શ્રદ્ધયા નાચરન્તિ યે ।
તેષાં નાસ્તિ શિવજ્ઞાનં કલ્પકોટિશતૈરપિ ॥ ૧૫॥

ઉદ્ધૂલનં ત્રિપુણ્ડ્રં ચ શ્રદ્ધયા નાચરન્તિ યે ।
તે મહાપાતકૈર્યુક્તા ઇતિ શાસ્ત્રીયનિર્ણયઃ ॥ ૧૬॥

ઉદ્ધૂલનં ત્રિપુણ્ડ્રં ચ શ્રદ્ધયા નાચરન્તિ યે ।
તેષામાચરિતં સર્વં વિપરીતફલાય હિ ॥ ૧૭॥

મહાપાતકયુક્તાનાં જન્તૂનાં સર્વવિદ્વિષામ્ ।
ત્રિપુણ્ડ્રોદ્ધૂલનદ્વેષો જાયતે સુદૃઢં મુને ॥ ૧૮॥

શિવાગ્નિકાર્યં યઃ કૃત્વા કુર્યાત્ત્રિયાયુષાત્મવિત્ ।
મુચ્યતે સર્વપાપૈસ્તુ સ્પૃષ્ટેન ભસ્મના નરઃ ॥ ૧૯॥

સિતેન ભસ્મના કુર્યાત્ત્રિસન્ધ્યં યસ્ત્રિપુણ્ડ્રકમ્ ।
સર્વપાપવિનિર્મુક્તઃ શિવેન સહ મોદતે ॥ ૨૦॥

સિતેન ભસ્મના કુર્યાલ્લલાટે તુ ત્રિપુણ્ડ્રકમ્ ।
યોઽસાવનાદિભૂતાન્હિ લોકાનાપ્નોઽમૃતો ભવેત્ ॥ ૨૧॥

અકૃત્વા ભસ્મના સ્નાનં ન જપેદ્વૈ ષડક્ષરમ્ ।
ત્રિપુણ્ડ્રં ચ રચિત્વા તુ વિધિના ભસ્મના જપેત્ ॥ ૨૨॥

અદયો વાધમો વાપિ સર્વપાપાન્વિતોઽપિ વા ।
ઉપપાપાન્વિતો વાપિ મૂર્ખો વા પતિતોઽપિ વા ॥ ૨૩॥

યસ્મિન્દેશે વસેન્નિત્યં ભૂતિશાસનસંયુતઃ ।
સર્વતીર્થૈશ્ચ ક્રતુભિઃ સાન્નિધ્યં ક્રિયતે સદા ॥ ૨૪॥

ત્રિપુણ્ડ્રસહિતો જીવઃ પૂજ્યઃ સર્વૈઃ સુરાસુરૈઃ ।
પાપાન્વિતોઽપિ શુદ્ધાત્મા કિં પુનઃ શ્રદ્ધયા યુતઃ ॥ ૨૫॥

યસ્મિન્દેશે શિવજ્ઞાની ભૂતિશાસનસંયુતઃ ।
ગતો યદૃચ્છયાદ્યાપિ તસ્મિંસ્તીર્થાઃ સમાગતાઃ ॥ ૨૬॥

બહુનાત્ર કિમુક્તેન ધાર્યં ભસ્મ સદા બુધૈઃ ।
લિઙ્ગાર્ચનં સદા કાર્યં જપ્યો મન્ત્રઃ ષડક્ષરઃ ॥ ૨૭॥

બ્રહ્મણા વિષ્ણુના વાપિ રુદ્રેણ મુનિભિઃ સુરૈઃ ।
ભસ્મધારણમાહાત્મ્યં ન શક્યં પરિભાષિતુમ્ ॥ ૨૮॥

ઇતિ વર્ણાશ્રમાચારો લુપ્તવર્ણક્રિયોઽપિ ચ ।
પાપાત્સકૃત્ત્રિપુણ્ડ્રસ્ય ધારણાત્સોઽપિ મુચ્યતે ॥ ૨૯॥

યે ભસ્મધારિણં ત્યક્ત્વા કર્મ કુર્વન્તિ માનવાઃ ।
તેષાં નાસ્તિ વિનિર્મોક્ષઃ સંસારાજ્જન્મકોટિભિઃ ॥ ૩૦॥

તેનાધીતં ગુરોઃ સર્વં તેન સર્વમનુષ્ઠિતમ્ ।
યેન વિપ્રેણ શિરસિ ત્રિપુણ્ડ્રં ભસ્મના કૃતમ્ ॥ ૩૧॥

યે ભસ્મધારિણં દૃષ્ટ્વા નરાઃ કુર્વન્તિ તાડનમ્ ।

તેષાં ચણ્ડાલતો જન્મ બ્રહ્મન્નૂહ્યં વિપશ્ચિતા ॥ ૩૨॥

માનસ્તોકેન મન્ત્રેણ મન્ત્રિતં ભસ્મ ધારયેત્ ।
બ્રાહ્મણઃ ક્ષત્રિયશ્ચૈવ પ્રોક્તેષ્વઙ્ગેષુ ભક્તિમાન્ ॥ ૩૩॥

વૈશ્યસ્ત્રિયમ્બકેનૈવ શૂદ્રઃ પઞ્ચાક્ષરેણ તુ ।
અન્યાસાં વિધવાસ્ત્રીણાં વિધિઃ પ્રોક્તશ્ચ શૂદ્રવત્ ॥ ૩૪॥

પઞ્ચબ્રહ્માદિમનુભિર્ગૃહસ્થસ્ય વિધીયતે ।
ત્રિયમ્બકેન મનુના વિધિર્વૈ બ્રહ્મચારિણઃ ॥ ૩૫॥

અઘોરેણાથ મનુના વિપિનસ્થવિધિઃ સ્મૃતઃ ।
યતિસ્તુ પ્રણવેનૈવ ત્રિપુણ્ડ્રાદીનિ કારયેત્ ॥ ૩૬॥

અતિવર્ણાશ્રમી નિત્યં શિવોઽહં ભાવનાત્પરાત્ ।
શિવયોગી ચ નિયતમીશાનેનાપિ ધારયેત્ ॥ ૩૭॥

ન ત્યાજ્યં સર્વવર્ણૈશ્ચ ભસ્મધારણમુત્તમમ્ ।
અન્યૈરપિ યથા જીવૈઃ સદેતિ શિવશાસનમ્ ॥ ૩૮॥

ભસ્મસ્નાનેન યાવન્તઃ કણાઃ સ્વાઙ્ગે પ્રતિષ્ઠિતાઃ ।
તાવન્તિ શિવલિઙ્ગાનિ તનૌ ધત્તે હિ ધારકઃ ॥ ૩૯॥

બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ શૂદ્રાશ્ચાપિ ચ સઙ્કરાઃ ।
સ્ત્રિયોઽથ વિધવા બાલાઃ પ્રાપ્તા પાખણ્ડિકાસ્તથા ॥ ૪૦॥

બ્રહ્મચારી ગૃહી વન્યઃ સંન્યાસી વા વ્રતી તથા ।
નાર્યો ભસ્મત્રિપુણ્ડ્રાઙ્કા મુક્તા એવ ન સંશયઃ ॥ ૪૧॥

જ્ઞાનાજ્ઞાનધૃતો વાપિ વહ્નિદાહસમો યથા ।
જ્ઞાનાજ્ઞાનધૃતં ભસ્મ પાવયેત્સકલં નરમ્ ॥ ૪૨॥

નાશ્નીયાજ્જલમન્નમલ્પમપિ વા ભસ્માક્ષધૃત્યા વિના
ભુક્ત્વા વાથ ગૃહી વનીપતિયતિર્વર્ણી તથા સઙ્કરઃ ।
એનોભુઙ્ નરકં પ્રયાતિ સ તદા ગાયત્રિજાપેન તદ્
વર્ણાનાં તુ યતેસ્તુ મુખ્યપ્રણવાજાપેન મુક્તિર્ભવેત્ ॥ ૪૩॥

ત્રિપુણ્ડ્રં યે વિનિન્દન્તિ નિન્દન્તિ શિવમેવ તે ।
ધારયન્તિ ચ યે ભક્ત્યા ધારયન્તિ તમેવ તે ॥ ૪૪॥

ધિગ્ભસ્મરહિતં ભાલં ધિગ્ગ્રામમશિવાલયમ્ ।

ધિગનીશાર્ચનં જન્મ ધિગ્વિદ્યામશિવાશ્રયામ્ ॥ ૪૫॥

યે નિન્દન્તિ મહેશ્વરં ત્રિજગતામાધારભૂતં હરં
યે નિન્દન્તિ ત્રિપુણ્ડ્રધારણકરં દોષસ્તુ તદ્દર્શને ।
તે વૈ સઙ્કરસૂકરાસુરખરશ્વક્રોષ્ટુકીટોપમા
જાતા એવ ભવન્તિ પાપપરમાસ્તે નારકાઃ કેવલમ્ ॥ ૪૬॥

તે દૃષ્ટ્વા શશિભાસ્કરૌ નિશિ દિને સ્વપ્નેઽપિ નો કેવલં
પશ્યન્તુ શ્રુતિરુદ્રસૂક્તજપતો મુચ્યેત તેનાદૃતાઃ ।
તત્સમ્ભાષણતો ભદેદ્ધિ નરકં નિસ્તારવાનાસ્થિતં
યે ભસ્માદિવિધારણં હિ પુરુષં નિન્દન્તિ મન્દા હિ તે ॥ ૪૭॥

ન તાન્ત્રિકસ્ત્વધિકૃતો નોર્ધ્વપુણ્ડ્રધરો મુને ।
સન્તપ્તચક્રચિહ્નોઽત્ર શિવયજ્ઞે બહિષ્કૃતઃ ॥ ૪૮॥

તત્રૈતે બહવો લોકા બૃહજ્જાબાલચોદિતાઃ ।
તે વિચાર્યાઃ પ્રયત્નેન તતો ભસ્મરતો ભવેત્ ॥ ૪૯॥

યચ્ચન્દનૈશ્ચન્દનકેઽપિ મિશ્રં
ધાર્યં હિ ભસ્મૈવ ત્રિપુણ્ડ્રભસ્મના ।
વિભૂતિભાલોપરિ કિઞ્ચનાપિ
ધાર્યં સદા નો યદિ સન્તિ બુદ્ધયઃ ॥ ૫૦॥

સ્ત્રીભિસ્ત્રિપુણ્ડ્રમલકાવધિ ધારણીયં
ભસ્મ દ્વિજાદિભિરથો વિધવાભિરેવમ્ ।
તદ્વત્સદાશ્રમવતાં વિશદા વિભૂતિ-
ર્ધાર્યાપવર્ગફલદા સકલાઘહન્ત્રી ॥ ૫૧॥

ત્રિપુણ્ડ્રં કુરુતે યસ્તુ ભસ્મના વિધિપૂર્વકમ્ ।
મહાપાતકસઙ્ઘાતૈર્મુચ્યતે ચોપપાતકૈઃ ॥ ૫૨॥

બ્રહ્મચારી ગૃહસ્થો વા વાનપ્રસ્થોઽથવા યતિઃ ।
બ્રહ્મક્ષત્રાશ્ચ વિટ્શૂદ્રાસ્તથાન્યે પતિતાધમાઃ ॥ ૫૩॥

ઉદ્ધૂલનં ત્રિપુણ્ડ્રં ચ ધૃત્વા શુદ્ધા ભવન્તિ ચ ।
ભસ્મનો વિધિના સમ્યક્ પાપરાશિં વિહાય ચ ॥ ૫૪॥

ભસ્મધારી વિશેષેણ સ્ત્રીગોહત્યાદિપાતકૈઃ ।
વીરહત્યાશ્વહત્યાભ્યાં મુચ્યતે નાત્ર સંશયઃ ॥ ૫૫॥

પરદ્રવ્યાપહરણં પરદારાભિમર્શનમ્ ।
પરનિન્દાં પરક્ષેત્રહરણં પરપીડનમ્ ॥ ૫૬॥

સસ્યારામાદિહરણં ગૃહદાહાદિકર્મ ચ ।
ગોહિરણ્યમહિષ્યાદિતિલકમ્બલવાસસામ્ ॥ ૫૭॥

અન્નધાન્યજલાદીનાં નીચેભ્યશ્ચ પરિગ્રહઃ ।
દાશવેશ્યામતઙ્ગીષુ વૃષલીષુ નટીષુ ચ ॥ ૫૮॥

રજસ્વલાસુ કન્યાસુ વિધવાસુ ચ મૈથુનમ્ ।
માંસચર્મરસાદીનાં લવણસ્ય ચ વિક્રયઃ ॥ ૫૯॥

પૈશુન્યં કૂટવાદશ્ચ સાક્ષિમિથ્યાભિલાષિણામ્ ।
એવમાદીન્યસઙ્ખ્યાનિ પાપાનિ વિવિધાનિ ચ ।
સદ્ય એવ વિનશ્યન્તિ ત્રિપુણ્ડ્રસ્ય ચ ધારણાત્ ॥ ૬૦॥

શિવદ્રવ્યાપહરણં શિવનિન્દા ચ કુત્રચિત્ ।
નિન્દા ચ શિવભક્તાનાં પ્રાયશ્ચિત્તૈર્ન શુદ્ધ્યતિ ॥ ૬૧॥

રુદ્રાક્ષં યસ્ય ગાત્રેષુ લલાટે તુ ત્રિપુણ્ડ્રકમ્ ।
સ ચાણ્ડાલોઽપિ સમ્પૂજ્યઃ સર્વવર્ણોત્તમોત્તમઃ ॥ ૬૨॥

યાનિ તીર્થાનિ લોકેઽસ્મિન્ ગઙ્ગાદ્યાઃ સરિતશ્ચ યાઃ ।
સ્નાતો ભવતિ સર્વત્ર લલાટે તુ યસ્ત્રિપુણ્ડ્રકમ્ ॥ ૬૩॥

સપ્તકોટિમહામન્ત્રાઃ પઞ્ચાક્ષરપુરસ્સરાઃ ।
તથાન્યે કોટિશો મન્ત્રાઃ શૈવકૈવલ્યહેતવઃ ॥ ૬૪॥

અન્યે મન્ત્રાશ્ચ દેવાનાં સર્વસૌખ્યકરા મુને ।
તે સર્વે તસ્ય વશ્યાઃ સ્યુર્યો બિભર્તિ ત્રિપુણ્ડ્રકમ્ ॥ ૬૫॥

સહસ્રં પૂર્વજાતાનાં સહસ્રં જનયિષ્યતામ્ ।
સ્વવંશજાનાં જ્ઞાતીનામુદ્ધરેદ્યસ્ત્રિપુણ્ડ્રકૃત્ ॥ ૬૬॥

ઇહ ભુક્ત્વાખિલાન્ભોગાન્દીર્ઘાયુર્વ્યાધિવર્જિતઃ ।
જીવિતાન્તે ચ મરણં સુખેનૈવ પ્રપદ્યતે ॥ ૬૭॥

અષ્ટૈશ્વર્યગુણોપેતં પ્રાપ્ય દિવ્યવપુઃ શિવમ્ ।
દિવ્યં વિમાનમારુહ્ય દિવ્યત્રિદશસેવિતમ્ ॥ ૬૮॥

વિદ્યાધરાણાં સર્વેષાં ગન્ધર્વાણાં મહૌજસામ્ ।
ઇન્દ્રાદિલોકપાલાનાં લોકેષુ ચ યથાક્રમમ્ ॥ ૬૯॥

ભુક્ત્વા ભોગાન્સુવિપુલાન્પ્રજેશાનાં પદેષુ ચ ।
બ્રહ્મણઃ પદમાસાદ્ય તત્ર કન્યાશતં રમેત્ ॥ ૭૦॥

તત્ર બ્રહ્માયુષો માનં ભુક્ત્વા ભોગાનનેકશઃ ।
વિષ્ણોર્લોકે લભેદ્ભોગં યાવદ્ બ્રહ્મશતાત્યયઃ ॥ ૭૧॥

શિવલોકં તતઃ પ્રાપ્ય લબ્ધ્વેષ્ટં કામમક્ષયમ્ ।
શિવસાયુજ્યમાપ્નોતિ સંશયો નાત્ર જાયતે ॥ ૭૨॥

સર્વોપનિષદાં સારં સમાલોક્ય મુહુર્મુહુઃ ।
ઇદમેવ હિ નિર્ણીતં પરં શ્રેયસ્ત્રિપુણ્ડ્રકમ્ ॥ ૭૩॥

વિભૂતિં નિન્દતે યો વૈ બ્રાહ્મણઃ સોઽન્યજાતકઃ ।
પ્રયાતિ નરકે ઘોરે યાવદ્ બ્રહ્મા ચતુર્મુખઃ ॥ ૭૪॥

શ્રાદ્ધે યજ્ઞે જપે હોમે વૈશ્વદેવે સુરાર્ચને ।
ધૃતત્રિપુણ્ડ્રઃ પૂતાત્મા મૃત્યું જયતિ માનવઃ ॥ ૭૫॥

જલસ્નાનં મલત્યાગે ભસ્મસ્નાનં સદા શુચિઃ ।
મન્ત્રસ્નાનં હરેત્પાપં જ્ઞાનસ્નાને પરં પદમ્ ॥ ૭૬॥

સર્વતીર્થેષુ યત્પુણ્યં સર્વતીર્થેષુ યત્ફલમ્ ।
તત્ફલં સમવાપ્નોતિ ભસ્મસ્નાનકરો નરઃ ॥ ૭૭॥

ભસ્મસ્નાનં પરં તીર્થં ગઙ્ગાસ્નાનં દિને દિને ।
ભસ્મરૂપી શિવઃ સાક્ષાદ્ભસ્મ ત્રૈલોક્યપાવનમ્ ॥ ૭૮॥

ન તત્સ્નાનં ન તદ્ધ્યાનં ન તદ્દાનં જપો ન સઃ ।
ત્રિપુણ્ડ્રેણ વિના યેન વિપ્રેણ યદનુષ્ઠિતમ્ ॥ ૭૯॥

વાનપ્રસ્થસ્ય કન્યાનાં દીક્ષાહીનનૃણાં તથા ।
મધ્યાહ્નાત્પ્રાગ્જલૈર્યુક્તં પરતો જલવર્જિતમ્ ॥ ૮૦॥

એવં ત્રિપુણ્ડ્રં યઃ કુર્યાન્નિત્યં નિયતમાનસઃ ।
શિવભક્તઃ સ વિજ્ઞેયો ભુક્તિં મુક્તિં ચ વિન્દતિ ॥ ૮૧॥

યસ્યાઙ્ગે નૈવ રુદ્રાક્ષ એકોઽપિ બહુપુણ્યદઃ ।
તસ્ય જન્મ નિરર્થં સ્યાત્ત્રિપુણ્ડ્રરહિતો યદિ ॥ ૮૨॥

એવં ત્રિપુણ્ડ્રમાહાત્મ્યં સમાસાત્ કથિતં મયા ।
રહસ્યં સર્વજન્તૂનાં ગોપનીયમિદં ત્વયા ॥ ૮૩॥

તિસ્રો રેખા ભવન્ત્યેવ સ્થાનેષુ મુનિપુઙ્ગવાઃ ।
લલાટાદિષુ સર્વેષુ યથોક્તેષુ બુધૈર્મુને ॥ ૮૪॥

ભ્રુવોર્મધ્યં સમારભ્ય યાવદન્તો ભવેદ્ ભ્રુવોઃ ।
તાવત્પ્રમાણં સન્ધાર્યં લલાટે ચ ત્રિપુણ્ડ્રકમ્ ॥ ૮૫॥

મધ્યમાનામિકાઙ્ગુલ્યા મધ્યે તુ પ્રતિલોમતઃ ।
અઙ્ગુષ્ઠેન કૃતા રેખા ત્રિપુણ્ડ્રાખ્યાભિધીયતે ॥ ૮૬॥

મધ્યેઽઙ્ગુલિભિરાદાય તિસૃભિર્ભસ્મ યત્નતઃ ।
ત્રિપુણ્ડ્રં ધારયેદ્ભક્ત્યા ભુક્તિમુક્તિપ્રદં પરમ્ ॥ ૮૭॥

તિસૃણામપિ રેખાનાં પ્રત્યેકં નવદેવતાઃ ।
સર્વત્રાઙ્ગેષુ તા વક્ષ્યે સાવધાનતયા શૃણુ ॥ ૮૮॥

અકારો ગાર્હપત્યાગ્નિર્ભૂર્ધર્મશ્ચ રજોગુણઃ ।
ઋગ્વેદશ્ચ ક્રિયાશક્તિઃ પ્રાતઃસવનમેવ ચ ॥ ૮૯॥

મહાદેવશ્ચ રેખાયાઃ પ્રથમાયાશ્ચ દેવતા ।
વિજ્ઞેયા મુનિશાર્દૂલાઃ શિવદીક્ષાપરાયણૈઃ ॥ ૯૦॥

ઉકારો દક્ષિણાગ્નિશ્ચ નભસ્તત્ત્વં યજુસ્તથા ।
મધ્યન્દિનં ચ સવનમિચ્છાશક્ત્યન્તરાત્મકૌ ॥ ૯૧॥

મહેશ્વરશ્ચ રેખાયા દ્વિતીયાયાશ્ચ દેવતા ।
વિજ્ઞેયા મુનિશાર્દૂલ શિવદીક્ષાપરાયણૈઃ ॥ ૯૨॥

મકારાહવનીયૌ ચ પરમાત્મા તમો દિવૌ ।
જ્ઞાનશક્તિઃ સામવેદસ્તૃતીયં સવનં તથા ॥ ૯૩॥

શિવશ્ચૈવ ચ રેખાયાસ્તૃતીયાયાશ્ચ દેવતા ।
વિજ્ઞેયા મુનિશાર્દૂલ શિવદીક્ષાપરાયણૈઃ ॥ ૯૪॥

એવં નિત્યં નમસ્કૃત્ય સદ્ભક્ત્યા સ્થાનદેવતાઃ ।
ત્રિપુણ્ડ્રં ધારયેચ્છુદ્ધો ભુક્તિં મુક્તિં ચ વિન્દતિ ॥ ૯૫॥

ઇત્યુક્તાઃ સ્થાનદેવાશ્ચ સર્વાઙ્ગેષુ મુનિશ્વરાઃ ।

તેષાં સમ્બન્ધિનો ભક્ત્યા સ્થાનાનિ શ ृણુ સામ્પ્રતમ્ ॥ ૯૬॥

દ્વાત્રિંશત્સ્થાનકે વાર્ધષોડશસ્થાનકેઽપિ ચ ।
અષ્ટસ્થાને તથા ચૈવ પઞ્ચસ્થાનેઽપિ નાન્યસેત્ ॥ ૯૭॥

ઉત્તમાઙ્ગે લલાટે ચ કર્ણયોર્નેત્રયોસ્તથા ।
નાસાવક્ત્રગલેષ્વેવં હસ્તયોરુભયોસ્તતઃ ॥ ૯૮॥

કૂર્પરે મણિબન્ધે ચ હૃદયે પાર્શ્વયોર્દ્વયોઃ ।
નાભૌ મુષ્કદ્વયે ચૈવમૂર્વોર્ગુલ્ફે ચ જાનુનિ ॥ ૯૯॥

જઙ્ઘાદ્વયે પદદ્વન્દ્વે દ્વાત્રિંશત્સ્થાનમુત્તમમ્ ।
અગ્ન્યબ્ભૂવાયુદિગ્દેશદિક્પાલાન્ વસુભિઃ સહ ॥ ૧૦૦॥

ધરા ધ્રુવશ્ચ સોમશ્ચ આપશ્ચૈવાનિલોઽનલઃ ।
પ્રત્યૂષશ્ચ પ્રભાતશ્ચ વસવોઽષ્ટ પ્રકીર્તિતાઃ ॥ ૧૦૧॥

એતેષાં નામમાત્રેણ ત્રિપુણ્ડ્રં ધારયેદ્ બુધાઃ ।
કુર્યાદ્વા ષોડશસ્થાને ત્રિપુણ્ડ્રં તુ સમાહિતઃ ॥ ૧૦૨॥

શીર્ષકે ચ લલાટે ચ કણ્ઠે ચાંસદ્વયે ભુજે ।
કૂર્પરે મણિબન્ધે ચ હૃદયે નાભિપાર્શ્વકે ॥ ૧૦૩॥

પૃષ્ઠે ચૈવં પ્રતિષ્ઠાપ્ય યજેત્તત્રાશ્વિદૈવતે ।
શિવં શક્તિં તથા રુદ્રમીશં નારદમેવ ચ ॥ ૧૦૪॥

વામાદિનવશક્તીશ્ચ એતા ષોડશ દેવતાઃ ।
નાસત્યૌ દસ્રકશ્ચૈવ અશ્વિનૌ દ્વૌ પ્રકીર્તિતૌ ॥ ૧૦૫॥

અથવા મૂર્ધ્નિ કેશે ચ કર્ણયોર્વદને તથા ।
બાહુદ્વયે ચ હૃદયે નાભ્યામૂરુયુગે તથા ॥ ૧૦૬॥

જાનુદ્વયે ચ પદયોઃ પૃષ્ઠભાગે ચ ષોડશ ।
શિવશ્ચન્દ્રશ્ચ રુદ્રઃ કો વિઘ્નેશો વિષ્ણુરેવ વા ॥ ૧૦૭॥

શ્રીશ્ચૈવ હૃદયે શમ્ભુસ્તથા નાભૌ પ્રજાપતિઃ ।
નાગશ્ચ નાગકન્યાશ્ચ ઉભયોરૃષિકન્યકાઃ ॥ ૧૦૮॥

પાદયોશ્ચ સમુદ્રાશ્ચ તીર્થાઃ પૃષ્ઠે વિશાલતઃ ।
ઇત્યેવં ષોડશસ્થાનમષ્ટસ્થાનમથોચ્યતે ॥ ૧૦૯॥

ગુહ્યસ્થાનં લલાટશ્ચ કર્ણદ્વયમનુત્તમમ્ ।
અંસયુગ્મં ચ હૃદયં નાભિરિત્યેવમષ્ટકમ્ ॥ ૧૧૦॥

બ્રહ્મા ચ ઋષયઃ સપ્ત દેવતાશ્ચ પ્રકીર્તિતાઃ ।
ઇત્યેવં તુ સમુદ્દિષ્ટં ભસ્મવિદ્ભિર્મુનીશ્વરાઃ ॥ ૧૧૧॥

અથવા મસ્તકં બાહૂ હૃદયં નાભિરેવ ચ ।
પઞ્ચસ્થાનાન્યમૂન્યાહુર્ધારણે ભસ્મવિજ્જનાઃ ॥ ૧૧૨॥

યથાસમ્ભવનં કુર્યાદ્દેશકાલાદ્યપેક્ષયા ।
ઉદ્ધૂલનેઽપ્યશક્તિશ્ચેત્ત્રિપુણ્ડ્રાદીનિ કારયેત્ ॥ ૧૧૩॥

ત્રિનેત્રં ત્રિગુણાધારં ત્રિદેવજનકં શિવમ્ ।
સ્મરન્નમઃ શિવાયેતિ લલાટે તુ ત્રિપુણ્ડ્રકમ્ ॥ ૧૧૪॥

ઈશાભ્યાં નમ ઇત્યુક્ત્વા પાર્શ્વયોશ્ચ ત્રિપુણ્ડ્રકમ્ ।
બીજાભ્યાં નમ ઇત્યુક્ત્વા ધારયેત્તુ પ્રકોષ્ઠયોઃ ॥ ૧૧૫॥

કુર્યાદધઃ પિતૃભ્યાં ચ ઉમેશાભ્યાં તથોપરિ ।
ભીમાયેતિ તતઃ પૃષ્ઠે શિરસઃ પશ્ચિમે તથા ॥ ૧૧૬॥

ઇતિ શ્રીશિવમહાપુરાણે પ્રથમાયાં વિદ્યેશ્વરસંહિતાયાં ભસ્મધારણવર્ણનં નામ ચતુર્વિંશોઽધ્યાયઃ ॥ ૧.૨૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
વિદ્યેશ્વરસંહિતા

## ૧.૨૫. પઞ્ચવિંશોઽધ્યાયઃ । રુદ્રાક્ષમાહાત્મ્યમ્ ।

સૂત ઉવાચ ।
શૌનકર્ષે મહાપ્રાજ્ઞ શિવરૂપ મહાપતે ।
શ઼ૃણુ રુદ્રાક્ષમાહાત્મ્યં સમાસાત્ કથયામ્યહમ્ ॥ ૧॥

શિવપ્રિયતમો જ્ઞેયો રુદ્રાક્ષઃ પરપાવનઃ ।
દર્શનાત્ સ્પર્શનાજ્જાપ્યાત્ સર્વપાપહરઃ સ્મૃતઃ ॥ ૨॥

પુરા રુદ્રાક્ષમહિમા દેવ્યગ્રે કથિતો મુને ।
લોકોપકરણાર્થાય શિવેન પરમાત્મના ॥ ૩॥

શિવ ઉવાચ ।

શ્રૂયતાં તુ મહેશાનિ રુદ્રાક્ષમહિમા શિવે ।
કથયામિ તવ પ્રીત્યા ભક્તાનાં હિતકામ્યયા ॥ ૪॥

દિવ્યવર્ષસહસ્રાણિ મહેશાનિ પુનઃ પુરા ।
તપઃ પ્રકુર્વતસ્ત્રસ્તં મનઃ સંયમ્ય વૈ મમ ॥ ૫॥

સ્વતન્ત્રેણ પરેશેન લોકોપકૃતિકારિણા ।
લીલયા પરમેશાનિ ચક્ષુરુન્મીલિતં મયા ॥ ૬॥

પુટાભ્યાં ચારુચક્ષુર્ભ્યાં પતિતા જલબિન્દવઃ ।
તત્રાશ્રુબિન્દુતો જાતા વૃક્ષા રુદ્રાક્ષસંજ્ઞકાઃ ॥ ૭॥

સ્થાવરત્વમનુપ્રાપ્ય ભક્તાનુગ્રહકારણાત્ ।
તે દત્તા વિષ્ણુભક્તેભ્યશ્ચતુર્વર્ણેભ્ય એવ ચ ॥ ૮॥

ભૂમૌ ગૌડોદ્ભવાંશ્ચક્રે રુદ્રાક્ષાઞ્છિવવલ્લભાન્ ।
મથુરાયામયોધ્યાયાં લઙ્કાયાં મલયે તથા ॥ ૯॥

સહ્યાદ્રૌ ચ તથા કાશ્યાં દેશેષ્વન્યેષુ વા તથા ।
પરાનસહ્યપાપૌઘભેદનાઞ્છ્રુતિનોદનાન્ ॥ ૧૦॥

બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ શૂદ્રા જાતા મમાજ્ઞયા ।
રુદ્રાક્ષાસ્તે પૃથિવ્યાં તુ તજ્જાતીયાઃ શુભાક્ષકાઃ ॥ ૧૧॥

શ્વેતરક્તાઃ પીતકૃષ્ણા વર્ણા જ્ઞેયાઃ ક્રમાદ્ બુધૈઃ ।
સ્વજાતીયં નૃભિર્ધાર્યં રુદ્રાક્ષં વર્ણતઃ ક્રમાત્ ॥ ૧૨॥

વર્ણૈસ્તુ તત્ફલં ધાર્યં ભુક્તિમુક્તિફલેપ્સુભિઃ ।
શિવભક્તૈર્વિશેષેણ શિવયોઃ પ્રીતયે સદા ॥ ૧૩॥

ધાત્રીફલપ્રમાણં યચ્છ્રેષ્ઠમેતદુદાહૃતમ્ ।
બદરીફલમાત્રં તુ મધ્યમં સમ્પ્રકીર્તિતમ્ ॥ ૧૪॥

અધમં ચણમાત્રં સ્યાત્ પ્રક્રિયૈષા પરોચ્યતે ।
શ‍ૃણુ પાર્વતિ સુપ્રીત્યા ભક્તાનાં હિતકામ્યયા ॥ ૧૫॥

બદરીફલમાત્રં ચ યત્ સ્યાત્ કિલ મહેશ્વરિ ।
તથાપિ ફલદં લોકે સુખસૌભાગ્યવર્ધનમ્ ॥ ૧૬॥

ધાત્રીફલસમં યત્ સ્યાત્ સર્વારિષ્ટવિનાશનમ્ ।
ગુઞ્જયા સદૃશં યત્ સ્યાત્ સર્વાર્થફલસાધનમ્ ॥ ૧૭॥

યથા યથા લઘુઃ સ્યાદ્વૈ તથાધિકફલપ્રદઃ ।
એકૈકતઃ ફલં પ્રોક્તં દશાંશૈરધિકં બુધૈઃ ॥ ૧૮॥

રુદ્રાક્ષધારણં પ્રોક્તં પાપનાશનહેતવે ।
તસ્માચ્ચ ધારણીયો વૈ સર્વાર્થસાધનો ધ્રુવમ્ ॥ ૧૯॥

યથા ચ દૃશ્યતે લોકે રુદ્રાક્ષઃ ફલદઃ શુભઃ ।
ન તથા દૃશ્યતેઽન્યા ચ માલિકા પરમેશ્વરિ ॥ ૨૦॥

સમાઃ સ્નિગ્ધા દૃઢાઃ સ્થૂલાઃ કણ્ટકૈઃ સંયુતાઃ શુભાઃ ।
રુદ્રાક્ષાઃ કામદા દેવિ ભુક્તિમુક્તિપ્રદાઃ સદા ॥ ૨૧॥

કૃમિદુષ્ટં છિન્નભિન્નં કણ્ટકૈર્હીનમેવ ચ ।
વ્રણયુક્તમવૃત્તં ચ રુદ્રાક્ષાન્ ષડ્ વિવર્જયેત્ ॥ ૨૨॥

સ્વયમેવ કૃતદ્વારં રુદ્રાક્ષં સ્યાદિહોત્તમમ્ ।
યત્તુ પૌરુષયત્નેન કૃતં તન્મધ્યમં ભવેત્ ॥ ૨૩॥

રુદ્રાક્ષધારણં પ્રોક્તં મહાપાતકનાશનમ્ ।
રુદ્રસઙ્ખ્યાશતં ધૃત્વા રુદ્રરૂપો ભવેન્નરઃ ॥ ૨૪॥

એકાદશશતાનીહ ધૃત્વા યત્ફલમાપ્યતે ।
તત્ફલં શક્યતે નૈવ વક્તું વર્ષશતૈરપિ ॥ ૨૫॥

શતાર્ધેન યુતૈઃ પઞ્ચશતૈર્વૈ મુકુટં મતમ્ ।
રુદ્રાક્ષૈર્વિરચેત્સમ્યગ્ભક્તિમાન્પુરુષો વરઃ ॥ ૨૬॥

ત્રિભિઃ શતૈઃ ષષ્ટિયુક્તૈસ્ત્રિરાવૃત્ત્યા તથા પુનઃ ।
રુદ્રાક્ષૈરુપવીતં ચ નિર્મીયાદ્ભક્તિતત્પરઃ ॥ ૨૭॥

શિખાયાં ચ ત્રયં પ્રોક્તં રુદ્રક્ષાણાં મહેશ્વરિ ।
કર્ણયોઃ ષટ્ ચ ષટ્ ચૈવ વામદક્ષિણયોસ્તથા ॥ ૨૮॥

શતમેકોત્તરં કણ્ઠે બાહ્વોર્વૈ રુદ્રસઙ્ખ્યયા ।
કૂર્પરદ્વારયોસ્તત્ર મણિબન્ધે તથા પુનઃ ॥ ૨૯॥

ઉપવીતે ત્રયં ધાર્યં શિવભક્તિરતૈર્નરૈઃ ।
શેષાનુર્વરિતાન્પઞ્ચ સમ્મિતાન્ધારયેત્કટૌ ॥ ૩૦॥

એતત્સઙ્ખ્યા ધૃતા યેન રુદ્રાક્ષાઃ પરમેશ્વરિ ।

તદ્રૂપં તુ પ્રણમ્યં હિ સ્તુત્યં સર્વૈર્મહેશવત્ ॥ ૩૧॥

એવમ્ભૂતં સ્થિતં ધ્યાને યદા કૃત્વાસને જનમ્ ।
શિવેતિ વ્યાહરંશ્ચૈવ દૃષ્ટ્વા પાપૈઃ પ્રમુચ્યતે ॥ ૩૨॥

શતાધિકસહસ્રસ્ય વિધિરેષ પ્રકીર્તિતઃ ।
તદભાવે પ્રકારોઽન્યઃ શુભઃ સમ્પ્રોચ્યતે મયા ॥ ૩૩॥

શિખાયામેકરુદ્રાક્ષં શિરસા ત્રિંશતં વહેત્ ।
પઞ્ચાશચ્ચ ગલે દધ્યાદ્ બાહ્વોઃ ષોડશ ષોડશ ॥ ૩૪॥

મણિબન્ધે દ્વાદશ દ્વિસ્કન્ધે પઞ્ચશતં વહેત્ ।
અષ્ટોત્તરશતૈર્માલ્યમુપવીતં પ્રકલ્પયેત્ ॥ ૩૫॥

એવં સહસ્રરુદ્રાક્ષાન્ધારયેદ્યો દૃઢવ્રતઃ ।
તં નમન્તિ સુરાઃ સર્વે યથા રુદ્રસ્તથૈવ સઃ ॥ ૩૬॥

એકં શિખાયાં રુદ્રાક્ષં ચત્વારિંશત્તુ મસ્તકે ।
દ્વાત્રિંશત્કણ્ઠદેશે તુ વક્ષસ્યષ્ટોત્તરં શતમ્ ॥ ૩૭॥

એકૈકં કર્ણયોઃ ષટ્ ષટ્ બાહ્વોઃ ષોડશ ષોડશ ।
કરયો રવિમાનેન દ્વિગુણેન મુનીશ્વર ॥ ૩૮॥

સઙ્ખ્યા પ્રીતિધૃતા યેન સોઽપિ શૈવજનઃ પરઃ ।
શિવવત્પૂજનીયો હિ વન્દ્યઃ સર્વૈરભીક્ષ્ણશઃ ॥ ૩૯॥

શિરસીશાનમન્ત્રેણ કર્ણે તત્પુરુષેણ ચ ।
અઘોરેણ ગલે ધાર્યં તેનૈવ હૃદયેઽપિ ચ ॥ ૪૦॥

અઘોરબીજમન્ત્રેણ કરયોર્ધારયેત્સુધીઃ ।
પઞ્ચદશાક્ષગ્રથિતાં વામદેવેન ચોદરે ॥ ૪૧॥

પઞ્ચબ્રહ્મભિરઙ્ગૈશ્ચ ત્રિમાલાં પઞ્ચ સપ્ત ચ ।
અથ વા મૂલમન્ત્રેણ સર્વાનક્ષાંસ્તુ ધારયેત્ ॥ ૪૨॥

મદ્યં માંસં તુ લશુનં પલાણ્ડું શિગ્રુમેવ ચ ।
શ્લેષ્માન્તકં વિડ્વરાહં ભક્ષણે વર્જયેત્તતઃ ॥ ૪૩॥

વલક્ષં રુદ્રાક્ષં દ્વિજતનુભિરેવેહ વિહિતં
સુરક્તં ક્ષત્રાણાં પ્રમુદિતમુમે પીતમસકૃત્ ।
તતો વૈશ્યૈર્ધાર્યં પ્રતિદિવસભાવશ્યકમહો

તથા કૃષ્ણં શૂદ્રૈઃ શ્રુતિગદિતમાર્ગોઽયમગજે ॥ ૪૪॥

વર્ણી વની ગૃહયતીર્નિયમેન દધ્યા-
દેતદ્રહસ્યપરમો ન હિ જાતુ તિષ્ઠેત્ ।
રુદ્રાક્ષધારણમિદં સુકૃતૈશ્ચ લભ્યં
ત્યક્ત્વેદમેતદખિલાન્નરકાન્ પ્રયાન્તિ ॥ ૪૫॥

આદાવામલકાસ્તતો લઘુતરા
રુગ્ણાસ્તતઃ કણ્ટકૈઃ
સન્દષ્ટાઃ કૃમિભિસ્તનૂપકરણ-
ચ્છિદ્રેણ હીનાસ્તથા ।
ધાર્યા નૈવ શુભેપ્સુભિશ્ચણકવદ્
રુદ્રાક્ષમપ્યન્તતો
રુદ્રાક્ષો મમ લિઙ્ગમઙ્ગલમુમે
સૂક્ષ્મં પ્રશસ્તં સદા ॥ ૪૬॥

સર્વાશ્રમાણાં વર્ણાનાં સ્ત્રીશૂદ્રાણાં શિવાજ્ઞયા ।
ધાર્યાઃ સદૈવ રુદ્રાક્ષા યતીનાં પ્રણવેન હિ ॥ ૪૭॥

દિવા બિભ્રદ્રાત્રિકૃતૈ રાત્રૌ બિભ્રદ્દિવાકૃતૈઃ ।
પ્રાતર્મધ્યાહ્નસાયાહ્ને મુચ્યતે સર્વપાતકૈઃ ॥ ૪૮॥

યે ત્રિપુણ્ડ્રધરા લોકે જટાધારિણ એવ યે ।
યે રુદ્રાક્ષધરાસ્તે વૈ યમલોકં પ્રયાન્તિ ન ॥ ૪૯॥

રુદ્રાક્ષમેકં શિરસા બિભર્તિ
તથા ત્રિપુણ્ડ્રં ચ લલાટમધ્યે ।
પઞ્ચાક્ષરં યે હિ જપન્તિ મન્ત્રં
પૂજ્યા ભવદ્ભિઃ ખલુ તે હિ સાધવઃ ॥ ૫૦॥

યસ્યાઙ્ગે નાસ્તિ રુદ્રાક્ષસ્ત્રિપુણ્ડ્રં ભાલપટ્ટકે ।
મુખે પઞ્ચાક્ષરં નાસ્તિ તમાનય યમાલયમ્ ॥ ૫૧॥

જ્ઞાત્વા જ્ઞાત્વા તત્પ્રભાવં ભસ્મરુદ્રાક્ષધારિણઃ ।
તે પૂજ્યાઃ સર્વદાસ્માકં નો નેતવ્યાઃ કદાચન ॥ ૫૨॥

એવમાજ્ઞાપયામાસ કાલોઽપિ નિજકિઙ્કરાન્ ।
તથેતિ મત્વા તે સર્વે તૂષ્ણીમાસન્સુવિસ્મિતાઃ ॥ ૫૩॥

અત એવ મહાદેવિ રુદ્રાક્ષોઽપ્યઘનાશનઃ ।
તદ્ધરો મત્પ્રિયઃ શુદ્ધોઽત્યઘવાનપિ પાર્વતિ ॥ ૫૪॥

હસ્તે બાહૌ તથા મૂર્ધ્નિ રુદ્રાક્ષં ધારયેત્તુ યઃ ।
અવધ્યઃ સર્વભૂતાનાં રુદ્રરૂપી ચરેદ્ભુવિ ॥ ૫૫॥

સુરાસુરાણાં સર્વેષાં વન્દનીયઃ સદા સ વૈ ।
પૂજનીયો હિ દૃષ્ટસ્ય પાપહા ચ યથા શિવઃ ॥ ૫૬॥

ધ્યાનજ્ઞાનાવમુક્તોઽપિ રુદ્રાક્ષં ધારયેત્તુ યઃ ।
સર્વપાપવિનિર્મુક્તઃ સ યાતિ પરમાં ગતિમ્ ॥ ૫૭॥

રુદ્રાક્ષેણ જપન્મન્ત્રં પુણ્યં કોટિગુણં ભવેત્ ।
દશકોટિગુણં પુણ્યં ધારણાલ્લભતે નરઃ ॥ ૫૮॥

યાવત્કાલં હિ જીવસ્ય શરીરસ્થો ભવેત્સ વૈ ।
તાવત્કાલં સ્વલ્પમૃત્યુર્ન તં દેવિ વિબાધતે ॥ ૫૯॥

ત્રિપુણ્ડ્રેણ ચ સંયુક્તં રુદ્રાક્ષાવિલસાઙ્ગકમ્ ।
મૃત્યુઞ્જયં જપન્તં ચ દૃષ્ટ્વા રુદ્રફલં લભેત્ ॥ ૬૦॥

પઞ્ચદેવપ્રિયશ્ચૈવ સર્વદેવપ્રિયસ્તથા ।
સર્વમન્ત્રાઞ્જપેદ્ભક્તો રુદ્રાક્ષમાલયા પ્રિયે ॥ ૬૧॥

વિષ્ણ્વાદિદેવભક્તાશ્ચ ધારયેયુર્ન સંશયઃ ।
રુદ્રભક્તો વિશેષેણ રુદ્રાક્ષાન્ધારયેત્સદા ॥ ૬૨॥

રુદ્રાક્ષા વિવિધાઃ પ્રોક્તાસ્તેષાં ભેદાન્ વદામ્યહમ્ ।
શ‍ૃણુ પાર્વતિ સદ્ભક્ત્યા ભુક્તિમુક્તિફલપ્રદાન્ ॥ ૬૩॥

એકવક્ત્રઃ શિવઃ સાક્ષાદ્ભુક્તિમુક્તિફલપ્રદઃ ।
તસ્ય દર્શનમાત્રેણ બ્રહ્મહત્યાં વ્યપોહતિ ॥ ૬૪॥

યત્ર સમ્પૂજિતસ્તત્ર લક્ષ્મીર્દૂરતરા નહિ ।
નશ્યન્ત્યુપદ્રવાઃ સર્વે સર્વકામા ભવન્તિ હિ ॥ ૬૫॥

દ્વિવક્ત્રો દેવદેવેશઃ સર્વકામફલપ્રદઃ ।
વિશેષતઃ સ રુદ્રાક્ષો ગોવધં નાશયેદ્ દ્રુતમ્ ॥ ૬૬॥

ત્રિવક્ત્રો યો હિ રુદ્રાક્ષઃ સાક્ષાત્સાધનદઃ સદા ।
તત્પ્રભાવાદ્ભવેયુર્વૈ વિદ્યાઃ સર્વાઃ પ્રતિષ્ઠિતાઃ ॥ ૬૭॥

ચતુર્વક્ત્રઃ સ્વયં બ્રહ્મા નરહત્યાં વ્યપોહતિ ।
દર્શનાત્ સ્પર્શનાત્ સદ્યશ્ચતુર્વર્ગફલપ્રદઃ ॥ ૬૮॥

પઞ્ચવક્ત્રઃ સ્વયં રુદ્રઃ કાલાગ્નિર્નામતઃ પ્રભુઃ ।
સર્વમુક્તિપ્રદશ્ચૈવ સર્વકામફલપ્રદઃ ॥ ૬૯॥

અગમ્યાગમનં પાપમભક્ષ્યસ્ય ચ ભક્ષણમ્ ।
ઇત્યાદિસર્વપાપાનિ પઞ્ચવક્ત્રો વ્યપોહતિ ॥ ૭૦॥

ષડ્વક્ત્રઃ કાર્તિકેયસ્તુ ધારણાદ્ દક્ષિણે ભુજે ।
બ્રહ્મહત્યાદિકૈઃ પાપૈર્મુચ્યતે નાત્ર સંશયઃ ॥ ૭૧॥

સપ્તવક્ત્રો મહેશાનિ હ્યનઙ્ગો નામ નામતઃ ।
ધારણાત્તસ્ય દેવેશિ દરિદ્રોઽપીશ્વરો ભવેત્ ॥ ૭૨॥

રુદ્રાક્ષશ્ચાષ્ટવક્ત્રશ્ચ વસુમૂર્તિશ્ચ ભૈરવઃ ।
ધારણાત્તસ્ય પૂર્ણાયુર્મૃતો ભવતિ શૂલભૃત્ ॥ ૭૩॥

ભૈરવો નવવક્ત્રશ્ચ કપિલશ્ચ મુનિઃ સ્મૃતઃ ।
દુર્ગા વા તદધિષ્ઠાત્રી નવરૂપા મહેશ્વરી ॥ ૭૪॥

તં ધારયેદ્વામહસ્તે રુદ્રાક્ષં ભક્તિતત્પરઃ ।
સર્વેશ્વરો ભવેન્નૂનં મમ તુલ્યો ન સંશયઃ ॥ ૭૫॥

દશવક્ત્રો મહેશાનિ સ્વયં દેવો જનાર્દનઃ ।
ધારણાત્તસ્ય દેવેશિ સર્વાન્કામાનવાપ્નુયાત્ ॥ ૭૬॥

એકાદશમુખો યસ્તુ રુદ્રાક્ષઃ પરમેશ્વરિ ।
સ રુદ્રો ધારણાત્તસ્ય સર્વત્ર વિજયી ભવેત્ ॥ ૭૭॥

દ્વાદશાસ્યં તુ રુદ્રાક્ષં ધારયેત્ કેશદેશકે ।
આદિત્યાશ્ચૈવ તે સર્વે દ્વાદશૈવ સ્થિતાસ્તથા ॥ ૭૮॥

ત્રયોદશમુખો વિશ્વેદેવસ્તદ્ધારણાન્નરઃ ।
સર્વાન્કામાનવાપ્નોતિ સૌભાગ્યં મઙ્ગલં લભેત્ ॥ ૭૯॥

ચતુર્દશમુખો યો હિ રુદ્રાક્ષઃ પરમઃ શિવઃ ।
ધારયેન્મૂર્ધ્નિ તં ભક્ત્યા સર્વપાપં પ્રણશ્યતિ ॥ ૮૦॥

ઇતિ રુદ્રાક્ષભેદા હિ પ્રોક્તા વૈ મુખભેદતઃ ।

તત્તન્મન્ત્રાઞ્છૃણુ પ્રીત્યા ક્રમાચ્છૈલેશ્વરાત્મજે ॥ ૮૧॥

ૐ હ્રીં નમઃ ૧ ૐ નમઃ ૨ ૐ ક્લીં નમઃ ૩ ૐ હ્રીં નમઃ ૪
ૐ હ્રીં નમઃ ૫ ૐ હ્રીં હું નમઃ ૬ ૐ હું નમઃ ૭ ૐ હું નમઃ ૮
ૐ હ્રીં હું નમઃ ૯ ૐ હ્રીં નમઃ ૧૦
ૐ હ્રીં હું નમઃ ૧૧ ૐ ક્રૌં ક્ષૌં રૌં નમઃ ૧૨
ૐ હ્રીં નમઃ ૧૩ ૐ નમઃ ૧૪
ભક્તિશ્રદ્ધાયુતશ્ચૈવ સર્વકામાર્થસિદ્ધયે ।
રુદ્રાક્ષાન્ધારયેન્મન્ત્રૈર્દેવિ આલસ્યવર્જિતઃ ॥ ૮૨॥

વિના મન્ત્રેણ હો ધત્તે રુદ્રાક્ષં ભુવિ માનવઃ ।
સ યાતિ નરકં ઘોરં યાવદિન્દ્રાશ્ચતુર્દશ ॥ ૮૩॥

રુદ્રાક્ષમાલિનં દૃષ્ટ્વા ભૂતપ્રેતપિશાચકાઃ ।
ડાકિની શાકિની ચૈવ યે ચાન્યે દ્રોહકારકાઃ ॥ ૮૪॥

કૃત્રિમં ચૈવ યત્કિઞ્ચિદભિચારાદિકં ચ યત્ ।
તત્સર્વં દૂરતો યાતિ દૃષ્ટ્વા શઙ્કિતવિગ્રહમ્ ॥ ૮૫॥

રુદ્રાક્ષમાલિનં દૃષ્ટ્વા શિવો વિષ્ણુઃ પ્રસીદતિ ।
દેવી ગણપતિઃ સૂર્યઃ સુરાશ્ચાન્યેઽપિ પાર્વતિ ॥ ૮૬॥

એવં જ્ઞાત્વા તુ માહાત્મ્યં રુદ્રાક્ષસ્ય મહેશ્વરિ ।
સમ્યગ્ધાર્યાઃ સમન્ત્રાશ્ચ ભક્ત્યા ધર્મવિવૃદ્ધયે ॥ ૮૭॥

ઇત્યુક્તં ગિરિજાગ્રે હિ શિવેન પરમાત્મના ।
ભસ્મરુદ્રાક્ષમાહાત્મ્યં ભુક્તિમુક્તિફલપ્રદમ્ ॥ ૮૮॥

શિવસ્યાતિપ્રિયૌ જ્ઞેયૌ ભસ્મરુદ્રાક્ષધારિણૌ ।
તદ્ધારણપ્રભાવાદ્ધિ ભુક્તિર્મુક્તિર્ન સંશયઃ ॥ ૮૯॥

ભસ્મરુદ્રાક્ષધારી યઃ શિવભક્તઃ સ ઉચ્યતે ।
પઞ્ચાક્ષરજપાસક્તઃ પરિપૂર્ણશ્ચ સન્મુખે ॥ ૯૦॥

વિના ભસ્મત્રિપુણ્ડ્રેણ વિના રુદ્રાક્ષમાલયા ।
પૂજિતોઽપિ મહાદેવો નાભીષ્ટફલદાયકઃ ॥ ૯૧॥

તત્સર્વં ચ સમાખ્યાતં યત્પૃષ્ટં હિ મુનીશ્વર ।
ભસ્મરુદ્રાક્ષમાહાત્મ્યં સર્વકામસમૃદ્ધિદમ્ ॥ ૯૨॥

એતદ્યઃ શ‍ૃણુયાન્નિત્યં માહાત્મ્યં પરમં શુભમ્ ।
રુદ્રાક્ષભસ્મનોર્ભક્ત્યા સર્વાન્કામાનવાપ્નુયાત્ ॥ ૯૩॥

ઇહ સર્વસુખં ભુક્ત્વા પુત્રપૌત્રાદિસંયુતઃ ।
લભેત્પરત્ર સન્મોક્ષં શિવસ્યાતિપ્રિયો ભવેત્ ॥ ૯૪॥

વિદ્યેશ્વરસંહિતેયં કથિતા વો મુનીશ્વરાઃ ।
સર્વસિદ્ધિપ્રદા નિત્યં મુક્તિદા શિવશાસનાત્ ॥ ૯૫॥

ઇતિ શ્રીશિવમહાપુરાણે પ્રથમાયાં વિદ્યેશ્વરસંહિતાયાં સાધ્યસાધનખણ્ડે રુદ્રાક્ષમહાત્મ્યવર્ણનં નામ પઞ્ચવિંશોઽધ્યાયઃ ॥ ૧.૨૫॥

॥ સમાપ્તેયં પ્રથમા વિદ્યેશ્વરસંહિતા ॥

*Shri Shiva Mahapuranam 1 vidyeshvarasaMhitA*
pdf was typeset on January 31, 2026

Please send corrections to *sanskrit@cheerful.com*